Sans. MS. 4 56		
8216 824-Ms.		चन्द्रलोक : वैद्यनाथ कृत, मिश्र अमीचन्द काला होशियारपुर द्वा० बृहस्पतिवार, फाल्गुण चौदश १९३६ वि० लि० 138 पत्रक ॥ ल० अ० १२पं०प्र०पृ० ह० लि०

चन्द्रा लोक
अलंकार शास्त्र

1936 V.S.

824

ॐश्रीगणेशायनमः वृंदावनेखेलतिराधिकासमंकर्णावतंसीकृतफुल्लपद्मे
रहःसमालंव्यशरत्सुधांशुःकलंकितामापसपातुमाधवः १ नत्वागुरुंवैद्यना
थःपायगुंडेतिकीर्त्तितःव्याख्यांरमाख्यांकुरुतेचंद्रालोकेविलासिनीं २ ग्रंथसमा
प्त्यादिप्रतिबंधकशमनायस्वेष्टदेवतातिरिक्तदेवतामंगलस्यनिषिद्धतयासक
लस्लम्मतत्वेनसमुचिततयाचश्रीमवाग्देवतावस्तुनिर्देशादिरूपंमंगलमा
चरन्जयदेवनामाकविः शिष्यशिक्षायैव्याख्यातृश्रोतॄणामनुषंगतोमंग
लायचनिबध्नाति उच्चैरितिसाप्रसिद्धावर्णिनीयावावाग्रूपादेवतादीव्यतु
सर्वोत्कर्षेणवर्ततांक्रीडतांद्योततांमोदतांवेत्यन्वयार्थः भक्तवदनेइतिशेषः के
वखंडपरशोः गजास्यस्यवधेखंडोभग्नःपरशुरस्य खंडयतीति खंडः ईदृशः परशु
रस्यवाताहृशस्यशिवस्यनेत्रत्रितयीवत्रयः अवयवायस्याः सात्रितयीनेत्राणां
त्रितयीनेत्रत्रितयीसूर्यचंद्राग्निरूपनेत्राभिन्नअवयवकसमूह इवेत्यर्थः तत्र
कीदृग्वाग्वाग्देवताय वासाकाएवमग्रेपि यामंदतांमूर्खतांअरसतांचनिर्हर्ष
तांनीरसतांवारलपोरैकापदलसतांवा उच्चैरुर्ध्वंदूरे इतियावत् ऊर्ध्वत्वस्यावि

वर्त्तितत्वात् अस्य त्रिदिपतिः अस्तु देपरो दिवादिः सुमनसामिति काका
क्षिन्यायेनोभयत्र संबध्यते अत एवांतरणानुक्तिः तस्याश्च यास्तु मनसां पंडि
तानां स्ववानां शब्दानां वचनानामिति यावत् तेषां यो ध्वंसः अभावः जा
ग्रदभिन्नकलंकहेतुकस्तं हस्तयते च हस्तेनातिक्रामति दूरीकरोतीत्य
र्थः तस्याः प्रसादेन तेषां निर्दुष्टवचनप्रयोगः सुकरः अन्यथा दुष्टवाक्प्र
स्सरणाभीत्यावचनाभाव इति भावः केचित्तु जाग्रत्यः कलाः अस्य जाग्रत्
कलो मंदगंभीरः शब्दोऽस्यवासः तं एवं विशेषणेन मंदत्वादिना शब्दानां हस्तं
पुरुषं हस्तयते हस्तेनं स्पृशति हस्तगतं वा करोतीत्यर्थः किंभूतं केनापि
पुरुषेन वध्वंसो यस्य सः तं भागुरिमतेन वध्वंसशब्दः साधुरित्याहुः पुनः
कीदृक् यास्तु मनसां पंडितानां मानसे अंतःकरणे उल्लासिनी उल्लसनशी
लाः पुनः याडुष्टानां उद्यन्योगनदत्तस्यनाशनं यस्मात् कीदृशं अर्चिरस्याः सा
य वाता दृशामदनस्यनाशने अर्चिरेव यद्वाता दृशामदस्यनाशकं अर्चि
र्यस्याः सा यद्वा दुष्टत्वमभेदेन विशेषणं अर्चिर्ज्वालेवेत्यर्थः धर्तोयन्

नितिपाठे धृष्टाउद्धतमदाः विनाज्ञानेन महागर्वभाजः अन्ये प्राग्वत् पुनः
अमला निर्मला अतएव लोकत्रयीदर्शिकाः भूर्भुवः स्वः स्वरूपलोकाभि
त्रयस्य वक्षसः हृदर्शनकर्त्रीत्यर्थः न वर्णनक्षमेति यावत् केचित्तु अ
मले त्वं तमेकं पदमाहुरिति वाग्देवीपक्षे नेत्रत्रितयीपक्षे तु यामंदानि नि
ष्प्रभाणि च तानि तामरसानि कमलानि च मंदतामरसानि तेषां भावः॥
मंदतामरसतां तां कमलनिष्ठं मंदत्वं संकुचितत्वं दूरे क्षिपतीत्यर्थः एतेन
सूर्यमयत्वं सूचितं तस्य पद्मविकासकत्वादिति भावः पुनः सुमनसां
पुष्पाणां मध्ये केजलेरोतीति केरवो हलदंतादिति तत्पुरुषे कृतीति वा
सममस्या अलुक् हसत्तस्य पदं प्रियं केरवं कुमुदं तस्य ध्वंसं नाशं जाग्रत्यः
कलाः यस्मिन् कर्मणि यथा भवति तथेति सर्वत्र क्रियाविशेषणं अ
त एवमध्येतदुक्तिः तथा च तत् यथा तथा हसन्ति यत्ते हसनेनातिक्रामति
एतेन चंद्रमयत्वं सूचितं तस्य तद्विकासकत्वात् पुनः या च सुमनसा
देवानां पंडितानां वा मानसे अंतः करणे उल्लसनशीला एतेनापि चंद्र

मयत्वं सूर्यमयत्वं वह्निमयत्वं वा सूचितं चंद्रेण देवानां तृप्तिजननात् ।
स्य दर्शनीयत्वाच्चेनोदयेकामीचरणात्तस्यापितत्वाच्चनवहमग्रेरूपा

ॐ श्रीगणेशायनमः उच्चैरस्यतिमंदतामदसतांजाग्रत्कालं
कैरवध्वंसहस्तयतेचयात्सुमनसामुल्लासिनीमानसे दुष्टो
घन्मदनाशनाच्चिरमलालोकत्रयीदर्शिकासानेत्रत्रितयीव
रंवडपदशोवाग्देवतादीव्यतु १ ॥ श्रीरामचंद्रायनमः ॥

स्यत्वात्तथात्तआनस्यप्रभुत्तुत्वात्वाच्चमघाएतद्विशेषणेनविवक्षिता
र्थपुष्टिः एतद्विनातद्देवनासंभवात् अतएवसर्वकल्पेपिविशेषणं
सार्थकं पुनः धृष्टः उद्यन्यः मदनः मारः तस्याशानंयस्मादीदृशामर्दि
र्यस्याः साएतेनाग्निमयत्वंसूचितंतद्रूपनेत्रस्यमदनदाहकत्वात् अ
तएवच अमला अत्रापिसर्वेवत्वोध्यमितिकेचित् अतएवलोकत्रयी

दर्शिकेति समुदाय विशेषणं सर्वाणि तु प्रत्येकपदानीति बोध्यं ॥१०॥
प्रयोजनादिरूपचमत्कृतिकीर्त्ते येनामनीचनिबन्धनं शिष्यावधानाय
प्रतिजानीते हंहो चिन्मयेति इतरसाहित्यग्रंथापेक्षयास्याधिक्यं स्वच
मत्कवितायाः प्रयोजनान्यपास्य अवैयर्थ्यं प्रतिपादयति चिन्मये
त्यादिना हंहो इति पदद्वयं तत्र हमित्यनुनये हं रोषभाषणेः ननु येपि चे
ति हैमोक्तेः हं रुषोक्त्यनुनीति श्रितिविश्वप्रकाशोक्तेश्च हो इति संबो
धने हो हो तु भो वत्संबुद्ध्या कानयोर्मता विर्ति तदुभयोक्तेः हे चिन्मय
चित्तचंद्रमणयः चित्स्वचुरामणि चैतन्यात्मयाः एतेन जडत्वनिरासः
तस्य रसासंवर्धकत्वात् जडक्तिवैयर्थ्यापत्तेश्च ईदृशानि यानि चि
त्तान्यंतः करणानि तद्रूपाये चंद्रमणयः चंद्रकांतशिलामणयः ।
यद्वा तान प्रभुरात्मरूपा वा ये मनोरूपचंद्रकांतमणयः यद्वा तेषां ये
तद्रूपास्ते इत्यर्थः सर्वरसान् शृंगारादीन् संवर्द्धयथ्वं तत्तन्मणीना
मपि जलरूपरससंवर्द्धकत्वात् हे निर्विचारककवितेत्वमस्मत्प्रकाशी

भवमा ऽस्मत् ऽस्मत्तः प्रकाशो यस्याः साऽस्मत्प्रकाशा ऽनस्मत्प्रकाशा
ऽस्मत्प्रकाशा संपद्यते तथाभवेत्यस्मात्प्रकाशीभवमेत्यर्थः स्वकविता
यां स्वभावतो निर्विचारत्वासत्वात् हि: पत्तः स्वैदिणि स्वेच्छाचारशीलेना
नाजनसाधारणे ऽत एव निर्विचारे निर्विचारे निर्गतः विचारः वास

हे होचिन्मपचित्तचंक्रमणायः संवर्जयञ्चरसान् रेरे स्वैदिणि
निर्विचारकविते मा ऽस्मत्प्रकाशीभव उल्लासायविचारवीचिनि
चयालंकारवारां निधेश्चन्द्रालोकमयं स्वयं वितनुते पीयूषवर्षः

योऽयपात्रापात्ररूपो यस्याः अत एव रे इति नीचसंबोधनं घोतकं ता
त्राप्पतिशयघोतनार्थ्यवी प्साद भयत्रहेतु माह चंद्रेति यत्तः अयं प्रसिद्धः
कृतीपुण्यवान् कुशलः पंडितो वा पीयूषवर्षः पीयूषाणि वर्षतीत्स चंद्रः
तन्नामकः जपदेवश्च स्वयं इत्तर निरपेक्षेण मादृशाकविता निरपेक्षेणच

चंद्रा. ४ चंद्रसंबंध्यालोकं तन्नामकं ग्रंथं च विशेषेण तनुते न तु विस्तारमात्रं चं
द्रोदये चंद्रमणीनां क्षरणात् कुमुदाभिसारिकागत्यभावाच्चेति भावः न
न्वितरग्रंथसत्त्वे किमपूर्वोयं ग्रंथः क्रियत इत्यत आह उल्लासेति वि
चारस्तत्पक्षकं रंगसमूहो यस्य ईदृशो ऽलंकारस्तत्सागरस्तस्योल्लासा
यपुष्टये इत्यर्थः वाग्विनिधिरित्यत्र ननु तु रूषे कृतीनि वकुलग्रहणात्
षष्ठ्या अलुक् चंद्रेणस्वालोकवितानेकृते यथोदधेर्वृद्धिस्तथैतद्ग्रं
थेजयदेवेन कृते सत्यलंकाराणां पुष्टिः सा च न ग्रंथांतरे इत्यर्थः ॥
सफल इतिभावः यद्यप्यत्रालंकारातिरिक्ता अपि प्रतिपाद्यंते तथापि
तेषां बाहुल्येन प्रतिपादनीयत्वेन प्राधान्याद् उल्लेखः एवं चालंकारा
दयो विषयास्तद्व्युत्पत्तिः प्रयोजनं प्रतिपाद्यप्रतिपादकभावः संबं
धस्तज्जिज्ञासुरधिकारीति सूचितं ॥ २ ॥ ननु एतद्ग्रंथकरणस्य
तदुल्लासरूप प्रयोजनसत्त्वेपि एतदध्ययनस्य निष्प्रयोजनत्वात्तु रु
षाणामप्रवृत्तिरत्र ग्रंथे स्यात् न चालंकारादिव्युत्पत्तिः फलं तस्याः

स्वतोऽपुरुषार्थत्वात् अतः सामान्यतोऽलंकारशास्त्रप्रयोजनक
थनद्वारा अत्र पंडितप्रवृत्त्यौपाधिकं एतदध्ययनस्य फलं तादृशं
दर्शयति युक्त्येति हे बुधाः पंडिताः देवाः अस्मत्साहित्यमलंकारशा
स्त्रं तत्संबंधिनीया सरस्वती तत्संबंधि यन्नीरं एतच्चंद्रालोकाख्य

युक्त्यास्वाघलसद्रसैकवसतिः साहित्यसारस्वतद्वीरांभो
धिरगाधतामुपदधत्सेव्यः समाश्रीयतां श्रीरस्मादुप
देशात्कौशलमप्यपीयूषमस्माज्जगज्जाग्रल्लासुरपत्रकेसरय
शाः श्रीतां अतरस्मात् बुधाः ॥ ३ ॥ श्रीरामचंद्रायनमः ॥

गंधपरूपंतद्रूपः सागरः यद्वा साहित्यसंबंधिसारस्वतंवाङ्मयंत
देवतीरं तस्योदधिरयंयद्वासाहित्याभिन्नवाङ्मयाभिन्नतीर

सागरोयं सम्यक् अध्ययनाध्यापनावलोकनादिरूपमप्यनादिना
आस्वादीयतां न तु यथा कथंचित् तत्र हेतुगर्भं विशेषणं सेव्य इति प
तः पुष्पवत्संबंधिसेवनाश्रयः शनैर्गंतु पदे वोढुं योग्यः चर्वणास्वा
द्यत्वमर्थः तत्र सहेतुकं विशेषणं अगाधतां निम्नतां गंभीरतां गू
ढाशयतां च बिभ्रत् यत इति शेषः ग्रंथांतरापेक्षयाऽत्र गांभीर्यमिति
भावः तत्रापि हेतुगर्भं विशेषणं युक्त्येति यतः युक्तिभिरुपायैर्न
तु यथा कथंचित् साधकबाधकप्रमाणोपन्यासैश्च आस्वाद्याः
आस्वादयितुं योग्याः सादरं स्नानयोग्याश्च येऽलसंतः उत्तमाः न तु
ग्रंथविस्तरमात्रजनकाः मलिनाश्च रसाः शृंगारादयः जलानि च
विषादयो रत्नानि वा हर्षादयो वा तेषां एकाश्रयः आश्रयः सहायो वा वस
तिः वासस्थानमित्यर्थः यद्वा युक्त्येति तृतीयांतमास्वाद्येत्यन्वयं त

क्रियान्वितं साच समाश्रयणेऽन्वेति यद्वा युक्तिश्चास्त्वापलसद्रस
श्चात्तयोरेकावसतिः युक्तिश्च समाधिः पूर्वोक्तरूपाच अन्यत्रालंका
रग्रंथेयुक्तिर्नास्तीत्यर्थः अतः अगाधत्वेन सेव्यत्वात्समाश्रयणं
युक्तमिति भावः तस्य फलमाह श्रीरित्यादि हे देवाः पंडिताः अ
स्माद्दृंशरूपात्सागरात् श्रीः लक्ष्मीः समाश्रीयतामित्यन्वयः
अतएवांतरातदुक्तिः भवतीत्यध्याहारेणानुव्याख्यानं निष्फलं
तत्रमपनाल्लक्ष्मीप्राप्तिः सरससेवनेन कीर्त्तिप्राप्तिश्च अत्राधीतत
हृपात्संतोषितराजादित इति भावः अन्यच्च अस्मात्सर्वोक्तादुप
देशः परस्यबोधनं तथाचान्येषां गुरुरपि स्वयं भवति उपदेशको
शालस्य पीयूषत्वेन शिष्याणां प्रवृत्तिः कांतासंमितोपदेशत्वं च
व्यज्यतेत्रह्यविद्यावानत्र यत्कोशलं कुशलत्वं तत्प्रचुरपीयूषं अ

स्तंतद्रूपंवचश्चेतिकर्मक्रियापूर्ववत् अपरंच अस्माज्जगति
नत्तत्तदेकदेशोजाग्रद्विकसितंभास्वरंदेदीप्यमानंपद्मकिंजल्क
वद्यद्यस्याः तद्रूपः शीतांशुखंडश्चंद्रः नत्वद्यमांशुखंडउदासीनश्चेतिपूर्व
वत्पदाजगदेवैताद्दशांपद्मतस्यकेसरंयस्यत्वेन न वत् यस्या
स्तद्रूपश्चंद्र इति जाग्रद्भास्वरेतिपद्मयस्याःशीतांशूनांविशेषणे
तंत्रेण अतएवशाकंडुत्कीर्णनंतथाचान्यग्रंथतोपयांश्चंद्रोपिए
तस्सेवनेसम्यग्भवति तथाचार्थीयदेशायस्याःफलककाव्यज्ञानप्रयो
जनकग्रंथेऽत्रप्रवृत्तिरुचितेतिभाव अन्यदपिप्रयोजनत्रयंकाव्य
प्रकाशादौस्पष्टमितिबोध्यं ॥३॥ संप्रतिकविःस्वाहंकारंपरिह
रतितमितिवयंतेपूर्वेप्राचीनाये आचार्यास्तेसूर्याइवतेषांज्यो
तिःसमूहतुल्यायाउक्तयःवचांसितेषामनुक्रमंप्रसरणंस्तुमःतं

कं यं संश्रित्य सम्यक् श्रित्वा मम गुणाः त्रसरेणव इव प्रकाशंते
प्रकटीभवंति त्रसरेणवः सूर्योदये सति गवाक्षादि मार्गेण प्रवि

तेपुरवीचार्यस्त्यर्थोक्ति ज्योतिः स्तमो कमंलमः यंसं
श्रित्य प्रकाशंते मद्गुणा त्रसरेणवः ॥५॥०॥०॥

दे षु तत्किरणेषु प्रकाशंते यथा तथा मद्गुणास्तदाश्रयेणैव प्र
काशंते न तु स्वतः असंख्यातत्वात् न षः उक्तज्योतिषो देवोपमानोपमे
यभावो वा तदुक्ति दर्शनाभ्यासेनैव मम सामर्थ्यमिति भावः ॥५॥
नन्वेतद्ग्रंथस्य स्वकल्पितत्वे प्राचीन विरुद्धत्वेनानुपादेयत्वं अ
न्यथा एतस्य दोषयुक्तत्वेनैतद्दोषेणाजेषामपि दुष्टत्वापत्तिरिस्मेत्य

तत्राह नाशंकनीयमिति पूर्वेषां प्राचीनानां मतं सिद्धांतः।
एतेन ग्रंथेन दूष्यते दोषयुक्तं क्रियते इति नेत्यादि तत्प्राचम
लिनवदाभासमाना या अपि स्वोक्तेः प्राचीनोक्तिपरिष्कारत्वे
नोपादेयत्वमदुष्टत्वं चेति भावः वस्तुतस्तु पूर्वाचार्यमतस्य

नाशंकनीयं पूर्वेषां मतमेतेन दूष्यते किंतु च
दुर्मगादीणां कज्जलेनेव भूष्यते ५ ॥ ८ ॥

उक्तत्वापात्ततोभासमानापि मदुक्तिर्न तुच्छेत्याह नाशंके
ति दोषदानेन विचारकाणां तत्र सिद्धांते द्राक्स्फत्युदयादिति।
भावः ५ काव्यबीजमाह प्रतिभैवेति शक्तं सांगवेदशास्त्रादिश्र
ष्टादशात्मकस्य श्रवणं तस्य परिशीलनान्निपुणता अभ्यासः

काव्यत्तपोत्तयाकृतः ताभ्यांसहिता युक्ता प्रतिभैवनवनवोन्मेष
शालिवुद्धिविशेषएवएवकारेणतदहेतुत्वव्यवछेदः कवितांप्र
ति तत्सामान्यप्रतिहेतुः मज्जलसंयुक्तावीजमालालतांप्रति
यथाहेतुरित्यर्थः वीजव्यक्तिरितिपाठेतत्तद्रूपाव्यक्तिरित्यर्थः

प्रतिभैवश्रुताभ्याससहिताकवितांप्रति हेतु
मृदंवुसंवद्धावीजव्यक्तिर्लतामिव ६॥०॥०॥

रुद्गमः क्वचित्तुवीजस्यफलतामिवेतिपाठः तत्रवीजस्यफलता
तद्रूपता ऽंकुरादितत्स्यतेतियावत् तांप्रतियथाहेतुर्जलेनयुक्ता
मृदित्यर्थः अत्रेदंवोध्यंप्रतिभादीनांदंडचक्रादिन्यायेनकार
णतानतुतृणारणिमणिन्यायेन अतएवहेतुरित्युक्तंनतुहे

चंद्रा०
८

तव इतिस्पष्टं चेदं प्रकाशादौ एतेन क्वचित्प्रतिभायाः क्वचिददृष्ट
स्य हेतुत्वं वैजात्यनिवेशान्न व्यभिचार इत्यपास्तं ग्रंथकृदसंमत
त्वादत्यपास्तं एवोक्तिरप्यफलास्यादिति ६॥ काव्यलक्षणमाह नि
र्दोषेत्यादितत्रादौत्याज्यतयाह निर्दोषेति दोषः स्याच्चेती वी॥
त्यादिना वक्ष्यमाणः तन्निरुक्तिरपि तत्रैव वक्ष्यते दोषसामान्या
भावोत्र विवक्षितः काव्यत्वं चाव्याप्यवृत्तीति भावः लक्षणनिरु

निर्दोषा लक्षणवती सरीतिर्गुणभूषणा सालंका
ररसाऽनेकवृत्तिर्वाक्काव्यनामभाक् ७॥७॥

क्तः संहतिरित्यादिना वक्ष्यमाणनिरीतयः यांचाल्यादयस्तत्पा एव
मग्रेपि गुणाः श्लेषादयः तैर्भूषणाभूष्यमाणा राजभोजनाः

शम
८

मालय इति वत्कर्मणि ल्युट्‌ अलंकारा उपमादयः रसाः शृंगारादयः भावानामप्युपलक्षकमेतत्‌ तैर्नैतद्रहितेन काव्यत्वं वक्तव्यं नथुरा द्यः शाक्ताद्यश्च अत एवानेकत्वमत्रैव विशेषणं नान्यत्र तासां समस्तानेकमनेकत्वं चस्वतएव ज्ञेयं ईदृशी वाचि मा शब्दे काव्य पदवाच्यंत्व मितर्पयः एतेनोक्तधर्मविशिष्टशब्दनिष्ठमेव काव्यत्वं काव्यं करोतीति प्रयोगस्यतत्रैव दर्शनादिति स्वचितं ननु शब्दार्थयो व्यासज्यवृत्ति काव्यत्वमिति प्रकाशादिः शब्दप्राधान्येतार्थे शब्दवृत्तिः अर्थप्राधान्ये विपरीतं इत्यन्येन तत्कथमत्र सर्वव्यापार्थ्यस्यत्याग इति चेन्न निर्दोषत्वेनैवार्थवत्त्वलाभात्‌ निरर्थकस्य दुष्टत्वात्‌ अतोपि हेतोस्तस्या गुपादानं विपरीतं यत्तनेष्टमुक्तहेतोरिति दिक्‌ ॥ ८ ॥ प्रकाशोक्तिसम

अंगीकरोति यः काव्यं शब्दार्थावनलंकृती असौ
न मन्यते कस्मादनुष्णमनलंकृती ८ ॥ ९ ॥

र्थानंस्त्वर्थपितुमुपहासयन्नातांत्रयाः पाततो दूषयति अंगीति यः।
अनलंकारो शब्दार्थौ काव्यमित्यंगीकरोति असौ कृती पंडितः
अनुष्णमग्निं कुतो न मन्यते इत्यर्थः वचनभेदेप्यभेदात्वयस्य
वहुष्णोष्ट्वान्नानुपपत्तिः अलंकाररहितयोः शब्दार्थयोः
काव्यत्वांगीकारकर्तुरुष्णत्वरहितस्याप्यग्नित्वांगीकारो युक्तः
स्यात् नचैवमत्यन्तेणादृष्यत्त इत्युपहासः अलंकारादियुक्तमे
व काव्यं तस्य किंचिदस्फुटत्वेपि न काव्यत्वहानिरिति तत्वमितिभा
वः ८ ॥ काव्यत्वस्यैतादृशवाङ्निष्टत्वात्तद्घटकशब्दस्य विशेष्य

विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते रूढ
यौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा ९ ॥ ७ ॥

निर्दोषत्वादिविशेषणासंगमाय दोषादीनि निरूपयितुं पदादिभेदा
न्सलक्षणान्वक्तुं पदघटकशब्दभेदान्वक्तुं तल्लक्षणमाह विभक्त्यु॰

त्येति सुप्तिङ्प्रत्ययोत्पत्तियोग्यः धातुप्रातिपदिकान्यतरः प्रकृतिभागः।
तस्यैव शाब्दत्वात्सः शास्त्रीयस्तत्कल्पितः साधुबोधकः शब्द इष्यत इत्य
र्थः तथा च शास्त्रीयशब्दत्वं लक्ष्यतानवच्छेदकं तेन भेरीशब्दादौ ना।
व्याप्तिः सः शब्दः रूढयौगिकयोगमिश्रितरूढिकैश्च भेदात्त्रिधेत्यर्थः
पुनरिति वाक्यालंकारे त्वर्थे वा तत्र समुदायमात्रशक्त्याऽर्थप्रत्यायको
रूढः अवयवमात्रशक्त्या अर्थप्रत्यायको यौगिक अवयवशक्त्यास
मुदायशक्त्या चैकार्थप्रत्यायको योगरूढ इति ध्येयम् ॥८॥ अत्राद्यस्य
भेदत्रयमाह अव्यक्तेति आदिमः आद्यः अग्निम इति पाठेप्येवं संभ

अव्यक्तयोगनिर्योगयोगाभासैस्त्रिधाऽऽदिमः तेच
वह्न्यादिभूषादिमंडपाद्या यथाक्रमं १० ॥ ५२ ॥

वयवार्थस्याव्यापकत्वेनाऽस्फुटत्वेनाननुसंधानेपि समुदायमात्र
शक्त्यार्थप्रत्यायकत्वमव्यक्तयोगत्वं अवयवार्थाभावो निर्योगत्वं ना

त्पर्यविशेषाऽनन्वितभासमानावयवार्थत्वं योगाभासत्वमित्यर्थः ए
तल्लक्ष्याणां हन्ते चेति ते च अश्वकर्णयोगाद् यो यथाक्रमं वृत्त्यादयो
बोध्या इत्यर्थः अत्र बहुव्रीहीणां त्रयाणां द्वंद्वः तत्राद्ये वत्सत्वात्तय
मिति संभवतो योगस्याकरीत्यानप्रतीतिः किंतु सर्वत्र वृत्तत्वजातिप्र
तीत्या समुदायशक्तिप्रतीतिः तथा चोक्तलक्षणसंगतिः द्वितीये सत्ता
यां भूधातोर्गतौ वा धातोः सत्वे पि तत्र योगासंभव एव यद्यपि तत्कर्त्री
दौ योगः संभवति तथापि तस्यात्रालक्ष्यत्वमेवेदमेव ध्वनयितुं सत्ते
कदेशाम्भूवादीत्युक्तं तत्र हि धातोरेवानुकरणमित्यन्यसंभावनैव न ए
तेन तात्पर्यविषये इत्यत्राविशेषणमित्यपास्तं उक्तयुक्तेः तृतीयतो
वैलक्षण्यानापत्तेश्च आदिभ्या प्रत्ययशब्दादिचादिग्रहः यत्तु भूवा
दय इति लक्षणस्य समुदितं लक्ष्यं तत्र पाणिनि रूपाभ्रमन्ति सर्व
धातुप्रतिपादकं भूशब्देन भूवाशब्देन वा बहुव्रीहौ योगासंभवस्त
न आद्ये भ्वादय इत्यापत्तेः अंत्ये धातुबुदादित्वासंभवादिति तत्र त

स्ययौगिकस्यैवतत्तदर्थान्तरे स्पष्टत्वात् तृतीयेऽन्यत्रभासमानमंडपानक
र्तृत्वरूपयोगार्थान्वयसंभवेपितात्पर्यविषयेगृहरूपेऽर्थेतदसंभवइत्य
र्थः १० यौगिकोपित्रिधेत्याह रूढेति रूढयौगिकः यौगिकमूलयौ
गिकः संभिन्नयौगिकश्चेति संभिन्नान्तभेदैः सत्रिधेत्यर्थः अत्रयोगरू

रूढतन्मूलसंभिन्नप्रभेदैर्यौगिकस्त्रिधा तेचभांति
स्फुरत्कांतिकौंतेयादिस्वरूपिणः ११ ॥०॥०॥

न्यप्रकृतिप्रत्यययोगेनार्थप्रत्यापकत्वं रूढयौगिकत्वं तादृशयौगिक
योर्योगेनसमासेनाऽर्थप्रत्यापकत्वं यौगिकमूलयौगिकत्वं यौगिकायौ
गिकयौर्योगेनार्थप्रत्यापकत्वं संभिन्नयौगिकत्वमितिबोध्यं एतल्लक्षा
ण्याहतेचेतिवाक्यार्थः प्रागवत् स्वरूपपरभांत्यादिशब्दानांद्वंद्वगर्भितब
हुव्रीहिगर्भितकर्मधारयप्रकृतिकइति नीलरूपवद्गित्वन्तस्ययोगः तत्रा

चं॰
११ येभ्रष्ठधातोर्गतिधर्मोभयवाचकत्वस्योक्तत्वेपिकेवलप्रकृतेरप्रयोगे
एततत्तदर्थावबोधेनतादृशप्रकृतिप्रत्यययोगादेवतयोर्बोध इति॥
लक्षणसंगतिः द्वितीयेकमलिनंतस्करज प्राज्ञे तयोः कांतिस्फुरत्प
योः शुद्धयौगिकयोः समासेनतत्संबंधपर्यंतप्रतीतिरितितत्प्याप्त॥
तीयेपिराजादिवाचिकुंतिशब्दात्तद्धितलुकिङीषियौगिककुंतीशब्द॥
स्ययौगिकतद्धितयोगेननिष्पन्नकौंतेयपदस्यार्जुनादिबोधकत्वात्त
थेतिबोध्यं आदिनापाचकादिपरिग्रहः ॥ योगरूढस्यापित्रैविध्य

तन्मिश्रोऽन्योन्यसामान्यविशेषपरिवर्त्तनात् नीर
धिः पंकजं सौधं सागरोम्बुरुहः पापी १२ ॥ ७ ॥

माह तन्मिश्र इति सामान्यविशेषयोर्धर्मयोः क्वचित्प्रतीयमानयो
रन्योन्यंमिथ्यापरस्परिवर्त्तनंविनिमयः क्वचित्तस्मादयंतन्मिश्रोपि
त्रिधेत्यनुषंगेणत्रिधैवेत्यर्थः एकएवायंभेदइतिन्प्रांचः प्रमादः भे राम ११

दसंभवात् अतएवहेतूक्तिः क्वचिद्योगस्याने रूढेर्वा श्रवणं क्वचि
द्रूढिस्थाने योगस्यैव क्वचिदुभयसत्त्वमिति फलितं अन्योन्यो भिन्नो मि
लितो वा परिवर्त्तनमुपस्थितिरिति व्याख्यातं अतएवरसाननुगुणगाढ
ष्टा साधिका च एतल्लब्धा एषाहनीरधिरित्यादिनीरध्यादिपदात् जला
धिष्ठानत्वपंकजनिकर्तृत्वसुधानिर्मितत्वसगरनिर्मितत्वभूजातत्व
शशधरत्वादिसामान्येन समुद्रत्वपद्मत्वगृहत्वसमुद्रत्ववृत्तत्वं चंद्रत्वा
दिविशेषेण च रूपेण क्वचिदुपस्थितावपि क्वचिदन्यतरत्यागेनान्यतरा
श्रवणं क्वचिदुभयप्रकारकबोधेपि क्वचिदन्यतरप्रकारबोध एव का
रणवशेनांगीकार्य इति भावः १२ तत्र सामान्यपरिवृत्तेः फलमाह द्वी
रेतितेन विशेषस्य सामान्येन परिवर्त्तने अन्यपाः त्रसामान्यरूपेणा
प्युपस्थितेर्द्वीरेत्यनन्वितं स्यात् जलाधिष्ठानत्वादौ विशेषव्यवहारः
समुद्रत्वादौ सामान्यव्यवहारश्च प्राचां लोकविरुद्ध इति स्पष्टमेव ए
वं द्वीरसागरपदे पितयोपस्थितेर्न तदन्वयः एवं सुरभूरुहः निष्कलंकः
न

शशीत्यत्रतयोपस्थितौह्रदादेरन्वयः एवंस्वर्णपंकजंकलधौतसौधइ
त्यत्रापिवोध्यं अकाशपंकजमित्यस्यतु अयमाशयः यद्यपिपङ्कस्य
वंचंद्रस्यापिनाकाशप्रभवत्वं तथापितत्संवंधमात्रेणतापप्रयोगः स
चसामान्यरूपेणोपस्थितौवाधितः पंकस्यमरुसंवंधित्वात् यद्यपित

द्वीदनीरधिराकाशपंकजंतेननसिध्यति विभक्तंपरं
पदंवाक्यंतद्व्यूहोर्थसमाप्तितः १३ ॥ ७ ॥ ७ ॥

योपस्थितावपिनतदवाधः समुद्रपंकजनिकर्तृत्वस्यचंद्रेसंभवात्
याप्यगाधजत्वेनतस्यपंकासंभवस्तत्संभवेपितत्तउपनतेरनुभवः यद्वा
स्वरधुनीवर्णनीयपद्माशयेनसप्रयोगइति अतःसर्वत्रात्रविशेष
रूपेणैवोपस्थितिर्वध्यासामान्यस्यविशेषेणपरिवृत्तेः फलंतुनी
रधिःकूपःसागरः कूपइत्यादौवोध्यं अत्रहिविशेषतउपस्थितौ

रूपत्वाद्यनन्वयापत्तिरतः सामान्यमात्रपरत्वं तस्याश्चत्वीरेतिम
लमुपलक्षणं एतेनयौगिकरूढस्यापिसंग्रहाच्चातुर्विध्यंनोक्तं
वृत्तिभेदस्सर्वकार्यभेदेनपदभेदांगीकाराच्चेतिदिक् अथपदादि
लक्षयतिविभक्त्यंतमितिसुबंतंतिङंतंचपदंतेषांपदानांव्यूहः स
मूहः आद्यादित्वात्समन्वितानांसत्तिः अर्थसमाप्तौसत्यांनिराकां
क्षइतियावत् तस्याश्चविशिष्टैकार्थप्रतिपादकनिराकांक्षपदस
मूहोवाक्यमितिफलितं १३ खंडवाक्यंलक्षयति युक्तार्थतामितिसं
बद्धार्थप्रतिपादकानांपदानांयःसःव्यूहः तांअर्थसमाप्तिंविनासंख

युक्तार्थतांतांचविनाखंडवाक्यंसदृष्यते वाक्यंचखंडवा
क्यंचपदमेकमपिक्वचित् १४ ॥ ॥

डवाक्यमित्यर्थः योगोरक्तितमानयेत्यादिः साकांक्षार्थबोधकपदस
मूहइतियावत् क्वचिद्युक्तार्थतामितिपाठः युक्तमप्यापमन्यथाचा

संगत्यापत्तेः अत्र पाठे समासस्यपलीयंप्रकार्थतांश्रयसमाप्तिंच
विनेत्याद्यर्थः तथाच समासोपिन खंडवाक्यमितिभावः वाक्यत्व
खंडवाक्यत्वयोः क्वचिदेकपदे प्रत्येकंसत्वमप्यस्तीत्याह वाक्यंचे
तिएकमपिपदं क्वचिद्वाक्यंक्वचित्खंडवाक्यंच भवतीत्यर्थः तथाच
पदसमूहत्वरहितप्रागुक्तलक्षणंत्रवोध्यं १४ क्रमेणोदाहरति
धूमेति अत्रपंचम्यंतस्यैकविभक्त्यंतत्वादेकपदत्वेन पदसमूहत्व
हेत्वाकांक्षानिवर्तकतया निराकांक्षविशिष्टैकार्थप्रतिपादकत्वेन

धूमवत्वादितियप्पादेवेत्यामंत्रणेपथ्या वाक्यान्येका
र्थविज्ञातान्याहुर्वाक्यकदंबकं १५ ॥ ॥

वाक्यत्वंचदेवेत्यत्रापिपूर्ववदेकपदत्वंसंवोध्य देववोधकत्वेनकि
याकांक्षत्वेनार्थसमाप्तेः खंडवाक्यत्वंचेतिवोध्यंमहावाक्यलक्षय
ति वाक्यनीति एकार्थतात्पर्यकाणीत्यर्थः एकार्थतात्पर्यकोवाक्य

समूहः प्रबंधं इतिभावः सामान्यलक्षणंतु समासभिन्नत्वेसतितत्प्र
कृतिकविभक्त्यंतभिन्नत्वेसतिविशिष्टेकार्थप्रतिपादकत्वमितिबोध्यं ५
स्वादिकीर्तयेआह महादेवइति अनेनसूकविजयदेवेनपंडितजयदे
वाख्येनरचितेचंद्रालोकाख्यग्रंथेअसौनिर्मितः आद्योमयूखः प्रप
मकिरणः सुमनसः पंडितान्देवाश्चचिरंसुखयतु अनेनकेनयस्य

महादेवस्सत्रप्रमुखमखविद्यैकचतुरः सुमित्रातद्भक्तिप्र
णिहितमतिर्यस्यपितरौ अनेनाऽसावाद्यःसुकविजयदेवे
नरचितेचिरंचंद्रालोकेसुखयतुमयूखःसुमनसः १६॥

महादेवाख्यःसुमित्राख्याचपितरौपितामाताचकीदृक्महादेवःस
त्रप्रमुखमादिर्येषांतादृशायेमखायागास्तेषांयाविद्यास्तास्वेकचतुरः
परमकुशलःकीदृक्सुमित्रा तस्यमहादेवस्यभक्तिःसेवातत्रप्रकर्षेण

निहिताम तिर्थयेत्यर्थः १६ इतिपापगुंडोपाख्यवैद्यनाथविरचिता
यां चंद्रालोकव्याख्यायां सप्तमो विलासः १ काव्यलक्षणक्रमानुरोधे
न प्राग्दोषान् वक्तुं शिष्यावधानाय प्रतिजानीते अपेति प्रतिपाद्य

इति पीयूषवर्षपंडितजयदेवविरचिते चंद्रालोकालंका
रे वाग्विचारो नाम सप्तमो मयूखः १ अपदोषाः स्याच्चेतो
विशतायेन सक्षता रमणीयता शब्देर्थे च कृतोन्मेषं दोषमु द्घोषयन्ति

त इति शेषः तत्रादौ दोषसामान्यलक्षणमाह स्यादिति चेतः अंतःक
रणं तत्कर्मक प्रवेशकर्त्रा येन काव्यस्य रमणीयता शाक् अर्थरसा
द्यभिव्यंजकता तेन नाशेन सहिता प्रतिबद्धा स्यात् वर्णपदवाक्य
रूपे शब्दे तदर्थे च कृत उन्मेषः प्राकट्यं येन तं दोषं आलंकारिकाः क
थयंतीत्यर्थः अनेन आत्मनिष्ठत्वस्य तस्य निरासः शाक् अर्थरसा

यन्यतरधीप्रतिबंधकत्वंतदवच्छेदकतयासिद्धोजातिविशेषोवादो
षत्वमितिभावः एतेष्वदोषोत्पत्तिवाराइच्छाप्रतिबंधात्तत्प्रतिबंधः
क्रियतोत्सरस्वतीकंठाभरणोक्तश्लेषप्रसादसमतादिगुणानांरसा
द्यवबोधजनकतयासिद्धानामभावरूपोदोषः नजात्यंतरंयथा
श्रुतिकटुत्वसौकुमार्याभावः कांतेरभावोग्राम्यत्वमित्यादि तदु
क्तंवामनेनयोहेतुः काव्यशोभायाः सोलंकारोनिगद्यतेगुणोपिता
दृशोस्तेयोदोषःस्यात्तद्विपर्ययइतियतः काव्यशोभाहेतुगुणाभाव
त्वमेवदोषत्वमित्युक्तं प्राकाशादौतुविनिगमकाभावादर्थसावबो
धजनकत्वंगुणत्वंतत्प्रतिबंधकत्वंचदोषत्वमित्युक्तं चाद्रसालंका
रयोःसमुच्चयइतिकश्चित् वस्तुतस्त्वाभिप एवसमुच्चायकोनरसा
देस्तथाचशब्दार्थगतत्वेनदोषद्वैविध्यंअतएवलक्षणसंगतिर
पीतिबोध्यं १८ तद्भेदानाहभवेदित्यादिनातत्रादौवर्णदोषंश्रुतिक
टुत्वमाह श्रुतीतिश्रुतिकटुत्वंकठिनवर्णत्वंतच्चश्रोत्रखेदहेतुमत्वं

चं.प्रा.
१५

शाब्दच्युतत्वमर्थधीसाकदुःखविशेषजनकशाब्दत्वमिति यावत् य
थाद्वैव श्रुतीत्यादिपदमिति भावः अपवक्तव्यपदेषेवादौ च्युत॥
संस्कृतित्वमाह संविदिति यत् व्याकरणविरुद्धं तच्च्युतसंस्कृतमिति संवि

भवेच्छ्रुतिकटुर्वर्णैः श्रावणोद्वेजने पटुः॥ संविद्भूते व्या
करणविरुद्धं च्युतसंस्कृति १८ अप्रयुक्तं दैवतादौ शब्दे
पुल्लिंगतादिकं असमर्थं न्तु हन्त्यादेः प्रयोगो गमनादिषु १९

द्भूते जानंति यथा ज्ञैव संविद्भूत इति अत्र संपूर्वत्वेपि समो गमृच्छी॥
त्यकर्मकादेवात्मनेपदविधेः प्रकृते सकर्मकत्वात्तदसाध्वित्यर्थः
१८ अप्रयुक्तत्वमाह अप्रेति आम्नातमपि कव्यनादृतमप्रयुक्तं
यथा दैवतानि पुंसि वेति कोशसत्वेपि तत्तात्तत्र पुल्लिंगं असमर्थी वि
लंव हेतुत्वेनास्य दूषकत्वं असमर्थत्वमाह असेति तात्पर्यविषयी

॥०॥ १९ न्तार्थप्रतीत्यजनकत्वसमर्थत्वं

राम
१५

एतल्लक्ष्यमाह स हंतीति कुटिलकुंतलः स कांतः कांतारे गहनवने
हंति गच्छतीत्यर्थः हन हिंसागत्योरिति सत्वेपि यद्यप्याद्येतच्छ
क्तिनियमात्तद्भावेनासमर्थत्वमितिभावः निहतार्थत्वमाह नि
हतेतिप्रसिद्धार्थेनाप्रसिद्धार्थविरोधानकत्वं निहतार्थत्वं यथा रागे

सहंति हंत कांतारे कांतः कुटिलकुंतलः निहतार्थलोहिता
दौ शोणितादिप्रयोगतः २ अनवकृतचितार्थे यत्पदमाह
स्तदेव नतत् इयमद्भुतधारवाग्रे केलिकौतुकवानसी २१॥

लोहितमितिवाच्ये शोणितमित्युक्तात्रस्थिरेण प्रसिद्धार्थेनाप्रसिद्धा
र्थस्यपरागस्यनिहननिर्विरलप्रयोगात् विलंबेन प्रकृतार्थोपस्थापकत्व
मस्य दूषकतावीजं अत एव नासमर्थसंकरः तत्रापीनुपस्थितेरेव
दूषकतावीजत्वात् एतेनानयोर्भेदकहस्त्यपास्तं प्रायशःप्रयुक्तिकृतो

चं. १६

व्यनक्ति बोधयतीति तत् पदं तदेवानुचितार्थकमेवेत्यालंकारिका आहुः
वर्णनीयवैरूप्यबोधकत्वमनुचितार्थकत्वमुदाहरन्ति इयमिति इयं
कामिनी अद्भुतरसस्य शाखिनोग्रे क्रीडाकौतुकं यस्याः सा तत्कैवी
त्ति यावत् तादृशी वा नारीत्यर्थः शाखाग्रेति पाठे अद्भुतरसरूपा
याश्शाखा अर्थाद्रसरूहरूपवृक्षस्येत्यर्थः अग्रे भागवत् अत्र वानारी
ति रूपकवशात्तस्या वैरूप्यबोधकं २१ निरर्थकत्वमाह निरेति पादपूर

निरर्थकं तु हीत्यादि पूरणैकप्रयोजनं अर्थे विदध्य
दित्यादौ दध्यादावमवाचकम् २२ ॥ ५ ॥ ५ ॥

णमात्रफलकत्वं निरर्थकत्वं मात्रार्थकैकपदेन द्योतकेनाप्तिव्या
प्तिः तु हीत्यादि लक्ष्यं अवाचकत्वमाह अर्थ इति पदुपसर्गसंसर्गा
दिनायो धात्वर्थ दर्थवाचकः तस्मिन् तस्यार्थं विनैव प्रयुक्तत्वमवाच
कत्वं तात्पर्यापि धीसहकारित्यागादौ तत् प्रकारकधीजनकत्वं वस्ता
यत्र न संभवति तत्त्वं इति यावत् विदध्यादित्यादावर्थे दध्यादित्यादौ यत्पदं प्रयुक्तं तदवाचकमिति तस्माद्योऽर्थः २२ ॥

उदाहरति धत्त इति भास्वान्सूर्यस्तरुणैर्देदीप्यमानैः करैः किरणै
र्नभस्तलं व्योमारुणं धत्ते करोतीत्यर्थः तथा च करोतीत्यर्थे धत्ते
इत्यवाचकं आदिसंग्राह्यं धत्ते इत्याद्यर्थे विधे इत्यादि ननु भ्वादेरेका
दशस्य तलादिपदसंसर्गेण गृहीतशक्तिकत्वात् केवलस्यावाचकत्वस्या

धत्ते नभस्तलं भास्वानरुणं तरुणैः करैः एकाद
रं विनाप्यसमर्थत्वादिकं खतलादिवत् २२ ॥०॥

दत आह एकादरमिति इदमुपलक्षणं एतद्भिन्नत्वे सतीत्यर्थः ।
तथा च सहकारित्यागे स्वार्थबोधकत्वमवाचकत्वं यथा
नभआदिषु तलयुगादिपदरूपसहकारित्यागेपि खतलादाविव
स्वार्थबोधकत्वाभावान्नातिप्रसंग इति कश्चित् प्रयोग इत्यग्रेऽर्ध
पाठमभिप्रेत्यैकादरे षु सवर्णितरयोः क्वचिदेवसुंदर इत्यादि एका

त्तरमितिभ्रन्तलभ्रूलतान्मात्तलमित्यादिकं विनाखत्तलमित्यादिव
त् भ्रूलतेत्यादिनशोभनमित्यर्थस्यापरः अपपादइतित् अन्यः घ
स्तुतोऽप्यधिकेवाच्येतस्तनप्रयोगस्यावाचकत्वमेवपरीत्येणाप्यवाचक
त्वमितितनभस्तिनभस्तलस्याप्यवाचकत्वमुक्तमित्यन्यत्रातिप्रसंगशा
न्तावाहेकेति एकात्तरंम्भादिकंविनाखललादिवन्नस्तलादेरप्यवाच
कत्वमित्यर्थइतिवोध्यमितिममप्रतिभातिअप्रयुक्तनिहतार्थावाच
कानांअसमर्थेएवांतर्भावसंभवेप्यालंकारिकसंप्रदायमात्रेणभे
दोक्तिरितितुप्रकाशादयः २३ अश्लीलत्वंसत्रेविध्यमाह अश्लील

अश्लीलंत्रिविधंव्रीडाजुगुप्सामंगलात्मना आह्ला
दसाधनंवायुःकांतानाशोभवेत्कथं २५ ॥०॥

त्वंसत्रेविध्यमाह अश्लीलमिति व्रीडेति व्रीडादिजनकतयेत्यर्थः व्रीडा
द्यन्यतमफलकःकांतिविरहोश्लीलत्वंविरुद्धमतिकृतिशक्त्याऽत्र तु
व्यंजनयेतिभेदः उदाहरति आह्लादेतिकांतावियोगेपवनआनंदहे

तः कथंस्यादित्यर्थः साधनवायुना प्राप्तदानां पुल्लिंगापानवायुप्र
तिबोधकतया व्रीडादिजनकता अयमनित्यदोषः तेन हास्यशोके
चगुणत्वं २४ संदिग्धत्वमाह स्यादिति द्वित्वमुपलक्षणं तेनानेकार्थ
बोधकत्वं संदिग्धत्वं अर्थपदस्वरूपसंदेहजनकत्वमिति यावत् उदा
हरति नयामि तिनदीदेशो गच्छति स्वर्गं न गच्छती त्यस्यार्थद्वयस्यबोधा

स्यात् अर्थमिह संदिग्धं न यांयां तिपतत्रिणः स्याद
प्रतीतं शास्त्रैकगम्यं वीतानुमादिवत् २५ ॥ ८ ॥

र्थसंदेहः द्वितीयान्तत्वसप्तम्यन्तत्वसंदेहेन द्विवर्णत्वैकवर्णसंदेहे
नच पदस्वरूपसंदेह इति भावः अप्रतीतत्वमाह स्यादिति कोशा
घप्रसिद्धत्वे सति शास्त्रप्रसिद्धत्वमित्यर्थः उदाहरति वीतेति क
मिथ्यान्वयः अनुमा अनुमानं तत्त्वविजातीयं वीतपदवाच्यं इदं च

कारणलिंगकानुमाने प्रसिद्धं न्यायशास्त्रे इति केचित् वस्तुतोऽन्व
यमुखेन प्रवर्त्तमानं विधायकं वीतं तच्च द्विविधं दृष्टस्वलक्षणसा
मान्यविषयमदृष्टस्वलक्षणसामान्यविषयं च यत्सामान्यविषयो
ऽनुमेयस्तद्विशेषस्वरूपस्य दृष्टत्वेन दृष्टत्वं चेत्यर्थः तत्राद्यं पू
र्ववत् द्वितीयं सामान्यतो दृष्टं इदं च न्यायवार्त्तिकतात्पर्यटीकायां
सांख्यतत्त्वकौमुद्यादौ च स्पष्टमिति बोध्यं आदिना आप्तशब्द
स्य मिथ्याज्ञानजन्यवासनाघातकसयोगशास्त्रप्रसिद्धस्य परिग्र
हः २५ उदाहरणेनैव शिथिलं प्रपयति शिथिलमिति एवंविधा

शिथिलं श्रायने लिल्ये मच्चित्तं ते प्राशिथिन्निपि म
त्तपिष्टकटीलोष्टगल्लादि ग्राम्यमुच्यते २६ ॥

नां शिथिलत्वे श्रवणमेव प्रमाणं तस्याच विलक्षणरचनकत्व
मेव शिथिलत्वं प्राशिथिन्निपीति सम्प्रत्तं तं प्रापन विशेषणं तस्या

चशापि त्रिपितत्सदृशोते प्रायनेमच्चित्तं लिल्पेलीनमित्यर्थः इदंप्र
काशादेनोक्तं ग्राम्यमपितत्पैवाहमस्मीति बालिकाद्यविदग्धमात्र
चमत्कारजनकत्वं ग्राम्यत्वमस्मादयः शब्दाः क्रमेणान्मत्तचूर्णान्न
निर्तवमत्पिंडकपोलेषु ग्राम्यः अयमप्यनित्यदोषः तेन विदूष
कादौ वक्तरि न दोषत्वं हास्ये च गुणत्वं २८ नेयार्थत्वमाह नेयार्थ
मिति लक्षणाया अत्यंतप्रसरादमनोहरं तन्नेयार्थं अमनो

नेयार्थलक्षणाऽत्यंतप्रसरादमनोहरा हिमां
शोर्हीरधिक्कारजागरे यामिकाः कराः २७॥०॥

हरेति पाठे लक्षणेति प्रथमांतं एकपदं अत्यंतप्रसरादमनो
हरा लक्षणा यत्र तन्नेयार्थमित्यर्थः लक्षणाया अत्यंतप्रसरश्च
परंपरितत्वं निषिद्धत्वं च रूढिप्रयोजनयोरन्यालक्षणा निषिद्धाद्वि

चंद्रा॰ १९

विधमपि उदाहरति हिमांशोरिति हिमांशोः कराः किरणाः कामि
नीहारशोभाधिक्कारभीतचंद्रमसो जागरे यामिका इत्यर्थः अत्र
हारधिक्कारादिपदं अमनोहरत्वेलक्षणया प्रयुक्तं न त्वपरं पदास्फु
टैव न चात्र रूढिफलेलः मुख्यार्थभिन्नार्थप्रतीतेः तत्प्रभावेनार्था
नुपस्थितिर्दूषकताबीजं २६ क्लिष्टत्वमाह क्लिष्टमिति यस्याऽर्थ
पदं पदार्थस्वल्पतात्पर्यविषयार्थप्रत्यायकत्वं क्लिष्टत्वं पदीयोऽर्थः अ

क्लिष्टमर्थापदीयोर्थश्रेणीनिःश्रेणीमृच्छति हरि
प्रियापितृवधूप्रवाहप्रतिमं वचः २८ ॥७॥७॥

र्थश्रेणीनिःश्रेणीं गच्छतीति वाच्योऽर्थः उदाहरति हरीति हरिप्रिया
याः लक्ष्म्याः पिता सिंधुः तस्य वधूः गंगा तत्प्रवाहसदृशं तेन वच इत्यर्थः
अत्र गंगाप्रवाहप्रतिमितिवाच्ये हरिप्रियेत्याद्युक्तेः त्वं अपंचसमा
सस्य पदनयानतदात्मकपददोषः २८ अविमृष्टविधेयांशत्वमाह

राम १९

अविमृष्टेति विधौ विधेये समासेन पिहिते आछादिते इतर विशे
षणत्वेन निर्दिष्टे इति यावत् तथा चेतर विशेषणत्वेन निर्दिष्ट विधे
कत्वम् विमृष्ट विधेयांशत्वं वाच्यं उदाहरन्ति विशंतीति अत्र विशि
खवद्विशतीति विधेयं तच्च समासेन पिहितं तत्स्य कटाक्ष विशेषण

अविमृष्टविधेयांशः समासपिहिते विधौ विशंति
विशिखप्रायं कटाक्षाः कामिनो हृदि २९ ॥०॥

त्वेन निर्देशात्साक्षात्क्रियान्वयाभावेन विधेयत्वासंभवात् विशिख
कटाक्षयोः हास्यमात्रं तु ततः प्रतीयते विशिखप्रायमिति पाठे तु न
दोषः अयमपि समासगतपददोष एव २९ विरुद्धमतिकृत्वमाह
अपरेति वर्णिना विषयापि विरुद्धार्थप्रतीतिजनकत्वं विरुद्धमति
कृत्वं अपराधीन इत्यादी तदुदाहरणं न समासेन तद्विषयपरा

तस्या

चंद्रा॰ २॰ धीनत्वाभावबोधकत्वेनाभिमतस्य पँरस्याधीनोऽपराधीन इति षष्ठीसमासेनतत् विरुद्धपराधीनत्वरूपार्थबोधकत्वात् संदिग्ध स्यतन विरुद्धार्थबोधकत्वमितिततोभेदः अन्यसंगतत्वमाहा न्येति अन्यविशेषणतयातात्पर्यविषयस्यान्यविशेषणत्वम त्यापकत्वमन्यसंगतत्वं उत्तुंगेत्याद्युदाहरणंपयोधरविशेष

अपराधीन इत्यादि विरुद्धमतिकृन्मतं अन्यसं
गतमुत्तुंगहारशोभिपयोधरा ३॰ ॥५॥५॥

णतयातात्पर्यविषयस्योत्तुंगत्वस्य हारविशेषणत्वमत्यापकत्वा त्समाससंदेहनबोधविवस्यात्र दूषकतावीजत्वंअतएवक्लिष्टत्या दिदोषचतुष्टयंसमासनिष्टमेवोक्तं इदमविमृष्टविधेयत्वांतर्गतमि तिप्रकाशादिः ३॰ पददोषानुक्त्वाक्रमप्राप्तवक्तव्यवाक्यदोषप्र गाम॰ २॰

तिकूलाक्षरत्वमाह रसाद्येति शृंगारादरसोचिताः कोमलवर्णा वीररसोचि
ताः कठिनाः तद्विपरीतास्त्वनुचिताः तथाच तादृशवर्णकवाक्यत्वं प्रतिकू
लाक्षरत्वं तत्र वीररसानुचितकोमलवर्णकवाक्यमुदाहरति नमामिति
शावर्णस्यागदं प्रत्युक्तिः कर्कशामिति पाठे तु न दोषः ३१ उपहतविसर्गत्वं
लुप्तविसर्गत्वं चाह यस्मिन्निति यस्मिन्वाक्ये विसर्गः उपहतः उत्वं प्राप्तः

रसाद्यनुचिते वर्णे प्रतिकूलाक्षरं विदुः नमामंगदज्ञानासिरा
वर्णं रणदारुणम् ३१ यस्मिन्नुपहतो लुप्तो विसर्गश्च हतं तथा
क्रुसंधिपटवागश्च विसंधिन्यपतीदृशो ३२ ॥ ६ ॥ ६ ॥

लुप्तश्चेतत्द्वयं दोषप्रकरणे तथा उपहतविसर्गं लुप्तविसर्गं चेत्यर्थः इद
मेवानयोर्लक्ष्यं तत्रोपहतो लुप्तो विदृत्वाद्योदाहरणं विसर्गश्चेत्यस्योदाहरणं
एतेषां क्रमेणावगुम्फः सत्वे तु रचनादृत्स्य तदुष्टेति बोध्यं अत्राकारप्रश्लेषा

दिनाऽन्यार्थस्यापकत्वं दूषकतावीजम् कुसंधित्वविसंधित्वे आह कुसंधीति
संधावश्लीलत्वक्लिष्टत्वं च कुसंधित्वं तत्राद्योदाहरणं पटेति पटोऽऽगच्छेत्य
त्र संधावश्लीलता वटवेति पाठेप्येवम् द्वितीयोदाहरणं तु उर्व्यसावत्र तर्वा
ली मर्वन्ते चार्ववस्थितिः नात्रर्जुप्रत्यते गंतु क्लिशेन मयत्नेन नागित्यादिवो
ध्यम् संध्यभावो विसंधित्वम् स च द्वेधा शास्त्रीयपरो द्विकश्च तत्राद्योदाहरणम्
न्दपत्नी इमा विति अत्र प्रगृह्यत्वप्रयुक्तप्रकृतिभावः द्वितीयस्तु हे रोहिणि त्व
मसि शीलमती श्रुधन्यागएन मित्यादौ असंबंधवैरस्याधायकत्वेन दूषकत्वं तद
भावे तु न दोषः अत्रान्त्यः सकृदपि दोषः आद्यस्तु सकृदेवेति कश्चित् अन्यतुल्य

हतवृत्तमनुक्तोपि छन्दोदोष अकाण्डिचेत् विशाललोचनपश्यपावरं तारानरंगीतम् ३३

त्वमाद्यस्येत्यपरे ३३ हतवृत्तत्वमाह हतवृत्तमिति शास्त्रीयदोषाभावेपि अश्र
व्यतयाप्रतिभासादश्रव्यं छन्दोवत्वं हतत्वं उदाहरति विशालेति तरानरंगितं तद्यु
क्तं अत्र छन्दोलक्षणसत्वेन तदविरुद्धत्वेपि पश्यपावरमित्यत्र सर्वस्वदेउतरस्वरस्य
गरुत्वात्तत्र काचिदश्रव्यता भवति ३३॥

न्यूनत्वमाह न्यूनमिति अपेक्षिताकथनकत्वं न्यूनत्वं उदाहरणं त्वत्त्वङ्कृ
ति अत्र यशाः पुष्परूपत्वेनोक्तेः त्वक्स्यलतारूपत्वकथनमपेक्षितं तन्न कृतमि
ति न्यूनता नभस्तटं त्वत्त्वक्संभृतयशाः पुष्पं भवतीत्यर्थः अधिकत्वमाह अ
धिकमिति अनपेक्षितकथनकत्वं अधिकत्वम् उदाहरणं भवत इति
अत्रासिफणीत्येव सिद्धे लतेत्यनपेक्षितं ३४ कथितत्वमाह कथितमिति य

न्यूनं त्वत्त्वक्संभृतयशाः पुष्पं नभस्तटं अधिकं भवतः शात्रू
न्दशात्यसिलताफणी ३४ कथितं पुनरुक्तावाक्यं श्याम अज
श्यामलोचना विकृतं दूरविकृत्ते मैयरुः कुंजराः पुरं ३५ ॥०॥

त्रवाक्ये न दितिशेषः तथाच पुनरुक्तवाक्यत्वं कथितत्वं उदाहरणं श्या
मेति श्यामांबुजवत् श्यामे लोचने यस्या इत्यर्थः अत्र श्याम पदं पुनरु
क्तं विकृतत्वमाह विकृतमिति दूरविकृत्ते महतो धातुप्रत्ययादि विका

यान् हेतोः तस्याचतदुत्पन्नप्राधकत्वं विकृतत्वम् उदाहरणमेयरुदि-
ति अत्रजौ होल्यादिकाहगता वित्यस्मात् लङि आडागमे ऐलोप्राप्ः ऐलो
द्वित्वे उरदत्वे हलादिःशेषेऽर्तिपिपर्त्योश्चेत्यभ्यासेत्वेऽभ्यासस्येतीयङि
सिजभ्यस्तेजु सिजु सिचेतिगुणे आटश्चेतिवृद्धौचैयरुदिति रूपंतस्य
प्रापुरित्यर्थः द्वागथ्याप्रत्यायकतयाऽस्यदूषकत्वं ३५ पतत्प्रकर्षत्वमा
ह पदिति आरंभेऽगीकृतस्यानुप्रासस्ययमकस्यवाग्रेत्यागोयत्रवाक्ये

पतत्प्रकर्षंहीनानुप्रासादित्वेयथोत्तरं भीरारंभदंभो
लिपाणिरेषसमागतः ३६ समाप्तपुनरात्तंस्यादेषपीय
षभाजनं नेत्रानंदीतथारांश्रुरुदेत्यंबुधिवांधवः ३७॥

तत्वंपतत्प्रकर्षत्वं यथोत्तरमितिवीप्सायामव्ययीभावः उत्तरत्रोत्तरत्रही
नी अनुप्रासादयोंऽगीकृतावत्रतत्वेसतितत्पतत्प्रकर्षः उदाहरतिगंभी
रेति एषःगंभीरस्साप्रायआरंभउपक्रमोयस्यहृश्रोवज्रहस्त इंद्रःसमागत

इत्यर्थः अत्रपाणिरित्यादिनाऽनुक्रांतभकारानु
प्रासत्यागः ३६ समाप्तपुनरात्तत्वमाह समाप्तेति स

माप्ते अन्वये विशेषणानाधायकविशेषणअवर्णकत्वं तत्त्वं तदनुरोधे
न विशेष्यानुषंगेण क्रियाध्याहारेण वाक्यार्थानन्तरभत्यापकत्वमस्य
दूषकताबीजं उदाहरन्ति एष इति अत्रोदेतीत्यनेन वाक्यार्थसमाप्तेरेव बु
ध्दिबाधव इत्यस्य विशेषणानाधायकस्योपादानेन तत्त्वं तस्य तदाधायकत्वे
तु न दोष इत्यन्यत्र स्पष्टं ३७ अर्थान्तरपदापेक्षित्वमाह अर्थान्तरेति अ
न्यार्थयत्नैकपदघटितान्यार्थवाक्यकत्वम न्यार्थघटकपदार्थधीहेतु

अर्थान्तरपदापेक्षि क्रीडानन्त्येषु सस्मितं मोचारंभल्लमःशंभुमऽर्द्धरंभो
रुविग्रहं ३८॥

कान्याद्वाक्यार्थबोधकत्वमिति यावत् तत्त्वं अर्थान्तरपदापेक्षित्वं अत्र
चरणे इत्यपि बोध्यं अस्य कविसंप्रदायसिद्धत्वे तस्याधापकत्वेन दूषक
ता अत एव द्वित्रिपदपातेन दोषः तथैव संप्रदायात् उदाहरणम् क्रीडे

ति अर्थः रंभोर्वाः पार्वत्या विग्रहः शरीरं यस्य तमर्द्धनारीश्वरं शिवं व
यं स्तुमः कीदृशं उक्तशिवस्य यदर्द्धांतरं स्वभागापेक्षया गौरीभागस्त
त्यदापेक्षीणि तच्चरणापेक्षिणी या निक्रीडायां तत्र यावान् तस्यैव नृत्यानि
तेषु यत्नो मेघारंभं निष्फलारंभ अत एव सस्मितं स्वभागस्य नृत्ये प्रवृत्ता
वपि गौरीभागस्य मानादिनाऽप्रवृत्तौ मोघारंभमित्यस्यापेक्षेति तत्त्वमिति
भावः अत्र संपूर्णायद्यमुदाहरणं लक्षणं त्वेकदेशासंत्रेण इति बोध्यं रं
भोरु इत्यस्य रंभाया अप्सरोभ्यः उरुः श्रेष्ठः अप्यौ पार्वतीत्यर्थः यद्वा गौ
पम्या विवक्षया यथाऽऽकृतमेव साधुः यद्वा अर्द्धः रंभोरुस्तरेव विग्रहो यस्येत्य
र्थः ३८ अभवन्मतयोगत्वमाह अभवदिति यद्यभिमतान्वयो न तदा

अभवन्मतयोगः स्यान्न चेदभिमतोऽन्वयः येन वर्ज्योऽवधिर्यस्य राम
स्यानुचराद्यम् ३९

तस्मादित्यर्थः निराकांक्षत्वादिना इष्टतात्पर्यविषयान्वयनिर्वाहासं
भवकत्वमभवन्मतयोगत्वं उदाहरणं येनेति अत्र येनावधिर्वर्ज्योय

स्य चैव यमनु चराश्च तस्य रामस्य तत्त्पदवाच्यस्यान्वयोऽभिमनो न चेदित्य
न्वय इति कश्चित् लक्ष्य लक्षणयोर्भिन्नाव वाप्यौं तत्र लक्षणार्थ उक्तः
येन स्वकः यस्य चरामस्य वयमनुचरा इति साकांक्षत्वोलक्ष्यार्थो वोध्य
इत्यपरे अत्र येनेति रामस्येत्यनेनानन्वितं विभक्तित्वेन निराकांक्ष
त्वात् यस्येत्यनेनान्वितत्वाच्च विशेषणानां मिथोऽनन्वयाच्च लक्षण
तनस्तुन् विभक्तौ व्याप्यासे तु यस्येत्यनेनानन्वयापत्तिः अर्पीत्तरम त्वा
पकत्वमस्य दूषकतावीजं सरावलंकालंकारावर्णं हंतुमयत इति
सएव पुष्पकारूढो भरतं द्रष्टुमिच्छतीति वीजराजैसंनिधौ तु न दोषो
विशेष्ये सर्व विशेषणानामन्वयादिति वोध्यं ३९ अस्यानस्य समास

अस्यानस्य समासन्न विद्वज्जनमनोरमं विद्यां संपदमाच्छि
द्यपः स्मरान्समपरूरयत् ४० ॥

त्वमाह विद्यामिति अत्र लक्षणयोगार्थः स्पष्ट एव न विद्वदित्यस्यो
भयत्रान्वयः तत्र विद्वज्जनमनोरमं नेत्यर्थः यः वुद्धिस्यावर्णनीयो

चं॰
२५

राजा यदिति पाठस्तु चितएव एवंचनदोषः अन्नद्विषामित्यादौ शौर्य
वर्णानेतद्व्यंजकसर्वपदेषु वीररसानुगुणो दीर्घसमासस्तु चितोपिन
कृतः तद्रसानभिव्यंजकत्वं कौनविद्वज्जानेत्यत्र तु कृतः अतोऽस्था
नस्थसमासत्वं इदमुपलक्षणं अस्थानस्थपदत्वस्यापिलक्ष्यमिद
मेव न विद्वदिति नञोऽनेउचितस्यादौ पाठेनाविद्वदित्यपीतरबोध
कतयाऽस्थानस्थत्वात् क्वचित्पूर्वाऊर्जितराजयोर्व्यत्यासपाठः ५० ॥
संकीर्णत्वमाह मिथ इति वाक्यपदैरिति द्वंद्वः अन्यवाक्यमित्यस्या॰

मिथः पृथग्वाक्यपदैः संकीर्णयज्वदेवतत् वक्रेणभ्राजते
रात्रिः कांताचंद्रेणराजते ५१ ॥

व्याहारः पृथक्त्वमुभयविशेषणं तत्र पदे पृथक्त्वमन्यवाक्यगत
त्वं तथा चान्यवाक्यैस्तुगतपदैः अन्यवाक्यं यत् अन्योन्यं संकीर्णं
संबद्धं न तदेव संकीर्णपदवाच्यमेवेत्यर्थः तथा च अन्यवाक्यान्य॰

प्रवेशाकत्वंसंकीर्णत्वं तच्च अन्यभेदेन द्विविधं पदसंकीर्णत्वंवाक्यसंकीर्णत्वंचवाक्यांतरपदानांवाक्यांतरानुप्रवेशोऽऽद्यं अन्यवाक्यस्यतत्प्रवेशोंत्य आद्योदाहरणं वक्त्रेणेति अत्रकांतान्वितवक्त्रस्यराज्यान्वितचंद्रस्यचवावाचकयोरन्यवाक्येपाठः ५१ द्वितीयोदाहरणं ब्रह्मांडमिति अत्रहेभूमिभूषणत्वमाकर्णयेति वाक्यस्यब्रह्मांडमित्यादिप्रुतेद्वत्यंतवाक्यांतःपाठः ५२

ब्रह्मांडत्वद्यशःसरगर्भितंभूमिभूषण आकर्णयपयःफेनीस्तवर्णकलशायते ५२ भग्नप्रक्रममारब्धप्राद्धनिर्वाहहीनता अक्रमःकृष्णरज्यंतेत्वामनभ्यर्च्यदेवताः ५३ ॥ ७ ॥ ८ ॥ ९ ॥

भग्नप्रक्रमत्वमाह भग्नेति आरब्धधात्वाद्यनिर्वाहकत्वं भग्नप्रक्रमत्वं आक्रोदितप्रकारकापीनुक्तिकशाब्दकत्वमितियावत् उदाहरति अक्रमइति हेकृष्णत्वामनाराध्यादेवताःरज्यंत इतियत्स्तअक्रमःअनुचित

मित्यर्थः क्वचिदनभ्यर्च्येति पाठः अत्र पूज्यंते ऽनाराध्येति धातुभेदेन क्र।
मभंगः तथाहि तत्र तावत् अनाराध्येतिवाक्यं साकांक्षमिति स्पष्टमेव।
द्वितीयेपि तत्रोचितापि देवतांतरपूजाऽनुचितत्वेनोच्यमानाऽन्यक्रियाभा
वापेक्षयातत्त्वेन भासते इति साउपस्थापिता साचाकांक्षा पूर्वोक्तशाब्दबोध्य
कृष्णपूजनाभावमेव विषयीकरोति साचानाराध्येति धातुनातेन प्रकारे
णाननिर्दिष्टपत्ते शाब्दस्यापि प्रकारत्वस्य नसोस्तिप्रत्यय इत्यादिना हरिणा
प्रतिपादितत्वात् असंपूज्येति पाठे तु न दोषः प्रकाशोक्तं अक्रमस्यानस्य
यदन्वयान्तर्गतमितिपद्यप्पङ्कोक्तं एवं प्रसिद्धिहननत्वमपितदुक्तमप्रयुक्तत्वांत
र्गतं बोध्यं यद्वा अक्रमोप्यत्रैवलक्षितः स्तंत्रेण शास्त्राद्युक्तक्रमाभावकत्वं अ
क्रमत्वं लक्ष्यमिदमेव त्वामनाराध्य देवताः पूज्यंत इति शास्त्रीयक्रमाकरणा
त् ॥८३॥ अमतार्थांतरत्वमाह अमनेति सुरखेऽर्थेन नञो विरोधार्थकत्वा
त् तद्विरुद्धेन अर्थेन रसांतरेण तदुद्दीपनविभावानुभावव्यभिचारिभा
वादिरूपेणवा बोध्येन यत् विरोधकृत् प्रकृतरसविरुद्धरसव्यंजकत्व

मव्यभिव्याहारादिति यावत् ईदृशोपतत्त्वममतार्पितत्वं मुख्यार्पितेतिपा
ठेतप्रतीयमानमर्पितत्वं मुख्येन चार्थेन विरुद्धं यत्तत्त्वं तदित्यर्थः उदा
हरति त्यक्तेति उरस्त्यक्तहारं कृत्वा शोकेनांगना आलिंगितेत्यर्थः आ
त्र नायकेनेत्यर्थकेनाशोकेनेति छेदेन प्रकृतकरुणरसविरोधिश्रृंगा

अमतार्पितं मुख्यः मुख्येनार्थविरोधकृत् त्यक्तहारमुरः कृत्वा
शोकेनालिंगितांगना ५५ अपुष्टार्थो विशेष्ये चेत्र विशेषो
विशेषणात् विशंति हृदयं कांताकटाक्षाः खंजनत्विषः ५५

रव्यंजकमंगनालिंगनं व्यभिचारिणां स्यात् तत्र्येणोक्तावेवायं दोषः रस
व्यंजनायोक्तौ तु न दोषः इदं च ग्राह्यधीहेत्विच्छाप्रतिबंधदायादसधीप्र
तिबंधकः अशोकेनेत्यस्य व्वेण त्यर्थ इति केचित् ५५ अपवाद्येषु पदे
षेषु पुष्टत्वमाह अपुष्टेति विशेष्योत्कर्षानाधायकविशेषणकत्वमपुष्ट ।

चं.
२६

कष्टत्वमाह कष्ट इति वाचि वचनेऽसन्निभः नसम्यक्प्रीप्र
तिभाति भासते तादृशोऽसत्कल्पो योऽर्थः स्पष्टावबोधार्थमक्षमोपन्न
सन्नप्यर्थः स्पष्टव्यक्त्यभावे नासन्निव भवति यत्रेत्यर्थः तत्त्वं कष्टत्वं।\
ऽसत्यादिसत्वेपिकारणं तत्तो विलंबबोध्यमिति यावत्. वाच्यसन्नि

कष्टः स्पष्टावबोधार्थमक्षमो वाच्यसन्निभः व्याहतत्वं विरोधः
स्यान्निषः पूर्वापरार्थयोः ४६ सहस्रपत्रमित्रं तेवक्रं केनोप
मीयते कृतस्तत्रोपमायस्य पुनरुक्तः सुधाकरः ४७ ॥ ॥

भ इत्येव लक्ष्यं अत्र वाच्यसदृशा इति ज्ञाक् प्रतीतेर्महतोक्त प्रयासेनो
क्तार्थबोधे विलंबः व्याहतत्वमाह व्याहत इति पूर्वापिस्यस्तुतिनिंदान्य
तररूपस्य परार्धेन तादृशेन सह विरुद्धत्वं व्याहतत्वं स्तुत्यता प्रयोजक
रूपेण निंदायां निंद्यता प्रयोजकरूपेण वा स्तुतौ व्याहतिरिति भावः ४६
उदाहरति सहस्रेति अत्र कमलमित्रेत्त उपमाप्राप्तौ वेत्ति केनोपमीयत
इति निषेधोऽनुपपन्न इति कष्टित्वं वस्तुतस्तु कमलसादृश्येन स्तुत्यस्य

राम
२६

मुखस्योपमानाभावप्रदर्शनेकमलसादृश्यमेवमित्रातात्तत्पंप्रतीयतइति
विरोधः द्वितीयोदाहरणंतुगोस्तनीमधुपीयूषमस्तुलोकमनोमुदेमद॥
नोन्मत्तचार्वंगीवचोमधुमुदेममेतिबोध्यं अत्रमधुत्वेनैवनिंदास्तुतिश्च
पुनरुक्तत्वमाह कृत इति पुनरुक्त इत्यस्यावृत्तिर्वक्रोक्तिकेनोपेत्यस्यानुषंगः।
तथाचयस्यमुखस्यसुधाकरश्चंद्रः पुनरुक्तोव्यर्थस्तत्रोपमाकृतः अपमर्थः
केनोपमीयत इत्यनेनपुनरुक्त इतिभावः यद्वाऽनुषंगंविनैवकृत इत्यनेनैवतत्
न्निषेधेचंद्रवैयर्थ्यं अपिसिद्धमपि आवृत्त्याश्लोकनिबद्धमितिपुनरुक्तिः अ
यंभीतादौगुण इत्यनित्यदोषः ५७ दुष्क्रमेतिबोध्या इतिशेषः अनुचितक्रमे

दुष्क्रमग्राम्यसंदिग्धास्त्रयोदोषाःक्रमादमी त्वद्भक्तःकृष्णगच्छेयं
नरकंस्वर्गमेववा ५८॥

णाभिधानविषयत्वंदुष्क्रमत्वंवैदग्धीराहित्येनोच्यमानार्थत्वंग्राम्यत्वंवक्तृ
तात्पर्यविषयार्थनिश्चयेप्रमाणांतरापेक्षत्वंसंदिग्धत्वंक्रमेणत्रयाणांत्री।
ण्युदाहरति त्वदित्यादि अत्रस्वर्गंनरकमेववेतियुक्तंभक्तिफलस्यस्वर्गि

स्य साङ्गनिर्दिष्टपाहत्वात् नरकमित्यस्यादावुक्तत्वात्तु

दोषः हेकृष्णत्वद्भक्तोहमित्यादिवीक्ष्यपि: ५८॥

चं॰
२८

एकमिति ग्राम्योक्तिः अत्र चुंबनादिपदानामग्राम्यत्वेपि अर्थस्याश्लीलत्वेन तत्त्वं ज्ञातेति कान्ताप्रियवयोर्मध्ये किं सेव्यतामिति प्रश्नं कल्पयति प्रकरणाद्यभावे शांतशृंगारान्यतरसंदेहात्तात्पर्यविषयनिश्चयप्रमाणान्तरापेक्षा ४८ अनौचित्यमाह अनौचित्यमिति अयोग्यसंबंधक

एकं मे चुंबनं देहि तव दास्यामि कंचुकं ज्ञात किं सेव्यतां चंद्रमु
खीचंद्रकिरीटयोः ४८ अनौचित्यं कीर्तिलतां तरंगयति यः
सदा प्रसिद्ध्याविद्ययावापि विरुद्धं द्विविधं मतं ५।११०

त्वेन तत्त्वं उदाहरणं कीर्तीति अत्र लतायास्तरंगसंबंधायोग्यत्वात् तत्त्वं पल्लवयतीति तु चितं विरुद्धत्वमाह प्रसिद्धेति कविप्रसिद्धेत्यर्थः तेनान्यप्रसिद्धि विरुद्धस्य न दोषत्वं विद्ययेति शास्त्रेणेत्यर्थः विरुद्धमित्यस्यावृत्तिर्वोध्या प्रसिद्ध्यादि विरुद्धं यत्तत् विरुद्धं तत्त्वातन एव द्विविधं मतमित्यर्थः ५ आद्यमुदाहरति न्यस्तेयमिति कामप्रतापस्येत काम

रेवेयंन्यस्तेति त्वंपक्षेपत्यर्थः पूर्णचंद्रोदयवर्णनमिदं अत्रप्रतापस्यध
वलद्युतिः कविप्रसिद्धिविरुद्धानस्याऽऽरक्तत्वेनवर्णनात् अतएवप्र
तापद्युत्यंशेलोकप्रसिद्धिविरोधेपिनदोषः कविप्रसिद्धिसत्वात् द्वि
तीयमुदाहरति केतकीतिशंभोः शेखरेमुकुटेन्यस्ताकेतकीचंद्रक॥
लासाम्यंधत्ते इत्यर्थः केतकीपूजाचशंभोःपुराणादिविरुद्धेतिभावः
प्राप्ताःसकलकामदुघास्ततः किमित्यादौप्रकाशाद्युक्तोवरुणशः प्रतिपा
द्यार्थस्यैकोन्माकपनरूपनवीकृतत्वदोषस्तुकल्पितपदांतर्गतइतिप्रप
ञ्चोक्तः ५१ सामान्यपरिवृत्तित्वमाह सामान्येति अपेक्षितार्थसमर्पक

न्यस्तेयंपक्षपकंदर्पप्रतापधवलद्युतिः केतिकीशेखरेशंभो
र्धत्तेचंद्रकलातुलां ५१ सामान्यपरिवृत्तिःस्यात्कुंडलद्व
विविग्रहः विशेषपरिवृत्तिःस्याद्वनितामम चेतसि ५२
सामान्यरूपोक्तित्यागेनानपेक्षितविशेषोपादानकत्वंसामान्यपरि

वृत्तित्वं लक्षमाह कुंडलेति ममचेतसीत्यस्यानुषंगः स्यादित्तिपूर्वोक्तया॥
न्वयीएवमग्रेपि अत्रविग्रहेकनककांतेर्विवक्षणेनापेक्षितकनकसामा
न्यत्यागेनविशेषकुंडलोक्तिः विशेषपरिवृत्तित्वमाह विशेषेति अपेक्षि
तविशेषत्यागेनानपेक्षितसामान्याभिधानकत्वं विशेषपरिवृत्तित्वंलक्षमा
ह वनतेति अत्रवनितात्वेनसर्वासामिच्छाविषयत्वासंभवाद्वल्लभात्वादि
रूपेणापेक्षितं विशेषत्यागेनसामान्यवनितोक्तिः ५२ सहचराचारुत्वविरु
द्धान्योन्यसंगतित्वेआह वोस्त इतितत्पेतिकश्चित्पाठः सहचराचारुश्चविरु

वोस्तः सहचराचारुविरुद्धान्योन्यसंगती ध्वांक्षाः संतश्चतनयं
स्वंपरंवानजानते ५३॥

द्धान्योन्यसंगतिश्चतो द्वौदोषौस्त इत्यर्थः सहचरेतिभावप्रधानोनिर्देशः॥
अचारुसाहचर्यमित्यर्थः राजदंतादि तच्च स्वरूपमानेनोत्कृष्टेः सहनिकृष्ट
स्यनियमानेनिकृष्टेः सहोत्कृष्टस्यचैकक्रियान्वयरूपं इतिद्विविधं उभयं उदा
हरति ध्वांक्षाइति काकाः संतश्चस्वपरेषुभेदहष्टिशून्याइत्यर्थः अत्रउभयो
रपि: साहचर्यं नतम्य मितिभेदद्वयमप्यत्रैव ५३॥

द्वितीयमुदाहरति सरोजेति हे सरोजनेत्र पुत्रस्य मुखं दृष्ट्वेत्याद्यर्थः ॥
असौ पुत्रो नरेंद्रस्य गोत्रं कुलं पालयिष्यतीत्यन्वयार्थः अत्र नेत्ररूपकसरो
जस्य रूपे दोषसंगति विरुद्धा तस्य तदसंकाशकत्वात् पुरंदरस्य गोत्र
पालनं च विरुद्धं गोत्रभित्वात् तस्य एवं च पुत्रे पुरंदररूपकं सुतरां वि
रुद्धम् अयमेव प्रकाशेन विरुद्ध इति प्रकाशादावुक्तः विध्ययुक्तत्वा
नुवादायुक्तत्वरूपदोषद्वयं तु अविमृष्टविधेयांशत्वाद्भग्नप्रक्रमत्वाद्वा
न भिन्नं एवमन्येषामपि यथासंभवमुक्तेष्वेवांतर्भावो बोध्यः अश्लीलत्वं

सरोजनेत्रपुत्रस्य मुखं दृष्ट्वावलोकय पालयिष्यति ते गोत्रं
असौ नरपुरंदरः ५४ पदे पदांशे वाक्यांशे वाक्ये वाक्यकद
बके यथा तु सारमभूरहे हेदोषान् स्वाद्यापि संश्रयान् ५५

चनापि दोषइतितात्पर्यम् ५४ एवं दोषानुक्त्वा पर्यवसितं तदाश्रयभेदा
न्कथयन्नुपसंहरति पद इति पदे इति पदे इत्येवं तत्तिङंताद्यौपदांशे प्रकृतिमात्रपा

दीवाक्यांशेसमासेखंडवाक्येचवाक्येमहावाक्येवाक्यकंदवकेप्रबंधेयथा
नुसारंलक्षणानुरोधानतिक्रमेणश्लाघ्यापिनिष्टत्वेनद्विविधान्दोषान्प
दादीनदोध्येचयथालक्षणम्रहेदित्यर्थः यथाऽवकाशमितिपाठेयथासं
भवमित्यर्थः यथाश्रुतिकटुत्वंपदादिसर्वगतंच्युतसंस्कृतित्वादिपदनि
ष्टमेववाक्येशक्तिविरहादवाचकत्वमपिपदतदेकदेशनिष्टमेवेत्यादिबो
ध्यं ५५ उक्तदोषापवादलक्षणात्वमितिसूचयन्दोषांकुशलक्षणमाह
दोषमितिय: स्वांतेऽप्रापतितंज्ञानमपिशृंखलाश्रन्यतयाप्रतिबंधकाभा

दोषमापतितंस्वांतेप्रसरंतंविशृंखलं निवारयतियस्त्रेधादोषां
कुशमुशंतितं ५६ दोषोगुणत्वंतनुतेदोषत्वंवाविमुंचति भ
वंतमप्यवादोषंनयत्यत्याज्यतामसौ ५७ ॥०॥०॥०॥०॥

वेनप्रसरंतंदोषंश्रप्यविवोधदसोत्पत्तिप्रतिबंधेनदोषत्वेननिश्चितंत्रेधा
प्रकारत्रयेणनिवारयतिसदोषांकुशमाहइत्यर्थः ५६ प्रकारत्रयमेवाहदोषइ
तिक्वचिद्गुणत्वज्ञानाद्दोषोपिगुणोभवतिक्वचित्कविसमयकृतदोषत्वा

भावज्ञानाद्दोषत्वं मुंचति गुणत्वं तु न याति क्वचित् श्लेषानुप्रासादिनिर्वा
हकतया तस्येष्टत्वरूपात्याज्यत्वज्ञानात्परं तत्त्वमपि दोषं स्वीकारयति दोषां
कुशाद्यत्वर्थः ५७ तत्राद्यलक्ष्यमाह मुखमिति वक्त्रमुखवर्णनं श्वेतपद्मपक्ष्म
णेपवकिरणांकुराख्यैः अत्र श्वेतत्वादेः स्त्रीविदूषकाद्युक्तौ ग्राम्यत्वेपि हा॥
स्यरसपोषकत्वाद्गुणत्वं तदाह अत्रेति उद्देशः प्रतिपादनं सत्सप्तमी ५८

मुखं वचं द्रष्टिप्रियं धत्ते श्वेतपद्मकराकारैः अत्र हास्यरसोद्देशो
ग्राम्यत्वं गुणतां गतं ५८ तव दुग्धाब्धिसंभूतेः कथं जाता क
लंकिता कविनां समयाद्विद्याविरुद्धोः दोषतां गतः ५९ ॥७॥

द्वितीयलक्ष्यमाह तवेति चंद्रं प्रति कस्यचिदुक्तिः हे चंद्र इति शेषः क्षीरो
दजन्मं द्रोः कलंकः सकलंकास्त्रिनेत्र इति पुराणादौ प्रसिद्धं तत्रस्या
पि कलंकित्ववर्णनेन दोषः कविप्रसिद्ध्याद्यपोऽभ्रंद्रपोऽस्मै क्याध्यवसापा

त् तथा च दुग्धाब्धिजचंद्रस्य कलंकित्ववर्णनेन विद्याविरुद्धत्वरूपदोष
तेषां भूसंबंधे कार्यकारणत्वेपित्तयोर्योगपचंवर्णितं २७ अत्यंतातिशयोक्तिं लक्षयति अत्यंतेति कार्यकारणयोः प्रसिद्धयोर्वापर्यव्यतिक्रमकथनं अत्यंतातिशयोक्तिः तथाचतयोर्व्यतिक्रमे सतिसेति फलितं उदाहरति अग्रेति अत्रानुनयरूपकारणात्पूर्वमानभंगरूपकार्यवर्णनं २८

अत्यंतातिशयोक्तिस्तपौर्वापर्यव्यतिक्रमे अग्रेमानोगतः पश्चादनुनीताप्रियेणासा २८ चपलातिशयोक्तिस्तकार्येहेतुप्रसक्तिजे यामीतिप्रियपृष्टायावलयोभवदूर्मिका २९

चपलातिशयोक्तिं लक्षयति चपलेति हेतुप्रसक्तिर्भावित्वेनतस्यसंभावनात्तज्जन्येकार्येसतितस्यामेवकार्योत्पत्तिकथनं चपलातिशयोक्तिरित्यर्थः उदाहरति यामीति गच्छामीत्यर्थः वलयः करकंकणमूर्मिकावाहुभूषणमभवदित्यर्थः यद्वाऊर्मिका अंगुलीयकंवलयोऽभव

दित्यर्थः वलयोःस्त्रियामित्युक्तेः पुंस्त्वं अत्र वियोगरूपकारणसंभावन
यैवकार्यरूपकार्योत्पत्तिर्वर्णिता २९ संवंधातिशयोक्तिं लक्षयति संवंधे
ति असंवंधेसंवंधकथनं संवंधातिशयोक्तिः उदाहरति पश्येति नायि
कांप्रतिनायकोक्तिः अत्रचंद्रविंवस्यस्सुधानिर्मितगृहशिखरसंवंधा
भावेपितद्वर्णनं इदंभेदद्वयंकव्वित्पुस्तकेनदृश्यतेतत्रचात्तविध्यमेवास्या

संवंधातिशयोक्तिःस्यात्तदभावेपितद्वचः पश्यपसौधाग्र
संसक्तंविभातिविधुमंडलं ३ भेदकातिशयोक्तिश्चेदेकस्ये
वान्यतोच्यते अहोअन्यैवलावण्यलीलावालाकुचस्यले ३१

वोध्यं ३ भेदकातिशयोक्तिंलक्षयति भेदकेति असतिभेदकथनंलो
कप्रसिद्धपदार्थापेक्षयाचमत्काराधायकंभेदकातिशयोक्तिः एकस्ये
वस्वनिरूपितभेदकथनंयावत् उदाहरति अहोइति अत्रलोकप्र

सिद्धलावण्याभेदेपिलावण्यलीलायाःस्वतएवभेदवर्णनं अतएवद्योतकाहि
शब्दप्रयोगोपिसफलः तत्रचौदितिप्रगृह्यसत्वात्प्रकृतिभावः ३१ रूपकाति
शयोक्तिंलक्षयति रूपकेति आरोप्यारोपविषययोरारोप्यरूपात्मनैवकार्य
कारणभावकल्पनंरूपकातिशयोक्तिः आरोपणीयोत्रैवारोपविषयोक्तिं॥
स्मेतियावत् उदाहरन्तिपद्येपितिशितास्त्रीक्षणाः क्वचित्सितारितिपाठःअत्रा

रूपकातिशयोक्तिस्यात्‌उपरूपकमध्यगं पद्मपनीलोत्पल
द्वंद्वान्निस्सरंतिशिताःशराः ३२

रोपविषयनेत्रकटाक्षयोरारोप्यनीलकमलशरत्वरूपेणकार्यकारणभा
वकल्पनात् आरोपणीयवाचिनीलोत्पलशरपदाभ्यामेवारोपविषयनेत्रक
टाक्षयोःप्रतीतेःपृथगनभिधानंरूपकभेदास्त्वग्रेष्यत्रवोध्याः एतदर्थमेव
रूपकपदंद्वयमेवनिगीर्याध्यवसानातिशयोक्तिःकाव्यप्रकाशेउक्ताअलं

कारस्तर्वस्वेतु अस्याः सापह्नवत्वमप्युक्तम् तेन तत्कृतभेदोप्यत्र द्रष्टव्यः ३२

प्रौढोक्तिं लक्षयति प्रौढोक्तिरिति तत्रासमर्थस्य तत्सामर्थ्यवर्णनं प्रौढोक्तिः उदाहरति कलिंदेति अत्रन्यमुनातटरोहस्यनैल्यजननासमर्थत्वेपि तत्स मर्थत्वकल्पनं अयं चातिशयोक्तिभेदो नालंकारांतरमिति काव्यप्रकाशः।। अत्र क्वचित्पुस्तके कलिंदेत्युदाहरणापाठस्तल्लेखकप्रमादात् एतेन सि

प्रौढोक्तिस्तदशक्तस्य तद्धेतुत्वावकल्पनं कलिंदजातीररुहाः श्यामलाः सरलद्रुमाः ३३ संभावनं यदीत्थं स्यादित्यूहोन्य प्रसिद्धये सिक्तं स्फटिककुंभांतः स्थितिश्वेतीकृतैर्जलैः ३४

क्तमित्येकमेवोभयोरुदाहरणमिति उभयमेकएवालंकार इति चापास्तं तयोर्भेदात् अत एव तदावरूपकत्वाच्च ३३ संभावनां लक्षयति संभाव नामिति अन्यप्रसिद्धये इतिताद्रूप्यं चन्दपीतत्फलकोपस्ताद्दृशाऊहइत्या

चं॰ ६

यत्तगर्भः तथाच यदीसं स्यात्तदाऽन्यत्कार्यं स्यादिति तर्कविषयापि वो-
धकपदसमभिव्याहारः संभावना उदाहरन्ति पद्येन सिक्तमिति स्फटि-
ककलशांतःस्थित्याश्वेतीकृतैर्जलैः सिक्तं मौक्तिकं पद्दिलतां जनपति
तदा तव यशास्तत्पुष्पैः सदृशामित्यन्वयः स्फटिकघटांतःस्थितजलसि-
क्तमौक्तिकांकुरविवद्धलतामदिस्यात्तदा तत्पुष्पसमं ते यशा इति त

मौक्तिकं चेल्लतांसूतेतत्पुष्पैस्तेसमं यशः। वांछिता-
धिकसंप्राप्तिरयत्नेन प्रहर्षणं ३५॥०॥०॥०॥

त्साम्येन ते यशो वर्णनीयं स्यादित्यर्थः ३८ मौक्तिकमिति प्रहर्षमाह॥
वांछितेति अनायासेन इच्छाविषयाधिकप्राप्तिबोधकपदसमुदायो
यत्र तत्र प्रहर्षालंकारः वांछिताप्यधिकप्राप्तिर्यद्येनेति पाठांतरं त्र्य-
र्थः स एव ३५ उदाहरन्ति दीपमिति तदधिकप्रकाशस्यानायासेन राम ६

प्राप्तिरितिभावः विषादं लक्षयति इष्यमाणेति इष्यमाणाद्विरुद्धार्थो यत्र
प्राप्यते तद्विषादनम् ३६ उदाहरति दीपमिति उद्योतयेद्दुद्दीपयेत् निर्वा
णोगतः शांत इति यावत् तुल्ययोगितां लक्षयति क्रियादिभिरिति आ
दिगुणः बहुवचनं व्यक्त्याभिप्रायं तयाच क्रियया गुणेन वा प्रस्तुता
नाम प्रस्तुतानां वायत्तुल्यत्वं सा तुल्ययोगितेत्यर्थः अनेकेषां तेषां वा

दीपस्तु द्योजयेद्यावत्तावदभ्युदितो रविः इष्यमाणविरु=
द्धार्थसंप्राप्तिस्तु विषादनं ३६ दीपस्तु द्योजयेद्यावत्ताव न्
न्निर्वाणशावसः क्रियादिभिरनेकस्य तुल्यतातुल्ययोगि ता

क्रियागुणान्यतरैकतुल्यधर्मयोगित्वं सेति यावत् एतेन प्रस्तुताना
मेवेतत् तत्त्वे रूपमिति प्राचोक्तमपास्तं विनिगमकाभावात् ३७॥
तत्राद्यं उदाहरति पद्येन: संकुचंतीति उदयाचलमस्तकस्थकविंव

कच्चंद्रेऽस्तीत्यर्थः अत्र चंद्रोदये मुखानां पद्मानां च तदा अपतया वर्णनीयत्वेन प्रस्तुतत्वाल्लब्धं एतेन प्रस्तुतानामप्रस्तुतानां चेत्यर्थः। कृत्वाऽत्र मुखानां प्रस्तुतत्वं कमलानामप्रस्तुतत्वमित्यपास्तम् दीपकेन सांकर्यापत्तेः अस्याभेदांतरमपि अन्यत्र ३८ दीपकं लक्षयति

संकुचंति सरोजानि स्वैरिणीवदनानि च प्राचीनाचल चूडाग्रचुंबिबिंबे सुधाकरे ३८ प्रस्तुताप्रस्तुतानां च तु ल्यत्वे दीपकं मतं मेधां बुधः सुधामिंदुर्विभर्ति वसुधां भ

प्रस्तुतेति क्रियाभिरित्यस्यानुषंगः चस्त्वर्थः प्रस्तुताप्रस्तुतानां तु क्रियादिभिस्तुल्यत्वे दीपकं इत्यन्वयः प्रस्तुताप्रस्तुतनिष्ठताहृशसाधारण धर्मकल्पने इति तत्त्वेदमित्यर्थः ताहृशानां उपमानोपमेयानामन्येषां वा क्रियादिरूपैकधर्मकल्पनं पत्रैकपदेन तत्त्वेदमिति यावत् दीपकमिति राम

वार्प्यैकत्र एकस्यानेकोपकारकत्वं साधारणधर्मः प्रस्तुताप्रस्तुतेत्य
नेन तुल्ययोगिताव्यावृत्तिः उदाहरति मेधामिति अत्र राजा प्रस्तुतो व
एपित्वात् अत्र साधारणस्तपक्रियायाः दीपवन्मध्ये सकृदुक्तिः ॥४९॥
प्रतिवस्तूपमां लक्षयति वाक्ययोरिति अर्थसामान्ये इत्यस्यार्थयोस्तु
ल्यत्वे इत्यर्थः यत्र वाक्यद्वयगतानां पदार्थानां सर्वेषां मिथः साम्यं तत्र

आवृत्ते दीपकपदे भवेदावृत्तिदीपकं दीप्याः निर्भाति निर्भातीन्दुः कान्त्या भाति रविस्त्विषा ॥

वाक्ययोरर्थसामान्ये प्रतिवस्तूपमा मता तापेन
भ्राजते सूर्यः शूरश्चापेन राजते ॥५१॥ ०॥ ०॥

प्रतिवस्तूपमा उपमासादृश्यं प्रतिवस्तु प्रतिवाक्यद्वयगतपदार्थः
यस्यामिति व्युत्पत्तेः उपमानोपमेयबोधकवाक्यद्वये एकक्रियायास्तपसा
धारणधर्मस्य पृथङ्निर्देशाद्रूपमिति यावत् तेन नावृत्तिदीपकान्तर्गतिः
परं तु पदभेदेन तदुक्तिर्वैधर्म्याप्रदावृत्तौ कल्पितं तपदत्वापत्तेः अतएव
संधावग्रे: प्रकृतत्वं बोध्यं तेन दीपकसामान्यलक्षणसंगतिः त्विषा भवानिति पाठे तु राज्ञैव प्रकृत इति सम्प
गेव एतेनात्र रविरेव प्रकृत इति प्राचोक्तमपास्तं काव्यप्रकाशोक्तमालादीपकमधिकमुक्तं ॥५०॥ उदीपंक्तिरुटीकाकी

824

प्रकाशैकवाक्यत्वा उदाहरति नाथेनेति अत्रैौपम्येन भानूराजत इ।
त्यस्य धनुषाम्बरो राजत इति द्वितीयेन साम्याद्राजत इत्यर्थस्य पृथक्
पदाभ्यां निर्देशात्तापचापयोस्तरुरम्बरयोः शोभनयोश्च मिथः साम्यं।
५१ दृष्टांतं लक्षयति चेदिति वाक्यार्थयोर्यत्र विंवप्रतिविंवभावः उप
मानोपमेयसाधारणधर्माणां सर्वेषां यत्र विंवप्रतिविंवभावप्रधानग
म्यत्वं धर्मसहितस्योपमानस्योपमेयस्य च विंवप्रतिविंवभाववोधक

चेद्विंवप्रतिविंवत्वे दृष्टांतस्तदलंकृतिः स्यान्मल्लप्रति
मल्लत्वे संग्रामोद्दामहुंकृतिः ५२ ॥ श्रीरामायनमः॥

समभिव्याहारो वा इति यावत् तत्र दृष्टांतालंकारः साधारणधर्मस।
हितस्येति विशेषणात्तुल्ययोगिता दीपकप्रतिवस्तूपमानां व्यावृत्तिः
तत्र तदा मल्लप्रतिमल्लत्वे संग्रामसंवंधिनी तदा धारावोद्दामहुंकृ॥

त्तिः स्यादित्युत्तरार्धार्थः मल्लप्रतिमल्लत्वे यथा संग्रामोद्दाम हुंकृतिः
स्यात्तथा यदि विंबप्रतिविंबत्वे तदा दृष्टांतः स्यादित्यन्वयात्सर्वोत्तरं
वाक्यार्थयोर्विंब प्रतिविंबभावाल्लक्ष्यमपीदमेवपद्यं अत्र मल्लप्र
तिमल्लविंबप्रतिविंबत्वयोर्दृष्टांत हुंकृत्योश्च मिथो विंबप्रतिविंबभा
वः यथा दृष्टांतस्स हि तस्य विंबप्रतिविंबत्वस्य हुंकृतिस्स हि तस्य मल्ल
प्रतिमल्लत्वस्य च सः एवं च दृष्टांत दार्ष्टांतिक भावस्यावभासाल्लक्ष
णसंगतिः ४२ दृष्टांत हुंकृत्योर्लिंगभेदेन विंबप्रतिविंबभावस्य

दृष्टांतश्चेद्भवन्मूर्त्तिस्तन्मृष्टा देवदुर्लिपिः जाता
चेत्प्राक्प्रभा भानोस्तर्हि याता विभावरी ४३॥

स्यष्टमनवभासादुदाहरणांतरमाह दृष्टांतश्चेदिति भगवंतंप्र
तिभक्तोक्तिः हे विष्णो भवन्मूर्त्तिरंतर्हृदये यदि दृष्टांतस्तर्हि देवदेव

दुर्लिपिर्म छानस्था: प्राक् प्राच्यां पद्मिभानो: प्रभाजाता तदा रात्रिर्गते
ऽर्थ: अत्र तेषांस्पष्टो बिंबप्रतिबिंबभाव: ५३ निदर्शनालक्षयति वाक्या
र्थयोरिति यत्र सादृश्यवशाद्वाक्यार्थयोरैक्यमारोप्यते उपमानोपमेयभा
वकल्पनाफलकौवाक्यार्थयोराहार्यभेदनिश्चयस्वरूपतादात्म्यारोपइ
तियावत् तत्र निदर्शनालंकार: अत एव दृष्टांतवैलक्षण्यं तत्रैक्यारोपाभा

वाक्यार्थयो: सदृशयोरैक्यारोपो निदर्शना यद्दातुस्सौम्यता
सेयंस्तुधांशोरकलंकता ५४ व्यतिरेको विशेषश्चेदुपमानो
पमेययो: शैलाइवोन्नता: संत: किंतु प्रकृतिकोमला: ५५

वात् इयं पंचसंभववस्तुसंबंधनिबंधनात्तद्विपरीताचेति द्विधा तां तत्राद्यामुदाहरन्ति यद्दातुरिति विरहिणां चंद्रकिरणोपतप्तायां रूपमुक्ति: दातु: सौम्यत्वं चंद्राकलंकत्वरूपवाक्यार्थयोरसंभावितत्वेन समयोर्यत्र भवमैक्यारोपो नस्फुट: दातु: सौम्यत्वसंबंधसंभवाच्चंद्रस्य कलंकत्वसंबंधासंभवाच्चोभयविधत्वं तत्र सौम्यत्वमिव तस्याकलंकतेत्युपमानोपमेयभाव: ५६ व्यतिरेकंल

दयति व्यतिरेकेति यत्रोपमानापेक्षयोपमेयस्याधि

क्यवर्णनं तत्र व्यतिरेकालंकार: उदाहरन्ति शैलाद्य

अत्रद्युम्नतत्वेनसाम्येपिकोमलत्वेनोपमेयबुधानामाधिक्यप्रतिपादनं
अस्यभेदांतरमप्यन्यत्रोक्तं ५५ सहोक्तिंलक्षयति सहोक्तिरिति यत्रजनम
नोहारीसहभावः उपमानोपमेयभावकल्पकः सहृदयचमत्काराधाय
कस्सइतियावत् तत्रसहोक्त लंकारः पुत्रेणसहैत्यत्रवारणायजनरंजन
इति तत्रतेषांतदभावात् उदाहरति दिगंतमिति यस्यवर्णनीयस्यराज्ञः

सहोक्तिःसहभावश्चेद्भासतेजनरंजनः दिगंतमगमद्यस्य
कीर्तिःप्रत्यर्थिभिःसह ५६ विनोक्तिश्चेद्विनाकंचित्प्रस्तुतं
हीनमुच्यते विद्याहृद्यापिसाऽवद्याविनाविनयसंपदं ५७॥

अत्रसाहित्यबलेनैवकीर्तिदिगंतगमनस्यवैरिनिष्ठस्यतस्यचोपमानोप
मेयभावकल्पनं अस्यवैरिणोदिगंतंगताइतिवर्णपिनिष्ठातिपोरुषवर्णनेन
चमत्कारश्च ५६ विनोक्तिंलक्षयति विनोक्तिरिति यदिकंचिद्विनायत्रप्र
स्तुतंहीनमुच्यते चमत्काराधायकवर्णनीनिष्ठन्यूनताऽभिव्यंजनकोवि

चं॰
६५

नाभावः तादृशपदभावोऽन्यावर्णनीयेसदसत्वान्यतरापादानं तादृशो
क्तिरितियावत् तत्र विनोऽस्मलंकारः उदाहरन्ति विद्येति अत्र वर्णनीय
विद्यायां विनयाभावेन असत्व प्रतिपादनं विना खले विभात्येषा राजेंद्र
भवतः सभेतिसत्वोदाहरणं वोध्यं ४७ समासोक्तिं लक्षयन्ति समासो
क्तिरिति यत्र प्रस्तुते श्लिष्टेऽश्लिष्टे वा वर्ण्यमाने सति चमत्काराधाय

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्यचेत् अय
मैंद्रीमुखंपश्यरक्तश्चुंवतिचंद्रमाः ४८॥०॥०॥

काप्रस्तुतार्थप्रत्ययस्तत्रसमासोऽस्यलंकारः समासेनसंक्षेपेणोक्ति
रितियोगार्थः उदाहरन्ति अयमिति अत्र प्रस्तुतमहिम्नैव परकर्तृका क
मिनीमुखचुंवनोपस्थितिः तत्रापि ऐंद्रीशब्देन स्त्रीत्वस्य परकीया
त्वस्य चंद्रशब्देन पुंस्त्वस्य मुखपदाध्यारोपात् भवदनयोरक्तशब्दादरुण
राम
६५

कामुकयोरभ्युदंतिशाब्दाच्चुंवनसंबंधयोः प्रतीत्यापरनायिकासक्तपुरुष
वृत्तांतः प्रतीयते इति श्लिष्टोदाहरणमिदं अन्यत्तवन्यत्र ५८ श्लेषो द्विधा
शाब्दश्लेषोऽर्थश्लेषश्च तत्र विजातीयोच्चारणयोग्यत्वेन भिन्नयोः शाब्द
योरेकोच्चारणाविषयत्वं शाब्दश्लेषः सोऽष्टधा वर्णपदलिंगभाषाविभ
क्तिप्रकृतिप्रत्ययवचनभेदात् तत्र वर्णभेदेन विरूपयोः पदयोरादेशादि
वशेनैकरूप्यं वर्णश्लेषः यथा चंद्राद्दृष्ट वाचक विधुविध्यि पदयोः सम्प्र
म्पते विधाविन्यत्रान्यूनाधिकत्वादिना भिन्नार्थयोः पदयोर्मिलनादेकार्थ
प्रतिपादकत्वं पदश्लेषः यथा पृथुकार्तस्वरपात्रं अत्र महत्स्वर्णपात्रं वि

खंडश्लेषः पदानां चेदेकैकं पृथगर्थता उच्छल
द्भूरिकीलालः शुशुभे वाहिनीपतिः ५९ ॥ ० ॥

न्नतार्तस्वरस्यानंच पृथुकार्थ्यं यत्र आर्तस्वरस्य स्यानंवात्त्वसंबंध्यार्त
स्वरस्यानंवेति भिन्नार्थौ विभिन्नलिंगार्थप्रतिपादकयोर्व्याकरणवशे
नैकरूप्यं लिंगश्लेषः यथा रामयोरिति अत्रैकशेषेणोभयगतिः भिन्नार्थयोः

प्राकृतसंस्कृतयोरैकरूप्यंभाषाश्लेषः अस्योदाहरणं यथा कस्मै प्र।
सीदति शिवः किं मांध्याणं वद प्रियं आंअभगीर्वाणतोह्येकं चित्तकायो
त्तरं स्मरण विभक्त्योर्भिन्नत्वे सति नाम्नोधातोश्चैकरूप्यं विभक्तिश्लेषः
यथा हरेति इदंतिङंतंसंबुध्यंतंच भिन्नधातोः प्रत्ययविशेषकृतप्र
क्रियावशेनैकरूप्यं प्रकृतिश्लेषः यथा वह प्रापणे वच परिभाषणे।
इति धातोर्वक्ष्यतीति वस्तुतो भिन्नयोरपितत्वभावप्रत्यययोरैकरूप्यं
प्रक्रियावशेन प्रत्ययश्लेषः यथा नंदिता अत्रोभयत्रापित्वप्रतीतिः
द्व्येकार्थप्रतिपादकयोर्व्याकरणवशेनैकरूप्यं वचनश्लेषः यथा कुरुतां
अत्र परस्मैपदात्मनेपदभेदेनोभयगतिः अयमष्टविधोऽपि सभंगश्ले
षः तत्रायं प्रकारः पदश्लेषस्यैव भेदद्वयं सूचयन् अभंगश्लेषं लक्षयति
खंडेति पदानामित्यस्य मध्यमणिन्यायेनान्वयः पदानां समस्तपदसं
बंधि एकैकं प्रति अवांतरैकरूपखंडपदस्यप्पगर्पितापादितदापदसं
बंधिखंडश्लेषः समस्तपदावयवस्यैकरूपस्यैवार्थभेदेन वाक्यार्थद्व

यप्रतिपादकत्वंस इतियावत् उदाहरन्ति उच्छलदितिउच्छलंतिप्रवहं
तिभूरीणिकीलालानियस्मिन्नितिवहुव्रीहिः अत्रकीलालपदेनरुधि
रनीरयोर्वाहिनीपदेननदीसेनयोः एवमेवपदादुपस्थितिरितिसेनाप
तिनदीपतिघटितवाक्यार्थद्वयपरत्वं ४८ पूर्वोक्तमेवद्वितीयमाहभंगे
ति पदस्समुदायस्येवयदि अवांतरविलक्षणपदभंगेनभिन्नार्थकत्वे

भंगश्लेषः पदस्तोमस्यैवचेत्पृथगर्थिता अजरामर
ताकस्यनोःयोध्येवपुरीप्रिया ५० ॥ छ ॥ छ ॥ छ ॥

नवाक्यार्थद्वयप्रतिपादकत्वंतदाभंगश्लेषइत्यर्थः एतेनतदघटक
पदव्यावृत्तिः उदाहरन्ति अजरेति अयोध्यापुरीइवाजरामरताकस्य
नोप्रियाअपितुसर्वस्यापीत्यर्थः अत्राजरश्चामरश्चेति द्वंद्वोत्तरभा
वप्रत्ययेनाजरताअमरतेत्यर्थस्याजश्चरामश्चेतिद्वंद्वगर्भषष्ठीतत्पुरु

चं.
६६ षेणाजरामविषयकप्रीतिमतीत्वर्थस्य च प्रतिपादनाल्लक्षणसमन्वयः अयं भा
वालंकार इति प्रकाशः अर्थालंकार इत्यनेन चास्य गुणेषु पाठान्नालंकारत्वं
तस्यान्यरूपस्य प्रकृतिप्रतिपादितत्वादिति बोध्यं ५० अथार्थश्लेषं लक्षयति
अर्थेति अर्थमात्रस्य न तु शब्दविशिष्टस्य तेन पर्यायशब्दोपस्थाप्यत्वमुक्तं
अनेकार्थसंश्रय अनेकपदार्थान्वयः तथा च पर्यायशब्दोपस्थाप्यानेकपदा

अर्थश्लेषोऽर्थमात्रस्य यद्यनेकार्थसंश्रयः कुटिलाः
श्यामला दीर्घाः कटाक्षाः कुन्तलाश्च ते ५१ ॥०॥०॥

र्थान्वितार्थद्वयोपस्थापकपदत्वमर्थश्लेषः शब्दश्लेषेषु पर्यायशब्दानुपस्था
प्यत्वं विशेषः तथा च विशेष्ययोर्भिन्नत्वेऽपि विशेषणानामैक्यं यत्र तत्रायं ए
कार्थकैर्विशेषणपदैर्यत्राप्रस्तुतसाधारणधर्मवत्ताप्रतिपादनद्वारोपमा
नोपमेयभावः कल्प्यते तत्रायमिति यावत् उदाहरति कुटीति अकटाक्षकुन्तल
योर्यः प्रस्तुतसाधारणधर्माः कुटिलत्वादयः एकार्थककुटिलादिपदबोध्या राम
६६

स्ते वक्रादिपदैरपि स्तुषचा इति भावः ५१ अप्रस्तुतप्रशंसां लक्षयति
अप्रस्तुतेति लक्ष्यनिर्देशोऽयं तच्छब्द एतत्परामर्शकः तथा च सा अप्र
स्तुतप्रशंसा यत्र प्रस्तुतमनुग इति प्रस्तुते पर्यवस्यति तत्र अप्रस्तुतप्रशं
सेत्यर्थः यत्रार्थकरणिकार्याभिधानेन तुल्यनिंदान्यतररूपेण प्राकरणि

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुतानुगा कार्यका
रणसामान्यविशेषादेरसौ मता ५२ ॥०॥०॥०॥

कार्यप्रशंसाप्रतीतिस्तत्राप्रस्तुतप्रशंसालंकार इति यावत् तद्भेदानाह
कार्येति आदिना तुल्याप्रग्रहणं अप्राकरणिकस्यार्थः कार्यरूपो हेतु
रूपः सामान्यरूपो विशेषरूपः सदृशावस्तुरूपश्चेति पंचविध इति तद्भे
दादियं पंचधेत्यर्थः तदुक्तं कार्ये निमित्ते सामान्ये विशेषः प्रस्तुते सति त
दन्यस्य वचस्तुल्ये तुल्यस्येति पंचधेति निमित्ते कारणे तदन्यस्य कारणा
दे स्तुल्ये प्रस्तुते तुल्यस्य च यद्वचनमिति तदर्थः ५२

चं
६७

उदाहरन्ति कमलैरिति अत्राप्रस्तुतकमलकर्षणाप्रस्तुतधनिका।
कर्षणाक्षेप इति तुल्योदाहरणमिति केचित् अन्ये तु अप्रस्तुतसा
मान्यप्रशंसया प्रस्तुतविशेषप्रशंसोदाहरणमिदं इदं च नेत्रक
टाक्षैभिर्नायिकावर्णमिति वाक्यं लक्ष्मीस्थानैः कमलैः सर्वं सुंदरमि
ति सामान्यप्रशंसया नेत्रादिभिरियं शोभन इति प्रस्तुतनायिकायां

कमलैः कमलावासैः किं किं नासादि सुंदरं अप्पं
बुधेः परं पारं प्रयांति व्यवसायिनः ५३ ॥०॥०॥

शोभाविशेषाक्षेप इत्याहुः अप्रस्तुतविशेषप्रशंसया प्रस्तुतसा
मान्यमुदाहरन्ति अप्पंबुधेरिति अत्राप्रस्तुतानां व्यवसायिनामंबु
धिपारगमनोद्यमविशेषस्तस्मात्किंचित्कर्म कर्तव्यमिति व्यवसायि
नः किं न कुर्वंतीति वा तेषां न किमपि दुष्करमिति वा सामान्यस्तु ति

राम
६७

रादिश्यते अत्र च अप्रस्तुतकथनेन तत्प्रतीतिः श्लेषेण समासोक्त्या सादृ
श्यमात्रेण वेति प्रकारद्वयं तत्रान्यत्र स्पष्टं प्रकृते त्वाद्ये श्लेषेण द्वितीये
सादृश्यमात्रेणेति बोध्यं अन्यस्यापीत्यमन्यत्रोक्ता ५३ अर्थान्तरन्यासं ल
क्षयति भवेदिति यत्र मुख्येनार्थेनानुषक्तं सहितमर्थान्तरमभिधीयते
तत्रार्थान्तरन्यासः यथा अनुषक्तमुपपादकं तथा च यत्र प्रस्तुतसामान्य

भवेदर्थान्तरन्यासोनुषक्तार्थान्तराभिधा हनूमान
ब्धिमतरदुदुष्करं किं महात्मनां ५४ ॥ ७ ॥ ७ ॥

विशेषान्यतररूपार्थस्योपपादनार्थं विशेषसामान्यान्यतररूपार्थाभि
धानं तत्रायं अत एव काव्यलिंगाद्भेदः हेतुनास्तपस्यार्थस्य समर्थकत्वस्य
काव्यलिंगत्वान्नह्यत्र सामान्यविशेषान्यतररूपेर्थे हेतुरपि तूपपादकः
उपपादकत्वं च निश्चयविशेषीकरणत्वरूपं दृढीकरणं काव्यलिंगे
तु व्याप्तिपक्षधर्मताबलेनोपपादनमिति भेदः उदाहरति हनूमानिति

अत्र दुष्करं किमिति मुख्योऽर्थस्तत्सहितं हनूमानित्याद्यभिहितं यद्वो
भयोरपीदमुदाहरणं महात्मनां सर्वं सुकरमिति सामान्यार्थस्य हनु
मत्कर्तृकाब्धितरणरूपविशेषस्य च मिथ उपपाद्योपपादकभावा
त् ५४ विकस्वरं लक्षयति यस्मिन्निति उपन्यस्तविशेषसमर्थना
र्थं सामान्ये उपन्यस्तेऽपि तावताऽपरितोषात्पुनरुपमानमुखेनार्थवि

यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः स न
जिग्ये महान्तो हि दुर्धर्षाः क्ष्माधरा इव ५५ ॥ ० ॥

शेषोपन्यासेन तत्समर्थने विकस्वरालंकार इत्यर्थः मध्यवर्तिसामा
न्यस्य पूर्वोत्तराभ्यां विशेषाभ्यां स्फुटीकरणाद्विकस्वरमिति भावः उ
दाहरति स न इति अत्र केनचित्स कश्चिन्नाक्रान्तो न जिग्ये जित इति
विशेषोक्त्यनन्तरं महान्तो हि दुर्धर्षा इति सामान्ये उक्तेऽपि तत्र एव क्ष्मा
धरा इवेति पुना राजत्वपर्वतत्वान्यतरविशेषरूपेणाभिधानं ५५ ॥ ०

पर्यायोक्तिं लक्षयति कार्याद्यैरिति प्रकर्षेण स्तुतैः स्तुतिविषयैः का
र्याद्यैः प्रस्तुतैः एव कारणादावुक्ते गम्ये पर्यायोक्तिः कार्याद्यैरित्यादि
ना कारणसंबंधिपरिग्रहः अत्र कार्यादीत्युपलक्षणं न तु विशेष
णं एवं च गम्यस्य विवक्षितस्य रूपादितिचमत्कारजनकस्यासाधा
रणधर्मेणाभिव्यंजने इति भावः उदाहरति तत्रेणेति अत्र यः सोऽ

कार्याद्यैः प्रस्तुतैरुक्ते पर्यायोक्तिं प्रचक्षते तृणांकु
रग्रासविपक्षनृपस्मृत ५६॥०॥०॥

स्ती त्यादिना वाक्यार्थः स्मरणीयः अत्र कार्येण तृणांकुरोत्पत्तिरू
पेण प्राकृ णं मरण रूपं प्रस्तुतमेव कारणमवगम्यते तथा च वैरि
भवननिष्ठतृणांकुरोत्पादकत्वेन प्रस्तुतस्य राज्ञो गम्यत्वात् लक्ष्य
त्वं अस्याभेदांतरमप्यन्यत्रोक्तम् ५६ व्याजस्तुतिं लक्षयति उक्तिरि

चं॰
६५ तिनिंदयास्तुते : स्तुत्या वा निंदाया उक्तिर्व्याजस्तुतिरित्यर्थः तत्रया
मुदाहरंति कस्ते इति अत्र गंगायां निंदाव्याजेन स्तुतिरिति निंदा
पर्यवसन्ना स्वलाः किल कलौ काले केवलं नत्तत्रत्राताः ये मोनमं
त्रं मंत्रं चैत्तिन कदाचित्परस्तवे इति स्तुति द्वारा निंदा बोध्या अस्याभे
दांतरमप्यन्यत्रोक्तम् ५७ आक्षेपं लक्षयति आक्षेप इति प्रयुक्त

अ उक्तिर्व्याजस्तुतिर्निंदास्तुतिभ्यां स्तुतिनिंदयोः कस्ते विवे
चैः कोनपसिस्वर्गयायायिनोपियत् ५७ आक्षेपस्तु प्रयुक्त
तं स्य प्रतिषेधो विचारणात् चंद्रसंदर्शयात्मानमपवाः

स्योपमानत्वेन संमतस्य प्रेरणा विषयस्य विचारणात् उपमेयमे
वैतत्कार्यक्षममिति विचारेण प्रतिषेध आनर्थक्य कथनं आक्षे
पालंकार इत्यर्थः उदाहरति चंद्रेति अत्रादौ चंद्रदर्शनविधिः त
तः प्रियामुखे जयिनि सति तेनोचितं तस्य दर्शनमिति प्रतिषेधः अस्याभेदां ६८
तरमप्यन्यत्रोक्तम् ५८ राम

गूढाक्षेपं लक्षयति गूढेति यत्र विधिः स्फुटो निषेधस्त्वस्फुटस्तत्र गूढाक्षे
पः उदाहरन्ति हरेति सीताहरणोन्मुखं रावणं प्रति मारीचोक्तिः सुख
मिति क्रियाविशेषणं हे रावण त्वं सीतां सुखं यथा स्यात्तथा हर किंतु अं
तकस्य यमस्य ढौकनं गतिं चिंतय ढौकृ गतौ अत्र हरेत्यादिना विधिः स्फु
टः किं त्वित्यादिना मृत्युभयप्रदर्शनेन निषेधस्यास्फुटत्वं च ॥५८॥

गूढाक्षेपो विधौ व्यक्ते निषेधे चाऽस्फुटे सति ॥
हर सीतां सुखं किंतु चिंतयांतकढौकनं ५८॥

विरोधं लक्षयति विरोध इति आदिना जातिः गुणेत्यादि विषयसप्तमी
तया च यत्र द्रव्यगुणक्रियाजातीनां मिथो अनुपपत्तिरनुपपन्नं संबं
धकथनं तत्र विरोधालंकारः उदाहरति अमंदेति स्वछंदमिति क्रि
या विशेषणं दंदहीति तिप ङ्लुङः तमस स्वछंदं यथा तथा मां दंदही

तीत्यर्थः अत्रामंदत्वागुणमंदनत्वंजातिः तदाश्रयो द्रव्यंस्पंदप्रस्त
वणक्रिया तेषांदाहा क्रियान्वयविरोधादिदं चतुर्णां क्रियाविरोधेउ
दाहरणं अस्यदशाभेदाअन्यत्रअयंप्रकाशदर्पणयोर्नोक्तः ६ ॥
विरोधाभासंलक्षयति श्लेषादीति वास्तवापिकृतविरोधपरिहा

विरोधोनुपपत्तिश्चेद्गुणद्रव्यक्रियादिषु अमंदवंदन ८
स्पंदःस्वछंदंदंदहीतिमां ६ श्लेषादिभिर्विरोधश्चेद्वि
रोधाभासतामता अप्यंधकारिणानेनजगदेतत्प्रका

रफलकश्लेषादिकृतविरोधभाने विरोधाभासः वास्तवत्वंचता
त्पर्यविषयिविभूतत्वं उदाहरति अप्यंधेति अनेनज्योतिषा
तद्रूपेणच अत्रांधकारवताज्योतिषाजगत्प्रकाशनस्यविरुद्ध
विरोधमाने अंधकवैरित्वेनमहादेवभाजनेनतत्परिहारः ६

असंभवं लक्षयति असंभव इति अर्थस्यापि निष्पत्तेरसंभावितत्वेन कथन
मसंभवालंकारः उदाहरति कोवेदेति अत्राल्पवयसा नारायणेन गो
वर्धनेकरांगुल्या उद्धृते को वेदेत्यधिकेन गोपानामसंभावितत्वेनोक्तिः
६२ विभावनां लक्षयति विभेति कारणेन विना कार्योत्पत्तिकथनं वि

असंभवोऽर्थनिष्पत्तावसंभाव्यत्ववर्णनं को वेदं गोप शिशु
कः शैलमुत्पाटयिष्यति ६२ विभाविना विनापि स्यात्कारणं
कार्यजन्म चेत् पश्य लाक्षारसासिक्तं रक्तं त्वच्चरणद्वयं ६३

भावनालंकारः उदाहरति पश्येति लाक्षारसेनासिक्तमिति समासः अ
त्र लाक्षारससेकरूपकारणं विनैव रक्तत्वरूपकार्यकथनं अत्र त्वच्चर
णमिति पाठेनाधिकां प्रतिनाधिकोक्तिः तद्वदिति पाठे तु मित्रं प्रतिनायि
कोक्तिः अस्याभेदांतरमप्यन्यत्र द्रष्टव्यं ६३ विशेषोक्तिं लक्षयति॥

चं.
७१ विशेषोक्तिरिति कारणे सति कार्यानुत्पत्तिकथनं विशेषोक्त्यलंकारः
उदाहरति नमंतमिति अत्र नमनरूपकारणे सत्यपि लंघनरूपकार्या
भावः न तो हि लंघयितुं शक्यः खर्वत्वात् अस्या अपि भेदांतरमन्यत्र ६४
असंगतिं लक्षयति आख्यात इति कार्यकारणयोर्भिन्नदेशत्वकथनम

विशेषोक्तिरनुत्पत्तिकार्यस्य सति कारणे नमंतमपि धीमंतं
न लंघयति कश्चन ६४ आख्याते भिन्नदेशत्वे कार्यहेत्वो
रसंगतिः त्वद्भक्तानां नमत्संगं भंगमेति भवक्लमः ६५ ॥

संगत्यलंकारः उदाहरति त्वदिति ईश्वरं प्रतिकस्यचिदुक्तिः हे शिवेति
शेषः अत्र नमनाधिष्ठानभक्तांगस्य भंगो भिन्नात्संसारक्लमनिष्ठभं
गस्य व्यधिकरणत्वान तत् अस्या अपि भेदांतरमन्यत्र भवक्लमशब्देन प
रमेश्वरभ्रम इति व्याख्यातः अनुचितः अत्राख्यात इति पाठंध्वत्वाय राम
७१

अभिन्नोवरव्यातस्तत्रवैयधिकरण्येऽसंगतिः यत्रतख्यातस्तत्रनयथा
भ्रूवापवल्लीस्तुमुखीपावनपतिवक्रतांतावत्कटाक्षविशिखैर्भिघते
हृदयंममअत्रवक्रतारूपस्यकारणस्यधनुर्वल्ल्यांभेदस्यकार्यस्य
भेदेएवदृष्टत्वेनवैयधिकरण्येस्येवरव्यातत्वान्नासंगतिरितिका
श्चित् ६५ विषमंलक्षयति विषममिति अनेकयोर्वस्तुनोरन्वय

विषमंयघनौचित्यादनेकान्वयकल्पनं क्वाति
तीव्रविषाःसर्पाःक्वासौचंदनभूरुहः ६६॥०॥

स्यसंबंधस्यकल्पनंवर्णनंप्रतीतिशेषःयदिअनौचित्यंअननुरूप
नइ त्वंतस्मादित्यर्थः तथाचानुरूपयोः संबंधकल्पनंअननुरूपसंबं
धकल्पनंवाविषमालंकारइतिफलितं उदाहरतिक्वातीति अत्र
भुजंगचंदनयोस्तत् अस्यापिभेदांतरमन्यत्र ६६॥७॥७॥०॥

समं लक्षयति सममिति उचितसंबंधकवस्तुद्वयकथनं समालंकारः
उचितत्वं च मिथः शोभाजनकत्वं अत्रापि प्राग्वदर्थो बोध्यः उदाहर
ति अनुरूपमिति हारेणासद्मगृहं तत्तद्रूपं कुचमंडलमित्याद्यर्थः अ
त्र हारकुचमंडलयोर्मिथः शोभाजनकत्वात् संबंधवर्णनं उचितः तेनो
क्तविषमप्रतिद्वंद्वीदं समं अस्यापि भेदा अन्यत्र ६७ विचित्रं लक्षयति वि

सममौचित्यतोऽनेकवस्तुसंबंधवर्णनं अनुरूपंकृतं
सद्म हारेण कुचमंडलं ६७ विचित्रं चेत्प्रयत्नः स्याद्विपरी
तफलप्रदः नमंति संतस्त्रैलोक्यादपि लब्धुसमुन्नतिं ६८

चित्रमिति यत्र यदि विपरीतफलहेतुप्रयोजनवर्णनं एकक्रियानुकूलः
प्रपन्नस्तद्विरुद्धक्रियानिष्पादकतया वर्ण्यते इति यावत् तत्र विचित्राल
कारः अत्र फलमिष्टरूपं ग्राह्यं उदा॰ नमंतीति अत्र नमनहेतुफलस्यो
न्नतिहेतुत्ववर्णनं अस्यापि भेदांतरमन्यत्र ६८

अधिकं लक्षयति अधिकमिति यत्राधारस्याधिक्यमुपवर्णितदपेक्ष
या ऽऽधेयाधिक्य वर्णनमधिकालंकारः आधिक्यं परिमाणेन संख्यया
च पृथुलाधारादिति पाठस्तूचितः उदाहरति यथेति ईश्वरप्रतिभक्तो
क्तिः अत्र जगत्त्रयव्यापकवाग्रूपाधारापेक्षया संख्यया भगवद्गुणरूपाधे
याधिक्यकथनं अस्याभिभेदांतरमन्यत्र ६९ अन्योन्यं लक्षयति अन्यो

अधिकं वोध्यमाधाराद्धेयाधिक्यवर्णनं यथाव्याप्तं जग
त्त्रस्यावाचि मां तिन तेगुणाः ६९ अन्योन्यमामयत्रस्याउ
पकारः परस्परं त्रियामाशशिना भाति शशी भीति त्रियामि

न्यमिति प्रसिद्धपरस्परोपकारकथनमन्योन्यालंकारः उदा० त्रियामे
ति चंद्रनिशयोः प्रसिद्धपरस्परशोभाजनकत्वमत्र वोध्यं ७० विशेषं ल
क्षयति विशेष इति प्रसिद्धाधारं विनाऽऽधेयवर्णनं विशेषालंकारः उदा

हरतिगतेपीतितत्कराः सूर्यकिरणाः अत्र रविं विना तत्किरणवर्णनं अस्य भे
दान्तरमन्यत्र ८१ व्याघातं लक्षयति स्यादिति अयथाकारीति छेदः अन्यक्रि
यं वस्तु अयथाकारि उच्यते चेदित्यर्थः तथा च अन्यजनकत्वेन लोकप्रसिद्ध
स्य तत् विरुद्धकार्यजनकत्ववर्णनं व्याघातालंकारः उदा॰ यैरिति कुसुमैरि

विशेषः स्यात्तमाधारं विनाप्याधेयवर्णनं गतेपि सूर्ये दीपस्था
स्तमश्छिंदन्ति तत्कराः ८१ स्याद्व्याघातोऽयथाकारि वस्त्वन्यक्रि
यमुच्यते यैर्जगत्प्रीयते हंति तैरेव कुसुमायुधः ८२ ॥०॥

त्यर्थः अत्र प्रीतिजनकत्वेन लोकप्रसिद्धकुसुमानां मारणक्रियाजनक
त्ववर्णनं तस्य तन्मात्रायुधत्वात् अत एव कुसुमायुध इत्येवोक्तः अस्या
पि भेदान्तरमन्यत्र ८२ कारणमालां लक्षयति गुंफ इति रचनाविशेष इत्यर्थः
यथा प्रागिति पदे इतरेतरद्वंद्वरूढविपदकर्मधारयोत्तरपदकावीसार्थका
व्ययीभावः बहुलग्रहणादत्र तथा चोत्तरोत्तरकारणभूतपूर्वपूर्वैः पूर्वप

र्वंकारणस्त्तोत्तरोत्तरैर्वीवस्तुभिः कृतोरचनाविशेषः कारणमाला उदा०
नयेनेति अत्रनयेश्रीत्यागानां पूर्वपूर्वकारणानांवर्णनं द्वितीयोदाहर
णंतुयशस्त्यागात्त्श्रियात्यागः श्रीर्नयेनमहीयसे इति बोध्यं ७३ एकाव
लींलक्षयति गृहीतेति गृहीतामुक्ताचरीतिर्यत्प्रकारकं विशेषणत्वंच

गुंफः कारणमालास्याघथा प्राक्तांतकारणैः नयेनश्रीः श्रि
यात्यागस्त्यागेन विपुलंयशः ७३ गृहीतमुक्तरीत्यर्थश्रेणि
रेकावलीमता नेत्रेकर्णांतविश्रांते कर्णौ दोस्थलदोलिनो ७४

येषांतादृशानामर्थानां श्रेणीः पंक्तिस्तद्वर्णनं एकावल्यत्तलंकारः उदा०
नेत्रे इति अत्रनेत्रविशेषणत्वेनगृहीतयोः कर्णयोर्विशेषणत्वत्यागे
नविशेष्यत्वोक्तिः दोस्तंभौजानुपर्यंतप्रलंबौतस्यभूभुज इत्युत्तरार्द्धं
बोध्यं ७४ मालादीपकंलक्षयति दीपकैकेति उक्तोदीपकालंका

चं॰
७४ रस्य एकावल्यलंकारयोगमात्रेणमालादीपकं उदा॰ स्मरेणेति तेनतदी
यहृदात्तस्यामनस्तच्चेप्येवलग्नत्तिस्थंतिनायकंप्रतिदूतस्युक्तिः अत्रदीप
कंस्फुटमेवस्थितिरित्यस्योभयत्रान्वयात् एकावल्यपिगृहीतत्यागा
दितिवोध्यं एवंचैकक्रियायोगेनपूर्वपूर्वस्योत्तरोत्तरगुणत्वेमाला
दीपकमितिफलितं ७५ सारंलक्षयति सारइतिनामइतित्वपेक्षारा

दीपकैकावलीयोगान्मालादीपकमुच्यते स्मरेणहृदयेत
स्यास्तेनत्वयिकृतास्थितिः ७५ सारोनामपदोत्कर्षःसार
तायायथोत्तरं सारंसारस्वतंतत्र काव्यंतत्रशिवस्तव ७६

लंकारस्तत्सारतापायथोत्तरंवीप्सायामव्ययीभावः उत्तरमुत्तरंपदो
त्कर्षः अत्यंतोत्कर्षइतिकेचित् व्यवस्थितोत्कर्षोवेतित्वन्येपदंव्यवस्थि
तत्राणस्थानलक्ष्माप्रिवस्तुषितिकोप्याः पदोत्कर्षइतिपाठस्तत्रस्तगम राम ७४

एवनाम इति निष्कर्षये इत्यन्ये सारता चेति पाठे उत्कर्ष इत्युपासारतात्तपदोत्त

रोत्तरं निष्कर्षेण तदासारालंकारः चत्वार्येते नोत्कर्षान्पसारत्तायानायमि

तन्निषेधापचकारादित्युपास्तं ऽप्रामाण्यत्वात्तं विनापीष्टसिद्धेरश्रयंच॥

श्लाघ्यगुणोत्कर्षकथनेनाश्लाघ्यगुणोत्कर्षकथनेन च द्विविधो बोध्यः तत्रा

द्यं उदा० सारमिति ऽअस्य संसार इत्यादिः सारस्वतंवाग्रूपम् तथा चात्र सार

स्वतकाव्यश्रीवस्तवानां यथोत्तरं श्लाघ्यउत्कर्ष इति तत्संगतिः द्वितीयोदा

हरणं तु पृथ्वीतावत्त्रिकोणेनगनगरवनग्रावरुद्धं तदर्द्धं तत्राप्यर्द्धं पुवन्त्यःश्रि

भ्रुगतवयसादूषितं तस्यचार्द्धं तत्रत्याज्याः स्वपुत्रश्वश्रुरगुरुजनैर्दूषि

तंत्वस्यचार्द्धमिथ्यावादैःगतानांस्तरमुरवरःरवः उंत्रलीति वोध्यम् ७६॥

उदारसारश्रेण्यत्रातिभिन्नोऽभिन्नतयागुणः मधुरमपी

पर्यन्तस्मात्तस्मात्कविर्वचः ७७॥

उदारसारंलक्षयति उदारेति यत्रोपमाननिष्ठगुणायेत्तयोपमेयनिष्ठोगु

णआधिक्येनकथ्यमानो भिन्नोपिप्राद्धमहिम्नाएकतयाभासते तत्रोदा

चं.
७५ रसाख्यालंकारः उदा० मधुरमिति तस्मात् मधुनः तस्मात् पीयूषात् त
स्मादस्मादिति पाठांतरमात्रं अत्र मध्वादिमाधुर्यापेक्षया काव्यनि
ष्टमाधुर्यमधिकं कथ्यमानं रसनाग्राह्यत्वस्य तत्रत्वेनात्र श्रोत्रग्राह्य
त्वेन वस्तुतो भिन्नमपि मधुरशब्दमहिम्ना तत्त्वेनैकमेवावभासते ७७॥
यथासंख्यं लक्षयति यथासंख्यमिति द्विधाऽपीः क्रियाकारकस्तथा॥

यथासंख्यं द्विधाऽप्यर्थाश्चेत्क्रमादेकैकमन्विताः शत्रुं मित्रं
विपत्त्यक्तं जय रंजय भंजय ७८ पर्यायः स्यादनेकत्र स्यादेकस्य
समन्वयः पद्मं मुक्त्वा गता चंद्रं कामिनीवदनप्रभा ७९॥०॥

द्विविधाअप्यर्थाः तेन कारकाणां क्रियाणां वा क्रमिकाणां क्रमेण कारकेषु क्रि
यासु वा प्रत्येकमन्वयो यथासंख्यालंकारः उदा० शत्रुमिति एवंभूतका
रकादिलक्ष्यमत्र बोध्यं ७८ पर्यायं लक्षयति पर्याय इति अत्र क्रमादित्यनु
षज्यते तेन विशेषालंकाराद्व्यावृत्तिः एकस्य क्रियाकारकान्यतररूपस्य राम
७५

तदन्यतररूपेऽनेकक्रमेणान्वयवर्णनेपर्यायालंकारः उदा० पद्ममिति अ
त्र पद्मचंद्रयोः कारकयोरूपमारूपकारकस्य क्रमेण आधारत्वेनान्व
यवर्णनं क्वचित् वदनपद्मेति पाठः सोप्युक्तार्थएव अस्यभेदांतरमन्या
त्र ७९ परिवृत्तिं लक्षयति परीति न्यूनेनाधिकस्याधिकेनन्यूनस्यवा
ग्रहणवर्णनंपरिवृत्त्यलंकारः इदमुपलक्षणं समेनसमस्यापि अ

परिवृत्तिर्विनमयोन्यूनाभ्यधिकयोर्मिथः जग्रा
हैकंशरंमुक्त्वाकटाक्षान्शत्रुयोषितां ८०॥

न्यत्रन्यूनत्वादिकंसंख्याकृतंस्वरूपकृतंचत्रापि उदा० जग्राहेति अ
त्रैकशरदानेनबहुकटाक्षग्रहवर्णनं एकशरेणशत्रून्निर्जित्यतद
यस्त्रीकटाक्षजालभाजनत्वंगतइति भावः समन्यूनोदाहरणंयथा
दत्त्वाकटाक्षमेणाक्षीजग्राह हृदयंमम मयात्तुसदनंदत्त्वागृहीतोम

चं॰
७६

दनज्वरः १ अत्र पूर्वार्धे समेन समस्योत्तरार्धेऽधिकेनान्यूनस्य ग्रहणं
भेदान्तरमप्यन्यत्र द्रष्टव्यं ८० परिसंख्यालक्षणमाह परीति एकत्र वा
स्तवाभावकथनपूर्वकमन्यत्र वस्तुनियंत्रणं परिसंख्या अन्यस्मिन्नि
तिपाठः मुक्ताप्रश्नपूर्वसंख्यार्थोऽन्यापि प्रश्नमध्यमणिन्यायेनोभया

परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयंत्रणं स्नेह
क्षयः प्रदीपेषु न स्वांतेषु नतभ्रुवां ८१ ॥०॥०॥

न्वयी उदा॰ स्नेह इति तन्भ्रेति पाठे स्नेहस्तत्तस्मात्कारणात्प्रदीपे
षु नेतिन किं तु नतभ्रुवां स्वांतेषु इत्यर्थः न स्नेहाभावस्य प्रदीपेषु
निषेधपूर्वकं कांताचित्ते व्यवस्थायनं स्वयमिति पाठे पि न जः ए
वमन्वयः तथा स्नेहस्वत्तच्चित्ते व्यवस्थापन स्नेहक्षय इति पाठे तु
आघवत् तत्रेति पाठे तु स्वांते निषेधपूर्वकं प्रदीपेषु स्नेहस्यावस्था
यनं इयमनेकविधेत्यन्यत्रस्पष्टं ८१ ॥

राम
७६

विकल्पं लक्षयति विकल्प इति विरुद्धकार्यद्वयव्यंजकस्य युगपत्कर्तुम
शक्यस्यात एव तुल्यबलस्य कार्यद्वयस्य युगपत्कल्पनं विकल्पालंकारः
चातुरीयुत इत्यस्य हृदय हृदयंगम इत्यर्थः तेन व्रीहियवादिविकल्प
निरासः उदा॰ कांतेति खंडितोक्तिर्नायकं प्रति कांताया मम चित्ते
ऽतः करणे स्वीयाधरे वाऽनुरागस्त्वन्य त्वं रक्तिमास्त्वं च कुर्वीत्यर्थः

विकल्पस्तुल्यबलयोर्विरोधाच्चातुरीयुतः कांता
चित्तेऽधरे वापि कुरु त्वं वीतरागितां ८२ ॥०॥

वापीतिपाठः अपि वीकालंकारे चापीत्यपपाठः क्वचिदिदमलंका
रद्वयं न इष्यते ममप्यनुरागस्य स्वाधरेऽन्यनायिकादत्तरक्तिम्न अयु
गपन्निषेधोक्त्या नायिकयोर्युगपदनुरागासंभवव्यंजनाल्लक्षणासं
गतिः एकदेशीतिवीतरामित्युक्तिप्रयोगः ८२ समुच्चयं लक्षयति ॥

पसामितिवहूनामिति क्वचित्पाठः अनेकक्रियाणामनेककारका
णांवा युगपत्एकत्रसंबंधकथनं समुच्चयालंकारः उदा॰ नष्टंपती
ति अत्रनाशावलोकनभ्रंशानामेकस्यान्तुगतत्वं राजानंप्रतिकथयु
क्तिः नाशोत्रराज्यच्युतिः भेदांतरमन्यत्र ८३ समाधिंलक्षयतिसमा

भ्रष्टंपति भूपस्यामेकसंबंधभाजांगुंफः समुच्चयः नष्टंपतिंपश्यात्य
भ्रंपत्तिंचतद्वद्विषः ८३ समाधिः कार्यसौकर्यंकारणांतरसं
न्निधेः उत्कंठितांचकलपन्जगामास्तंचभानुमान् ८४

धिरिति कार्योत्पत्तितमकारणसत्वेपि अविलंवेनकार्योत्पादक
कारणांतरकथनंसमाधिः तेनसमुच्चयाद्भेदः उदा॰ उत्कंठेतिप्रि
यासंगमसमुत्सुकतांनायिकायांनायकेवाकलपन्नित्यर्थः तेनत
स्यात्तस्यवोत्कंठात्तपतन्तमकारणसत्वेपिझटितिकार्यसिद्धिः। राम
७८

स्वरूपास्तकथनेनोक्तेतिभावः उत्कंठत्तामितिपाठांतरंतत्रार्थोऽस्मा

दित्वादच् ८५ प्रत्यनीकलक्षयति प्रत्यनीकमिति बलछत्रुपरा

भवासमर्थकर्त्रकशत्रुसंबंधिपदार्थपराभववर्णनंप्रत्यनीकालंका

रः उदा॰ जैत्रेति अत्रोत्पलाभ्यांस्वजैत्रेनेत्रेजेतुमशक्येऽत्तोनेत्रयोः

कर्णान्तविश्रांतत्वात्तदनुगत्तौकर्णौस्वस्यूष्यत्तयाधरीकृत्ताविति वर्णना

प्रत्यनीकंबलवतःशात्रोःपक्षेपराजयः जैत्रनेत्रानुगौक

र्णावुत्पलाभ्यामधःकृतौ ८५ प्रतीयमुपमानस्य हीनत्व

मुपमेयतः दृष्टंचेद्वदनंतस्याःकिंपद्मेनकिमिंदुना ८६॥

श्लक्ष्यत्वं ८५ प्रतीपेलक्षयति प्रतीपमिति उपमेयापेक्षयोपमानस्यही

नत्तावर्णनंप्रतीयालंकारः उदा॰ दृष्टमिति अत्रकिंपद्मेनेतिकार्याभाव

कथनेनन्यूनत्ता भेदांतरमप्यन्यत्र ८६ उल्लासंलक्षयति उल्लासइति य

दि अन्यमहिम्ना अन्यगुणेनान्यत्र दोषवर्णनं तदोल्लासः इदमुपलक्ष
णमन्यदोषेणान्यगुणवर्णनं ऽन्यदोषेणान्यदोषवर्णनमन्यगुणेनान्य
गुणवर्णनंचसइत्यपिबोध्यं इदंचचाधिकहिनासमुचितमितिबोध्यंत
त्राद्यमुदाहरति तदभेति अत्रसज्जनमहिम्नाधनस्यैवतद्दनाप्राप्त्य
णां दोषः द्वितीयोदाहरणंयथा लाभोऽयमेवभूपालसेवकानांन

उल्लासोऽन्यमहिम्ना चेत् दोषोह्यन्यत्र वर्ण्यते तद
भाग्यंधनस्यैव यन्नाप्नाप्नुयति सज्जनं ८७ ॥०॥

चेद्वधइति अत्रराज्ञः कौर्यदोषेणसेवकानांवधाभावोगुणः तृ
तीयोदाहरणंयथा काठिन्यंकुचयोः स्रष्टुर्वांछत्यःपादपद्मयोः निंदति
चविधातारंत्वद्वाटिषारियोषित्इति राजानंप्रतिमुद्रयाचायांकवु
क्तिः तयोःकाठिन्यंपादपद्मयोःस्रष्टुर्वांछत्यइत्यन्वयःकुचयोरि

त्यस्य कृतमिति शेषः तत्संबंधीति वा पलायनार्थं पेद्वितं पादयोः काठि
न्यमकृत्वा कुचयोः काठिन्यं कृतवतो विधेः पद्ममार्द्दवदोषेण दोषः त
योदाहरणं यथा परदारपरद्रव्यपरद्रोहपराङ्मुखः गंगा ब्रूते कदागत्य
मामयं पावयिष्यतीति १ अत्र तादृशपुरुषगुणेन गंगागुणः अन्येतपा
न्निष्ठो दोषस्तन्निष्ठगुणकल्पनं वा तस्य दोषस्यान्यनिष्ठत्वेन कल्पनं उ
ल्लासः सज्जननिष्ठधनराहित्यदोषस्य सज्जनत्वेन गुणवत्तस्य कल्पनात्त
द्द्वारा गुणवदनाश्रयणत्वेन धननिष्ठत्वेन वर्णनाल्लेशमित्याहुः ८७ तद

तद्गुणः स्वगुणत्यागादन्यतः स्वगुणोदयः पद्म
रागायते नासामौक्तिकं तेऽधराश्मितं ८८॥

णं लक्षयति तद्गुण इति स्वस्मिन्नगुणोदयः स्वगुणोदयः स्वस्मिन्नस्व
गुणत्यागेनान्यनिष्ठगुणसंबंधकल्पनं तद्गुणालंकारः उदाहरति प

न्मेपेति नायिकां प्रति नायकोक्तिः यतः ते अधरात्प्राप्तिः ते अधरोष्ठसं
लग्नं नासामौक्तिकं अतः पद्मरागवदारक्तमणिवदारक्तमेवेत्यर्थः॥
अत्र नासामौक्तिके चेतनत्वत्यागेनाधरोष्ठगुणसंबंधेन पद्मरागत्व
वर्णनं स्वगुणत्यागे स्वस्मिन्गुणोदय इति पाठांतरं तत्र सप्तमी
बोध्याः॥ ८८ पूर्वरूपं लक्षयति पुनरिति यत्र अन्यगुणसंबंध
कथनपूर्वकं पुनः स्वगुणसंबंधकथनं अन्यगुणसंबंधेनान्यथा

पुनः स्वगुणसंप्राप्तिर्विज्ञेया पूर्वरूपता हरकंठां
शुलिप्तोऽपि शेषस्त्वद्यशसा सितः ८९॥१०॥

भूतस्य पुनरन्यगुणसंबंधेन यथास्थितत्ववर्णनमिति यावत् तत्र
पूर्वरूपालंकारः उदाहरति हरेति अत्र अन्यदीयश्यामगुणसंबं
धपूर्वकं श्वेतत्वकथनं लिप्तोपीत्यनेन प्राक् श्वेतत्वसूचनं अत

एवंलक्षणोपुनः पदंतेनच प्रतिप्रसवः सूचितः राजानंप्रतिकव्युक्तिः ८६ प्रका
रांतरेणसर्वरूपतांलक्षयति यदितिपुनरित्यस्यानुषंगः यत्रवस्तुनोऽन्यथाउ
च्छिन्नंनष्टमितियावत् तथाभवतितदपिसर्वरूपंपुनस्तथास्यात्पुनर्भव
तीत्यर्थः वस्तुनाशकथनसर्ववस्त्वंतरेण तु वस्तुकार्यकथनंसर्वरूपालंका
रइतियावत् उदाहरतिदीपइति अत्रदीपेनिर्वापितेनाशितेपिकांचीसं

यद्वस्तुनोऽन्यथारूपंतथास्यात्सर्वरूपता दीपेनिर्वा
पितेप्यासीत्कांचीरत्नैरहंमहः ९०॥७॥७॥ ७॥

वंधिरत्नकांतिभिरिदंनसंवंधिमहः तेजउत्सवोवाआसीदित्यर्थः प्र
वृत्तेतुनोच्छेदः किंत्वन्यथाभावः अत्रतुउच्छेदएवेतिद्वयोर्भेदइतिभावः
९० अतद्गुणंलक्षयति संगतेति संगतान्यसंवंधिगुणेत्यर्थः संवंधेपि
संवंधिगुणाग्रहणकथनमतद्गुणालंकारः उदा० विभान्निति अत्ररवि

चं॰
८०

संबंधेपि तद्गुणाग्रहणवर्णनं इदं चैकराशिस्थत्वं तयोर्बोध्यं ८१ अनुगुणं लक्षयति प्राक्सिद्धेति प्राक्सिद्धस्यैव स्वगुणस्य परसंनिधानादुत्कर्षवर्णनमनुगुणालंकारः कश्चित्तु प्राक्सिद्धिं लक्षयति प्राक्सिद्धिरितिपरसंनिधानादनुगुणः स्वगुणोत्कर्षवर्णनं प्राक्सिद्धप्यलंकार इत्याह उदा॰ कर्णोत्पलानीति अत्रावतंसीकृतनीलोत्पलेषु कटाक्षसंनिधानेना

अ संगतान्यगुणानंगीकारमाहुरतद्गुणं चिरमल्लपिरवेर्मध्ये
प्रीत एव सदा शशी ८१ प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः
परसंनिधेः कर्णोत्पलानि दधते कटाक्षैरसितीनीलतां ८३॥
अवज्ञावर्णिते वस्तुगुणदोषादृतं यदि ग्लायंति यदिपद्मानि

गुणप्राक्सिद्धगुणोत्कर्षकथनं ८२ अवज्ञां लक्षयति अवज्ञेति अन्यगुणदोषाभ्यामन्यत्र गुणदोषयोरनारोपणीयत्वकथनमवज्ञालंकारः उदा॰ ग्लयंतीति अत्र ग्लायंतीति पद्मदोषेणचंद्रे दोषालाभस्य वर्णनं ८३ प्रश्नोत्तरं लक्षयति प्रश्नोत्तरमितिक्रमेणोन्नाविति पाठः प्र

राम
८०

श्नोत्तरयोरिति शेषः यत्र तयोः क्रमेणोक्तौ तयोरेवोत्तरमुत्तरस्तूपं वा यत्र
स्यूतं संलग्नं स्यादेपद्यभ्यर्णमिति यावत् तत्र प्रश्नोत्तरालंकार इत्यर्थः तेन प्र
श्नोत्तरकल्पे उत्तरेण वा प्रश्नकल्पेन प्रश्नोत्तरालंकार इति यावदिति केचि
त् अन्ये तु प्रश्नोत्तरक्रमेणोक्ताविति पाठमंगीकृत्य यत्र प्रश्नोत्तरयोः क्रमेणो
क्तौ स्यूतमव्यवहितं उत्तरं निबध्यते तत्रोत्तरनामालंकारः तेन व्युत्क्रमनि
बंधने व्यवहित निबंधने च नालंकारः स्यूतमित्युत्तरांतरसंबद्धंयमपोदाहृ
त एवोत्तरद्वयमतीताविनिकश्चिदित्याहुः अपरे तु पूर्वपाठमंगीकृत्य
कयोश्चित्क्रमेणोक्तौ प्रश्नोत्तरालंकारः उत्तरोत्तरे प्रश्नोत्तरभावे स्यूता
लंकार इत्यर्थः इदं द्वयमपि द्विधा आक्षमाक्षेपलभ्यं च तत्र द्वितीयोदा
हरणमाहेत्याहुः ममात्तु प्रतिभाति पूर्व एव पाठः प्रश्नोत्तरक्रमोक्तौ
तु इति पाठः अन्यतरत्र शेषपूरणसाम्यात् तथा च तयोः क्रमोक्तौ क
पनीयायामुत्तरमुत्तरं यावदुत्तरं स्यूतमभिवांछितं नरांतरेण सं
लग्नं यत्र वर्ण्यते तत्र प्रश्नोत्तरनामालंकारः यथात्रोत्तरं नादृशं वर्ण्ये

ते यत्र तत्रोत्तरनामालंकार इति उदा॰ यत्रासाविति वेतसी पंथ्या इत्यप
पाठः पांथेति पाठः यत्रैव वेतसी पांथेति क्वचित्पाठः अत्र पांथस्य कुत्र सरित्तर
ण मार्ग इति प्रश्ने आदेपलभ्ये यत्रासौ वेतसीति कामयमानायउत्तरं वेत
सी कुंजे स्वाहं दधामिति भावः अत्रैव कामयमानस्य काकूतस्य प्रश्ने संकेत
स्थलं मया कल्पितमित्यंगीकाररूपमुत्तरं कल्पामिति लक्षणं संगतिः नेद

प्रश्नोत्तरक्रमोक्तोनुस्यूतमुत्तरमुत्तरं यत्रैव वेतसीपांथ तत्रै
व सत्तरासरित् ८४ पिहितं परवृत्तांतज्ञातुरन्यस्य चेष्टित
म् प्रियेगृहागते प्रातः कांता तल्पमकल्पयत् ८५॥१०॥

मनुमानांतर्गतं साधन निर्देशाभावात् नापि काव्यलिंगं उत्तरस्य प्रश्नप्र
जनकत्वात् ८४ पिहितं लक्षयति पिहितमिति परसंबंधिवृत्तांतसंबंधि
ज्ञानान्यस्यान्यस्य चेष्टितं यः परवृत्तांतज्ञानपूर्वकं तदनुगुणान्यक्रिया
कल्पनं पिहितालंकारः उदाहरति प्रियेइति अत्र तल्पकल्पनस्य रात्रवन्य

त्यन्तोत्तोस्तीति ज्ञापनं कुर्वित्ति अन्यकान्तासंज्ञानपूर्वकत्वेनाहं त्वत्स्विता
नभिज्ञेति ज्ञापाचेष्टाया अभिप्रायः ९५ व्याजोक्तिं लक्षयति व्याजोक्तिरि
ति परभीत्या अन्यथा वस्तुतः शंकमानं प्रति अन्यथा व्याजेन कथन द्वारा
तद्वस्तुगोपनं व्याजोक्त्यालंकारः उदाहरति सखीति चौर्यरतव्यक्तधूलि
संबंधत्वेपि गृहारामेत्यादिकथनेन गुप्तस्तरत गोपनं मे देहे एते परागा
नधूलि रिति भेदांतरमप्यन्यत्र दृष्टव्यं शंकमानस्येति पाठः सोपेक्षी

व्याजोक्तिः केनचित्सम्यक् छद्मनावस्तुगोपनम् ॥
सखिपश्यगृहारामकेसरैरस्मिधूसरा ९६ ॥

केनचित्सम्यगिति पाठांतरं तत्र शंके तिशेषः केनचित्प्रकारेणप
रत्येत्यर्थः सम्यगित्यस्य शंकायामित्यन्यत्रान्वयः ९६ वक्रोक्तिं लक्ष
यति वक्रोक्तिरिति श्लेषकाकुभ्यामिलिताभ्यां व्यस्ताभ्यां वाका

कृत्या वा वाच्यार्थपेदाया वाच्यार्थांतरकल्पनं वक्रोक्त्यलंकारः उदा
हरति मुंचेति अत्र मानं मुंच दिनं प्राप्तमित्याशयेन कांतेनोक्ते सति
कांताशाब्दश्लेषेण नंदिनं प्राप्तं मा मुंचेत्यर्थं कल्पयित्वाऽऽह मंदमू
र्खं मम नंदिनो वलीवर्दस्य कुतः प्राप्तिस्तस्य महादेवसमीपे स्थितेर
भावात् श्लेषयोः काक्वोश्चोदाहरणे यथा अंगुल्या कः कपाटं घ
टयति कुटिले माधवः किं वसंतो नो चक्री किं कुलालो न हि धरणीध

वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थांतरकल्पनम्
मुंच मानं दिनं प्राप्तं नेह नंदी हरांतिके ८६ ॥

रः किं द्विजिह्वः फणींद्रः नाहं घोराहिमर्दी किमसि खगपतिर्नो हरिः किं
कपींद्रः इत्येवं सत्यभामाप्रतिवचनजितः पातु वश्चक्रपाणिः १ उपकृ
तं बहु नाम किमुच्यतां सुजनता भवता प्रथिता परं विदधदीदृश

स्येत्याद्यपि: भाविनोप्युपलक्षणमिदंतदावोध्याभावः

मेवसदासरवेस्त रवितमास्वततः शारदांशातं २ अत्रापकारिणेपन्वया
योग्येरूपकृतादिपदैः स्वार्थेविपरीतंलक्ष्यते नचतत्रवाच्यस्यकर्थं।
चित्प्रवेशः नवोपकारापकारविवेकोनास्तीतिव्यंग्यम् ८७ स्वभावो।
क्तिंलक्षयति स्वभावोक्तिरिति चस्वरूपंजात्यादिषु हरिणत्वादिषुसत्स्व

स्वभावोक्तिःस्वभावस्यजात्यादिषुचवर्णनं
कुरंगैरुत्तरंगाक्षैःस्तब्धकर्णैरुदीक्ष्यते ८८

यत्स्वभावस्य वर्णनंनतुसत्ता इत्यक्षरार्थः जात्यादयनुरूपस्वभावकथ
नंस्वभावोक्त्यलंकारः उदाहरति कुरंगैरिति नायिकांप्रतिनायकोक्तिः हे
उत्तरंगाक्षिचंचलाक्षिकुरंगैर्हरिणैः उत्तरंगाक्षैरितिपाठे हरिणविशेषणं
अत्रस्तब्धकर्णैरितिमृगजाति स्वभाववर्णन ८८ भाविकंलक्षयति भाविकमि
तिभूतानांभाविनांवाऽप्रत्यक्षाणांसाक्षाद्दर्शनस्यसाक्षात्कारवर्णनंभाविकालंका

र: भव्यार्थेति पाठे म्रतस्य भव्यस्य मप्रास्तस्यापि

कवेरभिप्रायोपन्नास्तीति योगार्थः उदा० अलमिति पर्याप्तमत्यंतं वेत्यर्थः
रणाभूमिवर्णनमिदं अत्र रणभूमौ युध्यंते इति भूत देवदैत्यसंग्रामस्य
वर्त्तमानत्वेन कथनात्तादृशयुद्ध विलोकन कथनमिति भावः स्थलभीष
ण तोयवर्णनाया त्ती तयुद्धस्य वर्त्तमानमेत्तण वर्णनमिति तात्पर्यं यथा
वाजनमात्रेति पश्यामित्तव लोचने भाविभूषण संभारांसादात्कुर्वेत्तवा

देशात्मविप्रकृष्टस्य दर्शनं भाविकच्छविः त्वंवसन्
हृदये तस्याः साद्यात्त्वंचेक्षुरी क्ष्यते २०० ॥ ७ ॥

कृत्तिं अत्राद्ये धर्मे भूतस्य द्वितीये भाविनो दर्शन प्रत्यक्षण वर्णनमिति ता
त्पर्यं नचायं प्रसादाख्यो गुणः भूतभाविनोः प्रत्यक्षायमानत्वेन तस्या
हेतुत्वात् नाद्भुतो रसः विस्मयं प्रत्यस्या हेतुत्वात् नातिशयोक्तिर
ध्यवसायाभावात् ९९ भाविकछविकच्छविं लक्षयति देशेति देशेनात्मना
वापि प्रकृष्टस्यापि स्यसाद्यात्कारो यत्र वर्ण्यते तत्र भाविकच्छविनामालंकारः

उदा० मिति अत्रोभयतोवि प्रकृष्टानापि कामदृष्टिप्रपनायकं प्रतिदूती।
वाक्येनाद्दष्टमाऽन्यहृदितिष्टतया विप्रकृष्टस्यकामाभिन्नस्य दर्शनव।
र्णनं २०० उदात्तलक्षयति उदात्तमिति यत्र श्लाघ्याऽऽरुद्धिः संपदाधि
कं श्लाघ्यं चरितं वा अन्योपलक्षणत्वेन कथ्यते तत्रोदात्तालंकारः

उदात्तमृद्धिश्चरितं श्लाघ्यं चाऽन्योपलक्षणं सो
नौयस्याऽभवद्युद्धं तद्धूर्जटिकिरीटिनो ११०॥

अन्योपलक्षणमिति श्लाघ्यमितिच चरितस्यैव विशेषणमिति क
स्मिन् तत्र द्वितीयं उदा० सानाविति अत्र किंचित्पर्वतस्थिरस्वरस्यपु
ण्यभवार्जुनसंबंधित्वोपलक्षकत्ववर्णनं प प्रप हिमालयस्यसानौ
ऽङ्गेऽन्यत्रत्वन्यथाऽसयुक्तः। अत्युक्तिं लक्षयति अत्युक्तिरिति
अद्भुतमनन्यसाधारणमतथ्यमसत्यं शौर्यदानादिवर्णनमत्युक्ति

नामालंकारः उदा० त्वयीति अत्र कल्पवृक्षा अपि त्वां याचंत इति तव
याचकाः कल्पवृक्षतुल्या दातारो जाता इति वा मिथ्या दानात्युक्तिः ए
वमलंकाराः प्रतिपादिताः अन्यत्र त्वन्येपि केचनोक्ताः २ अथ केषां
चिदलंकारिकाणां मतमाह पद्यद्वयेन रसेति रसाश्च भावाश्च तदा
भासाश्च रसाभावाभासाश्च भावशांतिश्च तन्निबंधनास्तदुक्ता

अत्युक्तिरद्भुतातथ्यशौर्योदार्यादिवर्णनं त्वयि दातरि रा
जेंद्र याचकाः कल्पशाखिनः २ रसभावतदाभासभावशां
तिनिबंधना रसवत्प्रेयऊर्जस्विसमाहितमयी भिदा० ३॥

रसवत्प्रेयऊर्जस्विसमाहितं युक्तिसिद्धतया समाधानं भावोक्तः॥
तन्मय्यस्तद्रूपा अभिधाः नामानि येषां ते तत्सवाभिधा इत्यर्थः पंचा
तन्मय्यः अभिदाः भेदा येषां ते कर्मधारयो वा तन्मयी भिदेति पाठे निबं
धनेति निर्विसर्गः पाठः

तत्र भिन्नं पदं तज्ज्ञेतुकान्तद्रूपाभिदाभेद इत्यर्थः इत्यर्थ आद्यश्लोकस्य
तत्र यत्र रसो रसांतरस्य भावस्य भावस्य वांऽगत्वेन कल्प्यते तत्र रसवद
लंकारः निर्वेदादित्रयस्त्रिंशाङ्को भावः गुरुनृपदेवतादिविषयरतिरू
पो भावश्च यत्र परांगत्वेन कल्प्यते तत्र प्रेयोऽलंकारः अनौचित्येन प्रव
र्त्तौ रसाभासभावाभासत्वेन प्रसिद्धौ तौ यत्र परांगत्वेन कल्प्यते तत्रोर्ज
स्विदलंकारः भावस्य प्रशाम्यदवस्थान्त्वरूपा भावशांतित्वेन प्रसि
द्धा सा यत्र परांगत्वेन कल्प्यते तत्र समाहितालंकार इति भावः ३ भावानामि

भावानामुदयःसंधिः शबलत्वमिति त्रयः अलं
कारानिमान्सप्त केचिदाहुर्मनीषिणः ५॥१०॥

ति पूर्वमेलनेन सप्तेत्यर्थः भावानामाधिक्यमुदयः द्वयोर्भावयोः प
रस्परस्पर्द्धा संधिः बहूनां भावानां पूर्वपूर्वोपमर्द्देनोत्पत्तिः शबलता

चं
८५

कश्चित्तुभावद्वयस्यक्रमेणाकल्पनेसंधिः अक्रमेणाकल्पनेशाबल
तेत्याह एतेषांमन्यांगत्वकल्पनेत्रयः एवंचचतुर्विधपर्वमिलित्वा
एतेत्रयः रसवत्प्रेयऊर्जस्वित्समाहितभावोदयभावसंधिभावशाबल
त्वाख्याः सप्तालंकाराः सिद्धाइतिकेषांचिन्मतंकेचिदित्यरुचिवीजंतत्र्अ
लंकाराणांशाब्दार्थनिष्ठोपकारजननद्वारारसोपकारकत्वंरसस्तुव्यंग्य
तयासर्वप्रधानीभूतत्वादलंकार्यइतितस्यशाब्दार्थरूपान्योपकारकत्वा
संभवान्नालंकारत्वंसंभवतिभावानामपिनीरसेकाव्येप्राधान्यमव्याहृ
तमेवाततोनैषामलंकारत्वसंभवइति केचित्तत्ररसाद्युपकारकत्वमात्रे
णालंकारशब्दप्रयोगोयुक्तइत्याहुः ध्वनिस्तुअलंकाराणांरसोपकार
कत्वेशाब्दार्थनिष्ठचमत्कारजननमेवतत्रद्वारंमानाभावात्रूपकादे
स्ततोपितस्याधिकतयाप्रयोजकत्वात् किंतुयथाकथंचिद्रसोपकारक
त्वमात्रंसाक्षात्परंपरासाधारणंतेनरसादीनामपिरसोपकारकत्वे
भवत्येवालंकारत्वं यथाहुः प्रधानेऽन्यत्रवाक्यार्थेयत्रांगंतुरसादयः का

राम
८५

व्येतस्मिन्नलंकारो रसादिरिति मेमतिरिति अत एतेषामुक्तमलं
कारत्वमित्याह एवंचकेचिदिति रूजार्थेन निषेधार्थं एवंचात्र्अलंका
रिकैकवेद्या एतेरिति तत्व ५ ऊ आदीनांच तएणिमलंकारांतरत्वं निराच
ष्टे ऊद्विरिति पद्येन पत्रैक एवालंकारस्तत्र ऊद्विः द्वयोरलंकारयोर्यत्रै
कोलंकारोऽन्योपपादकस्तत्रैकप्रधानत्वपरस्परानुपपादकयोर्द्वयोस्ति

ऊद्विरेकप्रधानत्वं तपासंसृष्टिसंकरौ एतेषा
मेव विन्यासानालंकारांतराएपमी ५ ॥ ७ ॥१०॥

लतंडुलन्यायेन प्राधान्ये संसृष्टिः अलंकारयोर्नीरक्षीरन्यायेनांगांगि
भावः संकरः अंगांगिभावाभावेन प्रधानयोरलंकारयोः संदेहोद्विती
यः संकरः अलंकारद्वयस्यैकपदप्रतिपाद्यत्वंतृतीयः संकरः तदुक्तं
विश्रांतिजुषामात्मन्यंगांगिभां हंतु संकरः एकस्यच ग्रहेन्यायदोषाभा
वादनिश्चयः

व्यवस्थितिरलंकृत्योः पदैकान्तप्रविष्टयोरिति उत्तरार्द्धयाः सोऽपि सं।
कारइत्यनुषज्यते तथा चैतेषामेव प्रसिद्धानां प्राग्उक्तानामलंकाराणां
विन्यासात्र ष्टुध्यादीनामलंकारांतरत्वं क्रमभेदेपि न दर्थभेदाभावात्
समुदायरूपानतिरेकाच्च न च सरोरसइत्यादौ क्रमभेदेन पदार्थभेदा
दत्रापि भेदोऽस्त्विति वाच्यं तत्रापि वर्णभेदानंगीकारात् अर्थगमक।
स्वरूपपदत्वावच्छिन्नस्यार्थभेदादेव भेदसिद्धेः अतः क्वचिदेकस्यैव
विन्यासः क्वचिदन्यथेति विन्यासरूपक्रमभेदमात्रेत तदलंकारवुध्यन
दयात्रालंकारांतरत्वं अन्यथा रसानामपि विन्यासभेदे रसांतरत्वाप।
त्तिरितिभावः विज्ञानादितिपाठः क्वचित्तस्पष्टोऽर्थः विन्यासाइतिक्व
चित्पाठस्तदापतत्संतत इति स्मरणीयं ५ दूषणांतरमाह सर्वेषां चेति
एवं सति सर्वेषामन्येषामप्यलंकाराणां न्यूनाधिकरूपतया विस
दृशानामलंकारांतरत्वापत्तिः यथा सादृश्यरूपकस्य प्रक्लृप्तित।
सादृश्यरूपस्याधिक्यं इवादिपदाभावे लुप्तोपमाया न्यूनत्वं अत

तत्र रूपकोपमातो भेदाभाववदुक्तस्थलेपि न भेद इति तात्पर्यार्थः आ
दरार्थस्तु प्रतिद्वंद्वता विरोधितया प्रतिद्वंद्व आधिक्यं ताभ्यां भेदभाजां
सर्वेषामन्येषामलंकाराणां भिन्नः प्रकारः कल्पित उपाधिः प्रकारोऽन्यत्रा
पि संभवत्यो जनीयः स्यादिति तेषामप्यलंकारांतरत्वं स्यादिति प

सर्वेषांच प्रतिद्वंद्वप्रतिद्वंद्वभिदामतां उपाधिः
कश्चिदुद्भिन्नः स्यादन्यत्रापि संभवात् ६ ॥०॥

दा प्रतिद्वंद्वं विसदृशं प्रतिद्वंद्वः सदृशं ताभ्यां भेदवतामित्यर्थः एवं वा
लंकारपरिगणनमेव न स्यादिति भावः एतेनात्र पूर्वार्द्धेन प्रतिद्वंद्वा
दिलक्षणेन विसदृशासदृशरूपाणि पूर्वोक्तान्यलंकारांतराणीतियाव
त् इति द्वितीयार्धे नैकालंकारप्रकारो अलंकारांतरमस्तीति सोप्यहनी
पद्युच्यते इत्येवं वरमस्य व्याख्यानमपास्तं मूलस्वरसभंगापत्तेः ६॥

मालेति पद्यमकत्वग्रकात्वात्कैश्चित्पक्तं तदसत् स्वयोजत्वान्न त
स्याहिनन्वेवं मालोपमादीनामप्यलंकारांतरत्वं न स्यादिति चेन्नत्यै
वेत्याह मालेति भूयसामलंकाराणामनुक्तानामेषामुपमादीनां
माला मालाकारेण विन्यासः परंपरा रशनाद्याकारेण विन्यासस्त्वा
नुकूलके चमत्कारजनके भवतः स्वार्पकतत्र हेतुगर्भं विशेषणं
ह्यलंकारांगत्तांगत्तेपत्तोऽलंकारांगतां गत्ते अलंकारोपकारत्वं प्रा कथ

मालापरंपराचैषांभूयसामनुकूलके मनुष्ये
भवतःक्वापि ह्यलंकारांगत्तांगत्ते ७॥ ९॥ ९॥

प्तेइत्यर्थः मनुष्येइवेति दृष्टांतवशात्काव्ये इत्यध्याहर्तव्यं क्वा
पीत्युभयविशेषणं एवं च क्वापि मनुष्ये यथाऽलंकाराणां मालापरं
पराच तत्पैवानुकूले शोभाजनके भवतस्तथा क्वापि काव्ये अलंका राम

तासांमालापरंपराचतेषांचमत्कारजनकेभवति: तयाचमालोपमादया।
नोपमामालारूपकादीनामपिनालंकारांतरत्वमलंकारांतरत्वबुध्याभा
वात्तदलंकारत्वबुध्यतयायाच्चेतिभाव: ७॥०॥ अथरसवदादिक्रमेणो
दाहरणानि अयंसरसनोत्कर्षीपीनस्तनविमर्दन: नाभ्यरुजघनस्पर्शी
नीवीविस्रंसन:कर: १ अत्रशृंगारकरुणस्यांगं आमीलितालसविवर्ति

पदेपदार्थेवाक्यार्थेवाक्यार्थेस्तवकेतथा एतेभवंतिवि
न्यासा:स्वभावातिमायात्मका: ८॥

ततारकाक्षीमत्कंठबंधनदरम्लापबाहुवल्ली प्रस्वेदवारिकणिकांचितगंड
बिंबासंस्मृत्यतामनिशमेतिनशांतिमंत: २ अत्रसंभोगशृंगार:स्मरण
भावस्यांगं स्वचविप्रलंभस्येतिप्रेयसोपीदमेवोदाहरणं वनेः दिव्यकला
सक्ता:परिहृत्यनिजस्त्रिय: त्वद्वैरिवनितावंदेपुलिंदा:कुर्वतेरतिं ३ अ

त्र शृंगाराभासो राजविषयरतिभावस्यांगं त्वयि लोचनगोचरं गते सफलं
जन्म नरसिंह भूपते अजनि श्रममेति सादरं युधि विज्ञापयति द्विषां गणः
अत्र प्रभुविषयरतिभावस्य तद्विषयद्विषद्गुणरतिरूपो भासोऽगं अवि
रलकरवालकंपनैर्भ्रुकुटीतर्जनगर्जनैर्मुहुः ददृशे तव वैरिणां मदः स
गतः क्वापि तवेक्षणेक्षणात् ५ अत्र मदाख्यभावस्य प्रशमो राजविष
यरतिभावस्यांगं मधुपानप्रवृत्तास्ते सुहृद्भिः सह वैरिणः श्रुत्वा कु
तोपि त्वन्नाम लेभिरे विषमां दशां ६ अत्र त्रासोदयो राजविषयरतिभा
वस्यांगं जन्मांतरेण रमणस्यांगसंगसमुत्सुका सलज्जा चांतिके स
ख्याः पातु नः पार्वती सदा ७ अत्रौत्सुक्यलज्जयोः संधिर्देवताविषय
रत्यंगं क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोपि दृश्येत सा दोषाणा
मुपशांतये श्रुतमहो कोपेपि कांतं मुखं किं वक्ष्यंत्यपकल्मषाः
कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खलु युवा धन्योऽधरं
धास्यति ८ अत्र वितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिचिंतानां शबलता वि
प्रलंभशृंगारांगं ९ ॥

हंसीव कृष्ण ते कीर्त्तिः स्वर्गगामवगाहते अत्र भुजिः तलेष्ववेपंत महीरु
हां खगच्छायासु दामास्तत्कंपितानां शाखाग्रां कसिंहेनत्तमोगजानां लू
नाकृत्तीनामिव गात्रखंडाः ८ अत्र शाखाग्रांकसिंहेनत्तमोंगजानामि
ति रूपके उत्प्रेक्षायां अंगेन उपपादकत्वात् रूपकाभावे हि छायाः
लूनगात्रखंडा इवावेपंत इत्येतावदुक्तावुपमैव सिध्येत् वेपनादिसा
धर्म्यात् न छायानां सद्यः कृत्तगात्रखंडतादात्म्यसंभावनरूपोत्प्रेक्षे
त्यत्र एकप्रधानत्वं कुसुमसौरभलोभपरिभ्रमरसंभ्रमसंभृतशो
भया चलितया विदधे कलमेखलाकलकलोलदृशाऽन्यया १०॥
अत्र शब्दार्थालंकारयोरनुप्रासोपमयोः संसृष्टिः अंगुलीभिरिव
केशसंचयं संनिगृह्य तिमिरं मरीचिभिः कुड्मलीकृतसरोजलो
चनं चुंबतीव रजनीमुखं शशी ११ अत्रांगुलीभिरितिवाक्योक्त्या स
रोजलोचनमिति समासोक्त्या चोपमायां गम्यत्वयोः साम्यमानैव शा
शिकर्त्तृकनिशामुखचुंबनोत्प्रेक्षा निशाशशिनोर्दंपतिव्यवहार

समारोपरूपसमासोक्तिगर्भे वीप्साप्युक्ते उपमयोरुभयत्रोप्याप
कत्वाविशेषात् समासोक्तिगर्भितां विनाचुंबनोत्प्रेक्षयानिएलंबन॥
त्वाच्च तत्तत्स्त्रात्रोत्प्रेक्षासमासोक्त्योरेककालयोः समप्राधान्य
मितिसमप्रधानसंकरः विलीयेंदुःसाक्षादमृतरसवापीयदिभवे
त्फलंकस्तत्रान्योयदिचविकचेंदीवरवनी ततःस्नानक्रीडाजनित
जडभावैरवयवैः कदाचिन्मुंचेयंमदनशिखिपीडाव्यतिकरं १२॥
अत्रपद्येतावत्साधनंसंपद्येततदातापः शाम्यतीत्येतावत्यर्थेकवि
संरंभस्तत्रदोपात्तसिध्यर्थमूहइतिसंभावनालंकारः एतावत्सा
धनंकदापिनसंभवत्येवात्तस्तापशांतिरपिगगनकुसुमायमाने
त्यर्थेकविसंरंभस्तत्रदोपात्तमिथ्यात्वसिध्यर्थंमिथ्यार्थांतरकल्प
नारूपामिथ्याध्यवसितिरितुभयथासंभवात्संदेहसंकरः विधु
करपरिरंभादात्तनिष्यंदपूर्णैःशशिदृषदुपक्लृप्तैरालवालैस्तरू
णां विफलितजलसेकप्रक्रियागौरवेणव्यरचिसहृत्तचित्तस्तत्र

भैमीवनेन १३ अत्र हि प्रतिपाद्यमानोऽर्थः समृद्धिमद्वस्तुवर्णनमुदा

त्तमितिलक्षणानुसारादुदात्तालंकाररूपः असंबंधे संबंधकल्पनमतिश

योक्तिरितिलक्षणादतिशयोक्तिरूपश्च नात्रांगांगिभावः एकेनापरस्या

नुत्थापनात् नापि समप्राधान्यं द्वयोस्तयोस्तुल्यशब्दप्रतिपाद्यत्वेन भि

न्नशब्दप्रयुक्तार्थभेदाभावात् नापि संदेहसंकरः एकालंकारकोट्या

तदन्यालंकारकोटिविरोधाभावात् तस्मादेकत्र प्रतिपाद्येऽर्थेऽलंकार

द्वयलक्षणयोगात्तयोरेकवाचकानुप्रवेशात्त्वक्षणः संकरः क्वचित्सं

करसंकरोपि यथाः मुक्ताः केलिविहारस्त्रगलिताः संमार्जनीभिर्हृताः

प्रातः प्रांगणसीम्नि मंथरचलद्बालांघ्रिलाक्षारुणाः दूराद्दाडिमबीज

शंकितधियः कर्षंति केलिशुका यद्विद्वद्भवनेषु भोजनृपतेस्तत्त्याग

लीलायितं १४ अत्रोपपत्तिरन्यत्र स्पष्टा यन्मध्यदेशादपि ते सूक्ष्मंलो

लक्षि दृश्यते मृणालसूत्रमपि ते न संयाति स्तनांतरे १५ एतदधिकं वि

सदृशं मधुव्रतौघः कुपितः स्वकीयमधुप्रयापद्म निमीलनेन द्विवंस

माक्रम्यबलात्स्वधांशोः कलंकमकेस्फुटमातनोति १६ एतच्चत्रनीकं
सदृशं अनकान्तकनकवितरणजलसंभ्रन्तकरतरंगितार्पितनेत्रभ्र
णातिरिव मतिर्मतिरिव चेष्टा चेष्टेव कीर्त्तिरतिविमला १७ इयंसाधारण
धर्मेणरक्षानोपमा मतिरिवमूर्त्तिर्मधुरामूर्त्तिरिवसभाप्रभावयुतानस्य
सभेवजयश्रीःशक्याजेतुंन्तपस्यनपरेषां १८ इयंधर्मभेदेनसा किसलय
करैर्लतानांकरकमलैःकामिनांमनोजयतिनलिनीनांकमलमुखैवंमुखै
डभिर्योषितांमदनः १९ अत्ररक्षानारूपकं अनयेनैवराज्यश्रीर्दैन्येने
वमनस्विता मम्लौसाऽपविषादेनुपद्मिनीवहिमांभसा २० ज्योत्स्नेवन
यनानंदः सुरेवमदकारणं प्रभुतेवसमाकृष्टसर्वलोकानितंबिनी २१
एते प्राग्वन्मालोपमे एकस्यैव वह्वुपमानोपादानात् अलौकिकमहा
लोकप्रकाशितजगत्त्रयस्तूयतेदेवसद्वंशमुक्तारत्नंनकैर्भवान् इदंमा
लारूपकंपरेषांमतंदूषयितुमुपन्यस्यतिशाब्देत्यादिपद्यद्वयेन तत्रशाब्दे
अनुप्रासयमकादयःपदेइतिक्वाचित्कपाठस्तु युक्तपदार्थे उपमारूपका राम

दयः वाक्यार्थदृष्टांतादयः वाक्यार्थस्तवके निदर्शनादयः तथाशब्दः
समुच्चये एते अनुप्रासादयो विन्यासाः रचनाविशेषाः स्वभावातिश
योक्तिपदशक्तिस्वभावादतिशयात्मकाः अतिशयोक्तितो भिन्नाः ८॥
तदेव स्पष्टयति कस्येति सर्वत्रेत्यादिः अमी अनुप्रासादयोऽलंकाराः
सर्वे प्रायेणातिशयोक्तितो न भिन्नाः कस्यचिदतिशयोक्तिरित्यन्वर्थ
स्य सर्वेषु संभवात् अत सर्वेषां तद्रूपत्वमेव न भेदस्तत इति तेषां तद

कस्याप्यतिशयस्योक्तेरित्यन्वर्थविचारणात् प्राये
णामीत्यलंकारा भिन्ना नातिशयोक्तितः ६६॥

तंर्भाव एवोचित इत्याशयः यत्रन्यस्तत्वकृत एवं चमत्कारो नातिशय
कृतस्तत्रास्तु अलंकारांतरत्वमिति सत्यपि तु प्रायेणेति एतेन पदार्थ
रूपकादयः उपमादयो वाक्यार्थदृष्टांतादयो वाक्यार्थस्तवके इति वा

ख्यानमपास्तं उपमादीनां पदार्थवृत्तित्वात् वस्तुतस्तु एवं योजने श्लो॥
कयोः पौनरुक्त्यापत्तिः तस्मादिदमर्थः एवमलंकारानुक्त्वा तदाश्र
यान्वदन् उपसंहरति पद्येन श्लोके इति विन्यासस्वभावातिशयात्मका
इति समस्तपाठः पूर्वार्द्धस्योक्त एवार्थः विन्यासस्य स्वभावस्यातिशय
स्य एतत्त्रितयात्मकाः तन्निष्ठा एते अलंकाराः प्रागुक्ता विन्यासादिस्व
रूपा इत्यर्थः तत्रोपमारूपकादयोऽनुप्रासादयश्च स्वभावातिशयवत्
ततो भिन्ना विन्यासात्मकाः स्वभावोक्तिप्रभृतयः स्वभावात्मकाः अ
तिशयोक्तिप्रभृतयोऽतिशयात्मका इत्युत्तरार्धार्थः अपपरेषां मतं दू
षयितुमुपन्यस्यति कस्येति अस्य तु प्रागवदेवार्थः कस्यापीत्यस्य मते
इति शेष इति विशेष इति वा बोध्यं ८ दोषमेवस्वमतेनाह अलंकारेति सा

अलंकारप्रधानेषु दध्वानेष्वपि साम्यतां वैलक्षण्यं
प्रतिव्यक्ति प्रतिभाति मुखेष्विव १०॥०॥०॥०॥

म्यतामित्यत्रैकोभावप्रत्ययश्छंदोऽनुरोधात् स्वार्थे समतामित्यर्थः अ

त्तियोक्तित्वेनालंकारत्वेनवासमेष्वपि उपमाद्यलंकारभेदेषुप्रतिव्यक्ति
प्राप्तिस्विकं वै लक्षणं प्रतिभाति प्रत्यक्षेणोप लभ्यत्ते मुख्यत्वेनसमाने
षु मुख्येष्विवेत्यर्थः तथाचरसिकानामालंकारिकाणांस्वानुभ वैकवेद्य
एषांभेदइति तस्यापलापान र्हत्वमितिभावः ९ उपहसन् उपसंहरत्ति
अलंकारेष्विति सुधीनां तथैष्वपि प्रतिस्वं भिन्नेषुकुंडलादिषुनाऽस्या
नाऽऽग्रहो यदि तत् तदोपमाद्यलंकारेष्वपिजीर्णमुनिव्यवहारानुरोधे
नार्वाचीनसकलकविकल्पितेषुनाम्नामुपमादिसंज्ञानांन्नायः पाठोनेष्यता मा८
मित्यर्थः नाम्नान्नाम्नाप इष्यतामितिपाठे त्वमत्ते पद्यायपाकर्पवित्सा
म्येनोक्तभेदपुरस्कारेणोक्तेषूप्यर्वाचीनभेदेषूपमादिषुउपमादिना
म्नाकृत्वा अनाम्नायः अकपमं यदि तत् तदातथ्यकुंडलकटकादयो
भेदा अपिनांगीकार्याः स्युस्तत्रापि यथाकर्पवित्साधर्म्यसत्वात् कुंड
लादिच्छायये वात्रालंकारपदप्रयोगात् अत्रपक्षेतथैषुकुंडलादिषु
मनीषिणामनास्था इष्यतामित्यन्वयः अर्वाचीनाउपमादयः नाम्नाऽऽनाम्नापइति

पाठं कुंडलादिभेदवद्वैतेषामपि भेदऽआवश्यको वैलक्षण्यानुभवादि
त्याशयः यद्वा तथ्येषु अनुभवैकलेख्यभेदेषु अलंकारेषूपपादनादरस्त
दोपमादिषु तेषु उपमादिनाम्नामनाम्नायोऽनादरोऽस्तु विजातीयबुद्धि
कृतविषयभेदस्तु न लक्षणादिदुर्निवार इत्यर्थः अनुभवैकसिद्धोऽलं
कारभेद इत्याशयः यद्वा नन्नूपमादितो ग्रंथांतरसिद्धा इव तोऽन्येष्व

अलंकारेषु तथ्येषूपपादनास्थामनीषिणां तदर्वा
चीनभेदेषु नाम्नाम्नायोप्यऽदूष्यताम् ११॥०॥

लंकारतया निरुक्तास्तत्र किं बीजमत आह अलंकारेष्विति तथ्यार्वाचीन
योः सर्वग्रंथलिखितैतदुपमात्वलिखितयोरलंकारताप्रयोजकधर्मसाम्ये
पि यदि तथ्येनालंकारपदप्रयोगस्तदाऽर्वाचीनेपि मास्तु तत्र सत्वे अत्रापि
भवत्येव तथा च प्राचीनैरतिरतिवज्ञानामपि स्वकल्पितानामलंकार
ताप्रयोजकरूपवत्त्वेन ततत्वमुचितमेत्याशय इति दिक् विद्दग्धधर्मो

तत्र तु मार्कंडेयेन वज्रं प्रति स्वल्पतरा अलंकारा उक्ताः तथा हि एकैकस्य
तु वर्णस्य विन्यासोयः पुनः पुनः अर्थगत्यात्वसंख्यातमनुप्रासं प्रचक्षते:
अन्यार्थत्वकृतं राजन् ग्राम्यतामुपगच्छति शब्दसमानं भिन्नार्थं यमकं की
र्त्तितं पुनः आदौ मध्ये तथैवांते पादस्य तु तदिष्यते संदष्टकसमुद्गाख्यौ
तथैव यमकौ मतौ समस्तपाद यमकं दुष्करं परिकीर्त्तितं उपमानेन तुल्य
त्वमुपमेयस्य रूपकं रूपकाभ्यधिकं नाम तद्देवं गुणाधिकं गुणानां ॥
व्यतिरेकमुदाहृतं उपमानविरुद्धैश्च गुणैस्तदपरं मतं द्व्यर्थवाचकैः
शब्दैः श्लेष इत्यभिधीयते अन्यरूपस्य चार्थस्य कल्पनायाऽन्यथा भ
वेत् उत्प्रेक्षाख्यमलंकारं कथितं तत्तुराजनैः उपन्यासस्तथाऽन्यः स्या
त्प्रस्तुताद्यत् कश्चिद् भवेत् ज्ञेयः सोऽर्थान्तरन्यासः पूर्वार्थानुगतो
यदि उपन्यासेन चान्यस्य यदन्यः परिकीर्त्यते उपन्यासमलंकारं तन्न
रेंद्र प्रकीर्त्तितं हेतुं विना विततता प्रोक्ता सा तु विभावना प्रोक्ता चा ॥
तिशयोक्तिस्तु अतुलैरूपमागुणैः यथास्वरूपरूपजं वार्त्तेति यदि

कीर्त्तितं भूपसाम्रुपदिष्टानां निर्देशः क्रमएतस्यो यथासंख्यमि
तिप्रोक्तमलंकारं पुरातनैर्विशेषप्रथना उक्ता विशेषोक्तिस्तथान
पयाक्रियाचान्यलदाविरोधस्फुरद्रूपतेस्तुतिरूपेणयानिंदानिंदा
स्तुतिरिहोच्यते निंदास्तुतिस्तद्वेवोक्ता निंदारूपेयास्तुतिः वस्तुनस्तु
पमानेन दर्शनं तन्निदर्शनं विंवानयोस्यादुपमानुपत्रतेनेव तत्र
स्येवभवेन्न्वीरतमन्त्रयाख्यं कथितं पुराणैरेतावदुक्तं नवलेशमा
त्रमिति ॥ अथदूषणामितिपाठांतरं नात्रार्थभेदोस्पष्टं॥

महादेव इति चतुर्थः स्वेकोपंचरवपरमयूखः समनसः
इतिजयदेवविरचितेचंद्रालोकेपंचमोमयूखः ५॥

न्यत्प्राग्वत् महादेव इति पूर्ववत् विशेषमाह चतुर्थ इति एकेन
सहितः सेकश्चतुर्थः पंचम इत्यर्थः इति श्रीमात्यायगुंडोपनामकवै
द्यनाथभट्टविरचितायांचंद्रालोकव्याख्यायां रमाख्यायां पंचमोविलासः॥५॥

श्रीनरकेसरी विजयतेतरां अलोददभरणाविधौ निर्दयमपदं प्रयास्तिकिं
शरणं अपिहृदयसदपहृदयं स्मरवरदमिंदिरारमणंरीति निरूपणास्य
रसनिरूपणोपजीवकत्तयोद्देशाक्रमेण लक्षणनिरूपणानंतरं प्राप्नमपि
तन्निरूपणं तत्राकृत्वाकरिष्यमाणत्तत्तः प्रागवसरसंगत्यारसान्निरूप
यितु प्रतिजानीते शिष्यावधानाय अपरसा इति अभिधीयंत इतिशे

श्रीअपरसाः॥ आलंबनोद्दीपनात्मा विभावःकारणं द्विधा
कार्यौनुभावो भावस्तु सहायो व्यभिचार्यपि १२॥०॥

षः विभावानुभावव्यभिचारिभावै राहितो त्कर्षस्य स्यापि भावस्य रस
त्वात तदुपो दयात त्वेनत्त दनुगुणत्तया ऽऽदौ विभाव वादीन भिधत्ते आलं
वेत्यादिकारणं विभावः स द्विधा आलंवनोद्दीपनभेदात् तत्राद्यः कां
तः कांता च उद्यानादिरंत्यः अयंभावः रसमात्रे आलंवन विभाव उद्दीप

चं॰
९५

नविभावस्थकारणं यामालंव्यरसप्रवृत्तिःसत्राद्यःतस्युद्दीपयतीयःसोंत्यः यधमुद्दीपकस्यजनकत्वंतथाप्युद्दीपनंविनाऽस्वादायोगाद्रसत्वानुपपत्तेरुत्कर्षाधायकत्वेनजनकताविवक्षितेति कार्यंअनुभावःयद्येपुरस्तत्तद्धदोऽनुरोधात्तद्रूपविशेषानुरोधेनसचस्तंभादेरूदोपल्मितादिःसहायःसहकारीसभावःसएवव्यभिचारिपदेनाप्युच्यतइत्यर्थःएतेषांव्यभिचारिणांभावत्वव्यवहारस्तुप्रकाशादौव्यभिचारिभावइतिस्पष्टःएतेचप्रतिरसंभिन्नावक्ष्यंते १२ अथश्लोकद्वयेनरसस्वरूपमाहगलदित्यादिरत्यादिःस्थायीभावएवरसःननुतस्यसत्त्वरूपस्यसत्वात्सदातद्व्यवहारापत्तिरतआह विभावीति विभावितोऽभिव्यक्तःरसोनत्स्वभावस्थावपन्नःअभिव्यक्तिहेतुमाहविभावाद्यैरिति॰अभिव्यक्तिस्थलमाहकाव्यइति नद्येचेतिचेननाटकग्रहणंकार्यपदेनद्वित्वग्रहणंद्वितीयचःसर्वसमुच्चायकःकार्यपदेनत्यादिग्रह्यतइति व्याख्यानतुपुनरुक्तिग्रस्तं तथाचकाव्यनाटकश्रवणे

रा॰म॰
९५

ननाद्यचित्रप्रेक्षणेन विभावादिभ्यो व्यारस प्रतीतेः काव्यनाटक
नाद्यचित्रस्यत्वं बोध्यं तस्य नन्वभिव्यक्तिनाशादयायामपि रसव्यव
हारापत्तिरभिव्यक्तत्वस्य सर्वसत्वादत आह आस्वाद्येति आस्वाद्यमा
नमेव तस्यस्वरूपं नत्वास्वादितमास्वादनीयं वेति पाव दानंदस्ता

गलद्वेद्यांतरोद्भेदं हृदयेष्वजडात्मनां मिलन्मलयजालेय इवाह्लादं विकासयन् १३ काव्ये नाट्ये च कार्यैश्च विभावाद्यैर्विभावितः आस्वाद्यमानैकतनुः स्थायी भावो रसः स्मृतः १४

वदेव रसत्वं तथा च आस्वादनस्वरूपो ज्ञानस्वरूप एवं न तु सः तथा
च विभावितोऽभिव्यक्त इत्यत्रमतिवुद्धीति वर्त्तमाने क्त इति बोध्यं दुः
खात्मककरुणादौ प्रवृत्तिर्न स्यादत आह आह्लादमिति तत्राप्युद्धु
त विभावादिप्रेक्षणेन सुखाभिव्यक्तिरेव भवतीत्यर्थः ज्ञानमप्यन

न्यविषयमिति गलद्वेद्यांतरोद्भेदमिति क्रियाविशेषणं ॥ अन्यत्तत्र
नभासनत्रावेतितद्र्थः एतेन विभावादिनाऽन्याभिव्यक्तौ भासमान
स्य रसत्वेनत्वदेववशादन्यस्याभिमाने तस्यापि रसतापत्तिरित्यपास्तं
केषांचुचाह्लादोत आह्लाजेति अजडात्मनां तत्तद्रसपरिशीलनाभ्या
सपाठवतां अत एव नशांताभ्यासे शृंगारेऽभिव्यक्तिरित्यादि हृदये
तु जडात्मनामिति पाठे तु जड हृदयेषु यथा मलपञ्जालेपः आह्लाद
विकासपत्तीति दृष्टांतेजोज्यं अपमाशापः शृंगारादीनां नवानां र
सानां रत्यादयो नवक्रमेणस्थायिभावाः तिष्ठंतीतिस्थायिनः स्थिरा
श्चेचते भावाश्च इत्यर्थः यतः सर्वो जीवः सुरवसक्तो रिरंसते स्वहितापो
त्स हते स्वेष्टे दातिशंकपा शोचते हसति वैचित्र्य दर्शनाद्विस्मयते विभे
ति परस्मै कुप्यति परं जुगुप्सते वैराग्येण किंचित्त्यक्तुकामः प्रशामंम
जतेन हि मुक्तावस्थायां सर्वमेभिर्नवभिश्चित्तव्यापारैः शून्यः कदा
चित्कश्चिदपि संसारेऽवतिष्ठते एवं च वासनारूपा स्थायिता न्विरुद्धैर्वा

भावैरतिरस्कृतप्रवाहान् रत्यादीन् विभावयंतिये आस्वादयोग्यान् ज
नयंतिते विभावाः येऽनुभावयंति तत्रोत्कर्षाधानं कुर्वंति ते अनुभा
वाः ये विशेषेण अभितः सर्वतः स्थायिनं शरीरे चारयंति ते व्यभिचा
रिभावाः तथा चाभिव्यज्यमानः स्थायीभाव एव रस इति संप्रदायः उ
क्तं च भरतेन विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति अत्र
भट्टलोल्लटादयः स्थायिनां विभावेनोत्पादकभावरूपादनुभावेन गम्यग
मकभावरूपात् व्यभिदीपनैरुद्दीपितः कटाक्षाद्यनुभावैः प्रतीतियो
ग्यकृतो व्यभिचार्युत्कंठादिभिः पोषितो रामादावनुकार्ये रसः साक्षात्सं
बंधेन तत्तुल्यरूपतानुसंधानवशात् स एव नटे काव्यपाठे चारोप्यमाणः
सामाजिकानां चमत्कारहेतुरित्याहुः तथा चानुकार्य एव त्रिधोक्तरी
त्या रसनिष्पत्तिर्नटादौ त्वारोपस्तात्सामाजिकेषु नैव रस इति फलितं इ
दमुक्तं सामाजिकनिष्ठरत्युद्बोधाभावे तेषां चमत्कारानापत्तेः तज्ज
ज्ञानस्य तथात्वे लौकिकशृंगारादिदर्शनेनापि तत्प्रसंगात् अत एव

श्रीशंकुकः तस्य तैरमुमाप्यानुमापकभावरूपसंबंधाद्रसस्य निष्प
त्तिरनुमितिरिति तदर्थः तथा च तैर्नटादावनुमीयमानोऽनुकार्यरत्या
दिर्भावो रस इति फलितं तेन तस्यानुमितिरूपा चमत्कारप्रतीतिर्या सा
माजिकानां जायते सा रस इति यावत् तद्रूपं प्रयोगः चित्रतुरगवद्रामो
यमिति ज्ञातो नटः पक्षः सीताविषयरतिमान् तद्विषयकटाक्षादिम
त्त्वादिति यद्यप्येते कृत्रिमाः नटादौ च स नास्ति तथापि तत्त्वेनाज्ञानात्तैः
स्यापि त्वेन संभाव्यमानत्वेनाभावनिश्चयाभावात्तस्यानुमितिः सैव
चमत्कारजनकप्रतीतिरूपा चर्वणा सा च सामाजिकानामिति तेष्वेव
रस इति व्यवहारः अत एव नटादौ न स इत्याह इदमप्ययुक्तं प्रत्यक्षज्ञा
नमेव सचमत्कारं नानुमित्यात्मकमिति लोकप्रसिद्धिविरोधापत्तेः उ
क्तदोषाच्च संजातबाधज्ञानकस्य सामाजिकरसोद्बोधानापत्तेश्च अत
एव भट्टनायकः रामे नटादौ च नोत्पद्यते न वानुमीयते उक्तदोषात्
नापि सामाजिके उत्पद्यते अभिव्यज्यते वा असंनिहितेभ्यः सीतादि

भ्यः सामाजिकरत्नुत्पादात् आराध्यत्वज्ञानस्य प्रतिबंधकत्वाच्च सि
द्धस्यैव व्यंग्यत्वाच्च रसस्यवासिद्धत्वात् अन्यथा सर्वेषामेवाभिव्यक्ति
प्रसंगाच्च । तस्मात्तस्यतेः संयोगाद्भोग्यभोजकभावरूपसंबंधाद्रसस्य
निष्पत्तिर्भुक्तिरिति सूत्रार्थः नन्वन्यनिष्ठरत्यादेरन्यनिष्ठविभावादि
भिरन्यस्य कथं भोगोऽतिप्रसंगादिति चेन्न शब्दात्मनः काव्यस्य त्रि
वो व्यापारः अभिधालक्षणान्यतरत् भावकत्वं भोजकत्वं च भावकत्वं
च साधारणीकरणं तेन हि विभावादयः स्थायी च तथा क्रियते तच्च
तद्देवपत्नीत्वादिविशेषाणां कामिनीत्वादिसामान्येनोपस्थितिः स्था
य्यनुभावादीनां च संबंधिविशेषानवच्छिन्नत्वेन अनंतं व्यापारद्वयं
नाद्येपि एवं च तेन तथा कृतैस्तैर्मुहुर्मुहुश्चिंत्यमानस्तेन तथा कृतोभा
वजोपनीतरामादिः इत्यादिः स्थायी सामाजिकमनसा प्राणोपजी
वत्सौरभमिव चर्व्यमाणस्तृतीयव्यापारेणाभुज्यते साक्षात्कारविषयी
क्रियते तथा कामिनीभावनानंतरं तत्साक्षात्कारः भोगश्च सत्व

चं॰
९८

गुणोद्रेका त्मा का ग्गाते आनंदस्तस्व रूपा अनन्या लंबनापासं चित्तस्व
रूपोलौकिका त्दुरखानुभवविलक्षणः उद्रेकश्चैतत एवभिभूपावस्था
नं तथा च तैर्भाव्यमानोभावमानोपनीत रामादिगतरत्यादिः सामाजि
कानां चिदानंदस्वरूप साक्षात्कार विषयोरस इति फलितं नटस्य कथ
चिदास्वादश्चेत्सामाजिकत्वेनैव न तु नटत्वेनेति वोध्यमिति इदमप्युप
क्तं व्यापारद्वयकल्पने मानाभावात् भुक्तेर्जीनातिरेकस्य अनुभववा
धितत्वाच्च अतएवाचार्योभिनवगुप्तपादाः धूमेन वह्न्यनुमानाभ्या
सवतांनैपापिकाना मिवललनोद्यानकटाक्षरोमांचादिभिः स्थापि
रत्याद्यनुमानाभ्यासवासनावसितांतः करणानामालंकारिकाणां
सामाजिकानां पूर्वमुत्पन्नः स्तन्मतपातः स्थितो इत्यादिः स्थापीकाम
व्यनाद्यात्सो विभावादिपदव्यपदेश्यैस्तैरेवाभिव्यज्यते एवंच मेपापूर्व
इत्यादिनोत्पन्नस्तेषांनास्त्येव रसाभिव्यक्तिः अन्यनिष्ठानामपि वि
भावादीनां संवंधिविशेषीयत्वेनाप्रतीतौ स्वीयत्वासंसर्गग्रहात्साधा

रूपेन प्रतीतौ तेनैव प्रमात्रा विशेषसंसर्गाऽग्रहरूपेणाभिव्यज्यते ॥
अभिव्यक्तिरेव चर्वणा तेन विभावादीनां समूहालंबनात्मकचर्वणावि
शिष्टः स्थायी रसनं चैवं वस्तुस्वात्मकस्यात्मनोऽनभिव्यक्तस्य रसत्वेन प्र
काशानपेरसाद्यवच्छिन्नं चैतन्यस्य रसत्वानंदतः कारणावच्छिन्नचैत
न्यस्य प्रमातृत्वाच्चैतन्यांशमादाय रत्याकारवदभिन्नस्यात्मनो विष
यीकरणात् तद्विशिष्टस्य विभावादिज्ञानावधिकस्य व्यामाणस्य चर्व
णानाशेन नष्टो रस इति धीविषयः पुर इव परिस्फुरन् हृदयमिव प्र
विशन् सर्वांगीणमिवालिंगन् अन्यत्सर्वमिव तिरोदधत् ब्रह्मास्वा
दमिवानुभावयन् तत्रावालौकिकचमत्कारकारी रसः न च समूहा
लंबनात्मकरसप्रतीतौ विभावादीनां पृथक् धीप्रसंगो पटपटावि
त्तिवत् पानकरसन्यायेन चर्वणात् तत्र यथा कर्पूराद्यंशेन भेदे
वुध्यते तथात्रापि विभावाद्यंशाः उत्पन्नो रस इति धीरपि चर्वणोत्प
त्ति विषया प्रत्तोऽभिव्यज्यमान एव रसो नोत्पाद्यमानो नाप्यनुमीयमा

तोनवाभोज्यमान इत्याहुः तदेतत्सर्वमभिप्रेत्यमूले विभावित इत्यु
क्तं आस्वाद्येकेत्यनेन रसप्राकट्यस्य तत इति योगः सूचितः विभावाद्यै
रित्यनेन मिलितानामेव व्यंजकत्वं न प्रत्येकमिति सूचितं तथात्वेप्य
भिचारात् तथाहि व्याघ्रादयो विभावा भयानकस्येव रौद्राद्भुतवी
राणां अश्रुपातादयोऽनुभावाः शृंगारस्येव करुणभयानकयोः चिं
तादयो व्यभिचारिणः शृंगारस्येव करुणवीरभयानकानां न ह्यत्र
तथास्ति यत्र चैकेन तदभिव्यक्तिः यथा परिमर्दितमृणालीग्लान
मंगं प्रवृत्तिः कथमपि परिवारप्रार्थनाभिः क्रियासु कलयति च हि
मांशोर्निष्कलंकस्य लक्ष्मीमभिनवकरिदंतच्छेदपांडुः कपोलः अ
त्र केवलानुभाव एवमन्यत्रापि बोध्यं तत्र पितिनान्यस्याप्याक्षेप इ
ति बोध्यं १४ पद्यद्वयेन शृंगारमाह रत्याख्य इति रत्याख्यः स्थायी
भाव आत्मा स्वरूपं यस्य स शृंगारो मतः कीदृशः जायापतिप्रभृति
भिर्विभावितः सहस्रैर्गोपीनां पदनतिपराणां परिवृतो वरं वृंदार

एषपन इत्स रसालास्य दरसेसमालिंगन् चुंबनमुहूरपिकरादेः परि
रम्भान् तथागायन्नत्यन् रसपतिरहस्य यदुपतिः समानकुलशी
लयोः समरुचीः परात्तयोऽपरस्पर विलोकनाकुलितचेतसोः ननु
त्वमधिविंदनोर्वद्रु विधं विधिं तिंदवो रशाका विनिवेदनाविरहवेद
नावर्जितेन निष्टस्तद्विषय इतियावत् आदिनोद्यानादितथाचकांता

रत्याख्यस्यापि भावात्मा वल्लभादि विभावितः॥
आलस्येर्ष्याजुगुप्साभ्योविनासंचारिभिर्युतः॥५॥

कांत आलंबनविभावः उद्यानादिरुद्दीपनविभावः पुनः कीदृशः॥
अनुभावैः कटाक्षाद्यैर्युक्तः आद्येन स्वेदादयः पुनः की॰ आलस्या
दीनांक्रमेण करुणरौद्रबीभत्सव्यभिचारित्वात्तदन्यैः संचारिभवैरु
न्माद्याद्यैर्युतः आद्येन हर्षादयः एवं योजनाप्येमेव यथाक्रममि

चं॰
६९

तिपदं अत एवमध्येऽनुभावैः कटाक्षाद्यैरित्युक्तोन्मादाद्यैरित्यंते
उक्तं सच शृंगारो द्विविधः संभोगो विप्रलंभश्च॰ तावपि प्रछन्न
प्रकाशरूपत्वेन द्वेधा॰ तदुक्तं॰ जायापत्योर्मिथो रत्यावृत्तिः शृंगा
र उच्यते संयोगो विप्रलंभश्चेत्येष तो द्विविधो मतः तौ तयोर्भव
तोर्वीच्यो वुधैर्युक्तवियुक्तयोः प्रछन्नश्च प्रकाशश्च पुनरेष द्विधा मत
इति द्विविधस्यापि संयोगस्य स्वेदाश्रुरोमांचादयोऽनुभावाः आलस्या

अनुभावैः कटाक्षाद्यैरुन्मादाद्यैर्यथाक्रमं संयोगो
विप्रलंभश्च शृंगारो द्विविधो मतः १६ ॥ ७ ॥ ७ ॥

द्भिन्नाः हर्षादयो व्यभिचारिणः द्विविधद्वितीयस्यापि असंतोषाकृ
तादीनवचनतादयोऽनुभावाः शंकामदग्लान्यादयो व्यभिचारिणः पूर्वा
नुरागमानात्मप्रकासकरुणात्मकः विप्रलंभश्चतुर्धा स्यात्पूर्वं पूर्वोत्प राम
६९

पंग्रहः अमेवाभिलाषविरहेर्ष्यामवासमापहेतुक इतिगीयते अथ
तेषामुदाहरणानिग्रहस्तविग्रेराधायामाधववदनाभिलाषिणानय
ने पंजरचक्रममाणं स्वंजनमिथुनं तिरस्कुरुत अपसारयघनसारकुरु
हारं दूरएव किंकमलैः अलमलमालिमृणालैरितिवदति दिवानि
शं वालानायिकानायकभेदेनसंयोगविप्रयोगभेदास्तत्रन्यत्रावोध्याः ॥५॥१६
पद्येनहास्यमाह हासेतिहासः स्थायीयस्येतिवहुव्रीहिः ईदृशोरसोहास्यः
वैकृत्यादयोपेयप्याकर्मविभावाद्यास्तैर्युक्तः इत्यर्थः श्रृंगारोपालंवनवि
भावस्यैवात्रसत्वात्तदनुक्तिः क्वचित्कौतुक्येतिपाठः आद्येनानुभावादिप
रिग्रहः अत्याद्यस्यप्रत्येकसंवंधः तेनान्यसर्वपरिग्रहः तथाच आलं
वनविभावोनायकोनायिकाच उद्दीपनविभावोवैकृत्यादिः अनुभावः
फुल्लगंडत्वादिः व्यभिचारी अवहित्थादिरित्यर्थः तदुक्तं हासम्रूलःस
मारव्यातोहास्यनामारसोवुधैः चेष्टांगवेषवैकृत्याद्यहेतुर्नारसोद्भ
वः कपोलादिकृतोल्लासोःभिन्नोष्ठःसमहात्मनां विदीर्णास्यस्त्रमध्या

चं॰ नां अधमानां सखा वदकः उत्तममध्यमाधमभेदेन हास्यरसस्त्रिधेत्यर्थः
१०० परं तु हास्यरसः संक्रमणरूपोपपत्तः परस्य हास्यं दृष्ट्वा विभावादीन्यप्य
न्योपि हसति यथा ऽऽम्लदाडिमरसास्वादः पार्श्वस्था मुखेलालं करोति
त द्वत् न त्वन्यरसानां संक्रमणरूपत्वं न च स्वामिशोकेन भृत्यशोकात्त

हासस्यापी रसो हास्यो विभावाद्यैर्यथाक्रमं वैरूप्य
फुल्लगंडत्वावहित्थाद्यैः समन्वितः १८॥६॥६॥

स्यापि संक्रमणरूपत्वमिति वाच्यं भृत्यशोकस्य स्वामिशोकनिमित्तकरू
णरसांतरत्वात् यथा गताः केचित्प्रबोधाय स्वयं तं कुंभकर्णकं तदधः
पवनोत्संगाड्डीयपतिताः कचित् रसोदाहरणं यथा कृष्णः किंकुरुते
गताः समधुरा मित्त्वालप्योद्भवादंत हीसतयाद्वाणाङ्गमपि न स्यात्तं दत्तमा
यौवनात् विस्फूर्जत्करतालिकायडुरवं प्रोत्फुल्लगंडस्थलं निःशंकंक राम
१००

पयंतिगोपस्तदस्माकुञ्जारतिंस्त्रीपतेः १७ करुणमाह अभीष्टेति अ
त्राप्यालंबनदिभावोनायिकादिरिति पुनर्नोक्तः आदिपदस्यप्रत्येकं
संबंधः तथाच इष्टवियोगोः निष्टसंगश्चोद्दीपनः अश्रुपातादयो
ऽनुभावाः ग्लान्यादयोव्यभिचारिणः अनेनक्रमेणयेविभावादय
स्तैर्युक्तः शोकः स्थायीयस्येतिविग्रहः शोच्यतेऽनेनेतिशोकः त
दुक्तं शोकोष्ठः करुणेतेयस्तत्रअश्रुपातरोदनोवैवर्ण्यमोहनि

अभीष्टविप्रयोगाश्रुपातग्लान्यादिभिः क्रमात्॥
विभावाद्यैर्युतः शोकस्थायीस्यात्करुणोरसः १८॥

वैदमलापाश्रूणिकीर्त्तयेत् यथासीताममपास्यतत्रयथानत्वास्यसमाग
तंलक्ष्मणमानिरीक्ष्य वभूववाष्पांवुधिमध्यलीनोदृगंतमीनोरघु
नंदनस्य १८ रौद्रमाह क्रोधेति क्रोधः स्थायीयस्येतिविग्रहः यथा

क्रमं विभावाद्यैर्मात्सर्यादिभिः समन्वित इत्यर्थः आलंबन विभावः
प्रागवत् अत्र घटश्रावस्य प्रत्येकं संबंधः तथा च मात्सर्यादिरुद्दीपन वि
भावः मात्सर्यं च दाराप हारजाति विद्यादौ पराभवाद्भवतीति तज्जनितो
द्वेषः एवं च पराभवादीनामप्युद्दीपकत्वं॰ हस्तनिष्पेषादिरनुभावः सं
मोहादिर्व्यभिचारी यस्य स रौद्ररस इत्यर्थः तदुक्तं क्रोधात्मको भवेद्रौद्रः

क्रोधस्यापीरसो रौद्रो विभावाद्यैः समन्वितः मात्सर्य
हस्तनिष्पेषसंमोहाद्यैर्यथाक्रमं १९ ॥ ५ ॥ ५ ॥

क्रोध आरिपराभवात् भीष्मवत्तिर्भवेदुग्रः समर्षस्तत्र नायकः स्वा
त्साघातस्वशास्त्रोपक्षेपम्कुटपत्तथा अत्राराति जनाक्षेपो दलनं वो
मवर्ण्यते॰ यथा केयं मातापिशाचीक इव च जनको भ्रातरः केत्रकीटा
वंध्योपं वंधुवर्गः कुटिलविटस्तुहृच्चेष्टितात्मातयोःमी आगर्भपाव

देषांकुलमिदमखिलं नैव निःशेषयामि स्फूर्जतः क्रोधवह्नेर्नं दधति विस्फुलिंगाः १९ वीरमाह उत्साहेति उत्साहाख्यः स्थायीभावोयस्येति विग्रहः ईदृशोयः सवीररस इत्यर्थः नायकोऽत्रालंबनविभावः प्रागवत् प्रभावादिविभाववत्तीति प्रभावादिविभावभूः आदिनाबलादयः तथा प्रभावबलमदधार्ष्ट्यादिरुद्दीपनविभावः स्थैर्यादिरनुभा

उत्साहाख्यस्थायिभावः प्रभावादिविभावभूः वीरो
ऽनुभावैः स्थैर्याद्यैर्भोगैर्वर्गादिभिर्युतः २०॥१०॥

वः आदिपदात् धैर्यवीर्यादेपचनादयः भावैरित्यस्यव्यभिचारिभावैरित्यर्थः तथा च गर्वादिर्व्यभिचारी आदीनाम् अमर्षः प्रतिबोधः स्मृतितर्कोपमतिर्धृतिः क्रोधाल्पेचसंमोहः आवेगः शोषहर्षणं गर्वोमदस्तथोग्रत्वं भावावीरेभवंत्यपि इति बोध्यं यथा संग्रामांगण

चं.

१०२ मागते दशानुखे सौमित्रिणा विस्मितं सुग्रीवेण विचिंतितं हनुमताव्या
लोलमालोकितं श्रीरामेण परंतु पीनपुलकस्फूर्जत्कपोलस्थिया
सांद्रानंदरसालसानि दधिरे वाणासने दृष्टयः अन्यत्रतु एतद्भेदाः
दानवीरादयोप्युक्तास्ते तत एव बोध्याः तदुक्तं उत्साहात्मा भवेद्वीर
स्त्रेधा धर्माजिदानतः नायकोऽत्र भवेत्सर्वैः श्लाघ्यैरधिगतो गु
णैरिति २० भयानकमाह व्याघ्रेति भयं स्थायी यस्येति विग्रहः आ

व्याघ्रादिभिर्विभावैस्तु वेपिताद्यनुभाववान् भावै
र्मोहादिभिर्युक्तो भयास्थायी भयानकः २१॥

लंबनविभावः प्राग्वत् विभावैस्त्वित्यस्यापि युक्त इत्यत्रान्वयः वे
पिताद्यनुभाववं विभक्तिं धारयति इत्यर्थः भावैरिति प्राग्वत् तथा च
व्याघ्रादिरुद्दीपनविभावः कंपितादिरनुभावः मोहादिर्व्यभिचा राम

१०२

रोयस्य भयानकरस इति वोध्यं तदुक्तं पाभेनकोभवेद्धीत्ति प्रकृत्ति
र्धीरवस्तुनः सचप्रायेएा वनितानीचवालेषुप्रास्यत्ते दिगालोकास्य
शोषांगकंपगद्गदसंभ्रमाः श्वासवैवएर्यसंमोहावएर्यत्ते विवुधैरिह
यथा कालियस्त्रूढेमालिनिवनमालिनिहाहत्तं विजानंत्यः व्यालीभिः
करत्तालीहत्तवत्सोभि म्त्रकंपिरेभ्रयः २० यथावास्फूर्जदभुजाविंश
त्तिकंसमंतात्समुल्लसद्भीषएावक्रपंक्ति दृष्ट्वैवरौद्रंदशावक्रदेहंसीता
त्तीभीत्तावनमूर्छित्तासीत्त् २१ वीभत्सरसमाहस्थापीत्ति यस्यकस्य

स्यापीजुगुप्सावीभत्सोविभावाद्यैर्यथाक्रमं ॥
अनिष्टेक्षएानिष्ठीवमोहाद्याःसम्मत्ताःक्रमात् २२

दंभावैःजहल्लिंगयस्यस इति शेषः यस्य जुगुप्सास्थापीभावः सवि
भत्सः विभावाद्यैर्यथाक्रमं युत्त इतिशेषः तानेवाह अनिष्टेक्षेत्ति

चं.
१०३ आद्यः प्राग्वत् तथा चानिष्टेक्षणादिरुद्दीपनविभावः निष्ठीवनादि
रनुभावः मोहादिर्व्यभिचारी आलंबनस्तु प्राग्वत् तदुक्तं बीभत्सः स्था
ज्जुगुप्सातः सोऽत्यश्रवणेक्षणात् निष्ठीवनास्यभंगादिः स्यादत्र
महतां न च उत्तमानां व्यभिचार्यनुभावानेत्यर्थः यथा अंत्रैः कल्पि
तमंगलप्रतिसराः स्त्रीहस्तरक्तोत्पलव्यक्तोत्तंसभृतः पिनह्य सहसाहृ

अद्भुतो विस्मयस्थायी मायादिकविभावभूः रोमां
चाद्यनुभावोपस्तंभादिव्यभिचारिकः २३॥०॥

त्पुंडरीकस्रजः तत्तच्छोणितपंककुंकुमजुषः संभूयकांतैः पिबं
त्यस्थिस्नेहसुराः कपालचषकैः प्रीताः पिशाचांगनाः २२ अद्भुत
लक्षयति अद्भुत इति विस्मयः स्थायी यस्येति विग्रहः आलंबनः
प्राग्वत् मायादिरूपोद्दीपनविभावप्रभवः रोमांचादिरनुभावोप राम
१०३

स्मसंभादिर्व्यभिचारी यस्येदृशोऽयंमद्भुतो रसः तथा च मायादिरुद्दीपन
विभावः रोमाञ्चादिकमनुभावः स्तंभादिर्व्यभिचारिभावः य इति पाठे स
इति शेषः एवमग्रेपि तदुक्तं विस्मयात्माऽद्भुतो ज्ञेयः स चासंभाव्यवस्तुतः
दर्शनाच्छ्रवणाद्वापि प्राणिनामुपजायते तत्र नेत्रविकासः स्यात्पुलकः
स्वेद एव च यथा दिव्यहरे र्मुखकुहरे विस्तीर्णपर्णनिव्योम चूर्णितिचन्द्रार्क
मुकतिकनकगिरिः स्वदिरसारत्तिदिनेशाः २२ शांतं लक्षयति निर्वेदेति

निर्वेदस्थायिकः शांतः सत्संगादिविभावभूः क्षमा
दिकानुभावो यः स्तंभादिव्यभिचारिकः २५॥०॥

निर्वेदः स्थायी यस्येति विग्रहः आलंबनः प्राग्वत्सत्संगादिविभाव
जन्यः क्षमादिकोऽनुभावो यस्य स्तंभादिर्व्यभिचारी यस्येदृशोयं शांत
तो रसः निर्वेदस्वस्वावमामानः तथा च सत्संगादिभिरुद्दीपनविभावैः

क्षमादिभिरनुभावैः त्तंमादिभिर्व्यभिचारिभावैरभिव्यक्तो निर्वेदः शां
तरस इत्यर्थः तदुक्तं सम्यकत्तान समुत्थानः शांतो निस्पृहनायकः ग
र्वेर्ष्यादिपरित्यागात्सम्यग्त्तानस्यचोद्भव इति यथा अश्नीमहि वयं भि
क्षामाशावासो वसीमहि शयीमहि महीपृष्ठे कुर्वीमहि किमीश्वरैः २४
भावांल्लक्षयति रतिरिति देवादिविषया रतिर्भावः आदिनान्यपु
रुमुनिसुतविषयापि तस्यानुपदं वक्ष्यमाणः निर्वेदादयो व्यभिचारि

रतिर्देवादिविषया संतिच व्यभिचारिणः वेद्यमा
नानि गद्यंते भावाः साहित्यवेदिभिः २५ ॥०॥

भावाः संतीति यदा वेद्यमानाः काव्यव्यंग्या भवंति तदा साहित्यवेदि
भिर्भावा इति निगद्यंते कथ्यंते तेपि भावपदवाच्या भवंतीत्यर्थः २५ ता
नेव निर्वेदादीनाह निर्वेद इति स्वाद्यमानो निर्वेदः कापीदमत्वंग्ला

निः अनिष्टचिंतनं शंका· असहिष्णुता असूया· मदः प्रसिद्धः रत्यादिज

नितः खेदः श्रमः इष्टानादरः आलस्यं शारीरमालिन्यकारकोमनो

विकारोदैन्यं चिंता ध्यानं मोहो ज्ञानाजननं धैर्यं धृतिः संस्कारजन्यं ज्ञानं

स्मृतिः २६ व्रीडादयः प्रसिद्धाः अपस्मारोरोगविशेषः २७ सुप्तादयः प्र

निर्वेदग्लानिशंकाख्यास्तथाऽसूयामदश्रमाः आलस्यं चैव दै

न्यं च चिंतामोहो स्मृतिर्धृतिः २६ व्रीडा चपलता हर्ष आवेगो ज

डता तथा गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च २७ सुप्तं वि

बोधोमर्षश्चाप्यवहित्थमथोग्रता मतिर्व्याधिस्तथोन्मादस्त

था मरणमेव च २८ त्रासश्चैव वितर्कश्च विज्ञेया व्यभि

चारिणः त्रयस्त्रिंशदमी भावास्समाख्यातास्तु नामतः २९

सिद्धाः अवहित्थं आकारगोपनं २८ मरणं तत्त्वागवस्थानन्तु प्रसिद्धं

तस्यामंगलरूपत्वात् अग्रे प्रसिद्धाः २९॥

चं·
१९५

रसाभावाभासानाह एकस्यानायिकायाः अनेकनायकविषया
वलोकनादिवर्णनयाऽनेकविषयप्रेमादिकथनमनौचित्ततया
रसोपिरसाभासोभवति एवमेकस्यानेकदेवतादिविषयकरत्यादि
वर्णनयाऽनेकविषयरत्यादिकथने भावाभास इत्यर्थः प्रश्नयोनम्र
ता· नतिरिति यावत् यथासंख्यमन्वयः ३० यामरार्णांभावशांत्यादी

सर्वसाधारणप्रेमप्रश्रयादिस्वरूपया अनौचि
त्याद्रसाभासाभावाभासाश्चकीर्त्तिताः ३१ भावस्य
शांतिरुदयःसंधिःशावलतातथा काव्यस्यकांच
नस्येवकुंकुमंकांतिसंपदे ॥३१॥ ७॥ ७॥ ७॥

नाह भावेति भावस्यव्यभिचारिभावादेः शांतिर्नाशः उदयआधि
क्यं भावद्वयस्यक्रमेणकथनंसंधिः वहूनांकथनंशावलता एतान्यपि
काव्यस्यकांतिसंपदे· कांतिर्हिह्लीनसरसत्वंतत्संपदे· भवतिकांचनस्य
राम
१९५

कुंकुमंकेसर इवेत्यर्थः तद्वत् शोभाजनकानीत्याशयः अत्र पर्याय
प्रवृत्तो संधिः पर्यायप्रवृत्तो भाव लत्तेत्ति केचित् ३१ अप्पभावादिकमे
णोदाहरणानि तत्राद्यो देवविषयायथा मातर्भवानि ममसर्वभवानि
पापानि पापानि तानि तव दर्शनतो गतानि एतावदेव मम देवि परं तदप्य
पार्श्वं तं सुरादि चरणे स्थिर तामुपेयात् १ नृपविषयायथा त्वद्वाजि

आन्तर्यमासप्रमंचयप्ये ष्टैरूपमादिभिः समासः
स्यात्पदैर्नस्यात्समासः सर्वथापि च ३२॥०॥

राजि निर्धूत धूलिपटलपंकिलां न धत्ते शिरसा गंगा भूरिभारभिया
हरः २ गुरु विषयायथा पुरुषायुषजीविन्यो निरातंकानिरीतयः
यन्मदीयाः प्रजास्तत्र हेतुस्त्व ब्रह्मवर्चसं ३ मुनिविषयायथा वि
लोकनेनैव तवामुना मुने कृतार्थो स्मिति वर्हितांहसा तथापि शुश्रूष

रहंगरीयसीर्गिरोऽप्यवाप्नोपसि केन तप्यते ५ स्तत्त विषयाय यथा एह्येहि वत्स र
घुनंदन रामचंद्र चुंबामि मूर्ध्नि चिराय परिष्वजे त्वां ५ व्यभिचारी यथा जाने
कोपपराङ्मुखी प्रियतमा स्वप्नेऽद्य दृष्टा मया मा मां संस्पृश पाणिनेति रुदती गं
तुं प्रवृत्ता ततः नोपावृत्य परिरभ्य चाटुकशतैराश्वासयामि प्रियामाजन्मस्तावद
हं शाठेन विधिना निद्रा दरिद्रीकृतः ६ अत्र विधिं प्रत्यसूया व्यंग्या रसाभा
सो यथा स्तम्भः कं वामाक्षि त्वत्क्षणमपि विना यन्न रमसे विलेभे कः प्राणान् रण
मखमुखे यं मृगयसे सुलग्ने को जातः शशिमुखि यमालिंगसि बलात्त
पः श्रीः कस्यैषा मदननगरि ध्यायसि तु यम् ७ अत्र तत्प्रश्नाद्धेन व्यवच्छेदा
र्थेन व्यापारस्यानेकविषयत्वलाभाद्बहुषु व्यापारोपादानेन बहुविषयारतिर्व्य
ज्यते भावाभासो यथा एकाकस्था करमुखी न रलायनाद्दीसासे रयौवन।
तरंगित विभ्रमास्या तत्किं करोमि विदधे कथमत्र मैत्रीं तत्स्वीकृति व्य
तिकरे कद्रवाभ्युपायः ८ अत्र रतेर्व्यभिचारिस्त्ता चिंता अनौचित्य प्र
वर्त्तिता नायिकाया अतनुरक्तत्वेन रतेरनुत्कृष्टत्वेन तद्व्यभिचारिणो

पित्तप्रात्वात् भावशांतिर्यथा तस्याः सांद्रविलेपनतरप्रश्लेषमुद्रांकि
तं किंवक्षस्मरणानतिव्यतिकरः व्याजेन गोपाय्यते इत्युक्ते क्व तदिसुदीर्घ
सहसा तत्संभ्रमाद्भुमया सा श्लिष्टा रभसेन तत्स्तवकाभ्यापित्तद्विस्र
तं ८ अत्रकोपशांतावेवचमत्कारविश्रामः उदयो यथा एकस्मिन्शाय
ने विपक्षरमणीनामग्रहे मुग्धया सद्योमानपरिग्रहग्लनया चाटूनिकु
र्वन्नपि आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्तत्क्षणान्माभूत्सु
प्त इवेत्यमंदवलितग्रीवं पुनर्वीक्षितः ९ अत्रौत्सुक्यस्योदयः संधिर्य
था विलंब्य कस्यांचिदुपागतोऽयमतः परावर्तितदृष्टिसृष्टिः प्रवर्तिता
त्तीस्मितवक्त्रलक्ष्मीराधाहरौ लोकगुरौ बभूव ११ अत्रकोपौत्सुक्ययोः
संधिः शबलता यथा नद्यः कुत्रपराः क्व दैवतसरित्स द्रष्टास्मि भूयोऽपि
तां तद्ध्वान्तात्तव ऊरुसंपदो जलतपाइष्टाः पिहर्षप्रदा स्यास्ये तद्विरहा
तुरः किंपदं हंजातैवसा डुर्लभा चेतः स्वास्थ्यमुपेहि केन वपुषा साह
कूयथंयास्यति १२ अत्रवितर्कौत्सुक्यमतिस्मरणशंकादैन्यधृतिं

चिंतानां शाबलता॰ द्वयोः समावेशो संधिर्बहूनां तस्मिन्नियमितिमते
इदमुदाहरणं पूर्वपूर्वोपमर्देनोत्तरोत्तरप्रवृत्तौ तथात्वमिति प्रकाशा
दिमते तत्त्वाकार्यं शशलक्ष्मणः क्वच कुलंभूयोऽपि दृश्येत सा दोषा
णामुपशांतये श्रुतमहो कोपेऽपि कांतं मुखं किं वक्ष्यंत्यपकल्मषाः कृ
तधियः स्वप्नेऽपि सा दुर्लभा चेतः स्वास्थ्यमुपेहि कः खलु युवा धन्योऽ
धरं धास्यतीत्युदाहरणं तत्र वितर्कौत्सुक्यमतिस्मृतिशंकादैन्यधृति
चिंतानां स्फुटमेव पूर्वोपमर्देन प्रतीतिः भावस्थितिस्तु भावमध्ये एवां
तर्भूतेति दृष्टपंक्तिनोक्ता ३१ विद्धमुग्धमीतरे रसाद्यः सविस्तरं मार्कंडे
येन वज्ञाख्यराजानं प्रतिपादितास्तेनतत एव बोध्यं॰ अथपरीतीराहान्तर्य
मासप्तमं चेति पद्यद्वयेन लक्ष्यलक्षणविभागेन॰ आङ् वधौ क्रियावि
शेषणे चैते॰ तथा चाचतुर्थं आसप्तमं च यथा स्यात्तथा पदैः समासः
स्यात्॰ यथेष्टैरष्टमादिभिस्तु समासः स्यात् च तथा सर्वथा सर्वथापि
समासो न स्यात् ३२ एताः क्रमेण पांचाल्यादिनामिकारीत पश्चात्तस्योक्त

विभिः स्मृता इत्यन्तरार्थः तथा च द्वित्रिचतुष्पदानां समासे पांचालीयं
च षट्सप्तपदानां समासे लाटीया ऽष्टमादिपर्यन्तपदसमासे गौडीयाः
सर्वथा समासाभावे वैदर्भीति फलितं यथा रसमितित्तमनतिक्रम्ये
त्यर्थः तथाः तथा च यस्मिन्रसे या रीतिः रसानुकूला सा तत्र कार्या यथा शृंगा
रे वैदर्भी रौद्रवीरयोर्गौडीया अन्यत्र पांचाली लाटीये इत्यर्थः एवं च र

पांचालिकी च लाटीया गौडीया च यथारसं वैदर्भी
च यथासंख्यं चतस्रो रीतयः स्मृताः ३३॥०॥

सानुगुणत्वेन रसांगत्वोक्तेः शब्दालंकाराणां वर्णधर्मत्वेन तद्वैलक्ष
ण्यं पलभ्यते उदाहरणान्युच्यंते क्रमेण मदननृपतियात्राकालविज्ञा
पनाय स्फुरति जलधि मध्ये ताम्रपात्रीव भानुः अयमपि पुरुहूतप्रेय
सीमहर्द्धिरूपाः कलमाइव स्तुध्यांपुः साधुरुल्लाससीति १ इयं पांचा

चं०
१०८
ली अस्माद्रिविंवरदिंवितयोदयाद्रिचूडो न्निषत्तसकलचंद्रतपाचसा
पं संध्यांप्रवज्जहरहस्तंगृहीतकोस्यत्तालइपेवसमलद्यतनाकलक्ष्मीः
२ इयंलाटीया० एतदत्तासिघात्तत्त्वदस्तगलडभ्रशासार्द्धंधनैततद्दोकद्दा
मप्रत्तापज्वलदनलमिलद्धूममालाधमाप० एतद्दिग्गेत्रपात्रासमसम
रपद्मपप्रपन्नः कस्यनासीदेतत्रासीरवाजिव्रजरवुरजरजोराजिराजि
स्पलीषु० ३ इयंगौडीया० निविप्रातेपदिन्मकप्रिरवापदेस्जतिस्ता
कियत्तीमिवनव्यपां० मदनतनोर्वितनोत्तकपंनुत्तामवनिभ्रतनिवि

मधुरायांस्मात्क्रांतावर्गस्पाः पंचमैर्निजैः लका
रत्र्प्रलसंयुक्तौ ह्रस्वव्यवहितौरणौ ३५ ॥ ०॥

प्रपहदिस्पिनः ५ इयंवैदर्भी ३३ अथमधुरीढापरूषालतित्ता
भद्रारव्याः पंचवर्गीः क्रमेणलदायति मधुरेति चत्तभीपंत्रकाव्ये
कवर्गादिस्पित्तावर्णानिजैःपंचमैर्ङकाराद्यैः समाक्रांत्ता युक्ताः ल
कारेणसंयुक्तौलकारस्प ह्रस्वात्तरव्यवहितौरकारणकारौस्तःसमधु राम १०८
रावत्तिदिनर्पः ३५॥

रेफति टवर्गपंचमाक्षराणि च वर्जयित्वा णस्योपादानात् टभिन्नत्वमुभ
यत्र बोध्यं तथा च यत्र कार्ये अन्यानि वर्गाक्षराणि पकारणकारौ च रेफाक्रां
ताः तवर्गश्च ककारपकाराभ्याक्रांतः तकारश्च ककारोर्ध्वमुच्चार्यते सा
श्रौदेत्यर्थः ककारस्य मूर्द्धनि तकारो यस्य मितिविग्रहः तःकमूर्द्धज इति
पाठस्तु स्तुगमः अर्थः स एवः ३५ सर्वैरिति यत्र सकारस्य सर्वैः ककारा

रेफाक्रांता वर्ग्ययणाष्टवर्गात्पंचमाहते कपाक्रांतस्तवर्गः
स्यात्श्रौढापांतःकमूर्धजः ३५ सर्वै रूर्ध्वैः सकारस्य सर्वै
रेफस्य सर्वथा रहो द्वेधा तु संयोगः पुरुषां पांशाश्वोस्वतः ३६

दिभिरूर्ध्वैः संयोगः रेफस्य च तैः सर्वथोपर्यधोभावेन संयोगः रकार
हकारयोर्मिथो द्वेधा उपर्यधोभावेन संयोगः शकारषकारौ च स्वतः स्व
तंत्रौ वर्णांतरासंयुक्तौ सापरूषाव् इति इत्यर्थः अत्र संयोगो व्यवहिताव्यव
हितसाधारणः ३६॥

चं॰
१०९ लकार इति यत्र लभिन्नैर्लकारोऽसंयुक्तः घकार भकार धकार दे
फसकारा लघव उच्चार्यंते सा ललिता अत्रान्ये इति कथनाल्लकारस्य
लकारेण संयोगेपि न दोषः लघुत्वं चात्रासंयुक्तत्वं तेनोदाहरणे सध्यो
गुरसहितत्वेपि न दति तथा शेषा इति शेषा उक्तवृत्तिष्वनुपयुक्ताः ष
कारादयोन्यैः संयुक्ता असंयुक्ता वा यत्रोच्चार्यंते सा भद्रे ॥७॥

लकारोन्यैरसंयुक्तो लघवो घभधारसाः ललितायां तथा
शेषा भद्रायामिति वृत्तयः ३७ अंगभंगोल्लसल्लीलातरुणी
स्मरतोरणं तर्कीचातुर्यपूर्णा किं प्राप्नोत्कटधियां वधा ३८

इत्यर्थः एवं चाक्षरविशेषविन्याससनिबंधना वृत्तय इति भावः ३७॥
एतासां वृत्तीनां क्रमेणोदाहरणान्युदंत्रयेण पादाभ्यां चाहांगेत्यादि
तर्केण कर्कशाः पूर्णिमव्याप्तास्तत्पूर्णा वा या उक्तप स्ताभिः प्राप्ता राम
१०९

उत्कटाधीर्येस्तेषांमापोत्कठेतिपाठेत्तत्रचुराउत्कटेत्याघर्षः तर्कचा
तुर्येतिपाठस्तुयुक्तः स्मरसंबंधितोरणरूपांऽगसंबंधिभंगेनोल्लसं
ती लीलायस्यास्ताहशीतरुणीवचेत्यन्वयः तर्ककर्कशबुद्धीनांकाम
तोरणरूपा तरुणीवप्यानस्तरवयसाहित्यपरिशीलनसरसानामेव
स्फुरदितिभावः अत्रपूर्वार्द्धे॰ड॰राधःस्थोगकारौलकारसंयुक्तौल
कारौरकारणकारयोऽभ्यलसत्तरांतरितत्वमितिमधुरात्वं उत्तरार्द्धेक
कारककारणकारारेफाक्रांताःतकारः ककारपकाराभ्यामाक्रांतःत्क
इत्यत्रककारस्यमूर्द्धनितकारइतिप्रौढत्वंकाव्यप्रकाशोक्तउपनागरि
कापरुषाकोमलेतिवृत्तित्रयमभिधायैतासामेववैदर्भीगौडीयांपावा
लीतिसंज्ञात्रयंवामनादिभिरुक्तमतोवृत्तीनांरीतीनांचनभेदइत्युक्तं
इदमेवरस्त्वपितुमत्रग्रंथकृतारीतिनिरूपणानंतरंतत्वृत्तिनिरूपणमा
रब्धं अत्रतुरीतीनांसमासव्यंग्यत्वंवृत्तीनांतुवर्णानुपूर्वीव्यंग्यत्वमि
त्यभिप्रेत्यभेदउक्तइतिबोध्यं ३० वीक्षोत्सर्पदितिघनानामेघानामा

प्या॰

योपेऽप्यागमेविस्ता रेवाकृष्णोवहीमप्युरोवीक्षपावारवारमुत्सर्य
घन्मुखाग्रंतदाइयँस्यात्पातुषंजकोऽन्यजन्ललनान्तरभसंमु
दंधत्तेदधतीत्यर्थः अत्रपूर्वार्द्धेसकारोर्ध्वे पकारतकारोपकारग
कारदकाराश्चरकारस्योपर्यधः स्यापिनरकारहकारोचमिथ्य

वीक्षोत्सर्पन्मुखाग्राद्दवहीजकोकृष्णास्त्वषं ललनारभसं
धत्ते घनाटोयेमहीयसि २८ महादेवःसत्रःमख्खस्ते
नासोस्तकविजयदेवेनरचितेचिरंचंद्रालोकेमहतिक्र
तुसंख्यःस्तवयतु ५॰ इतिजयदेवकृतेचंद्रालोकेषष्ठोम
यूखःसमाप्तम् ६॥

पर्यधोभावापन्नौशाकारषकारोचस्वतंत्राविति परस्मात्तं तृतीयपादे
सधमारलकारोन्येरसंयुक्तः रेफभकारसकार घकाराश्चलघवप
घपिधस्पसंयुक्तंत्वंतपापिसवर्णविकल्पेनानुस्वारस्याचूत्वेनत
त्ववोध्यं तिलस्तितात्वं असंयुक्तात्परपादेघनरन्धनेसर्वेषांमसं राम
११॰

युक्तत्वाद्ग्राह्यत्वं तत्पारुषतोरणमित्यत्वं तेन मधुरावृत्त्येत्वं तेन प्रौढात्तमित्वं तेन परुषा घनेत्वं ते ललिताशेषेभद्रेति फलितं ३८ महादेवइतीति प्रागवत् कौतुसंख्याः षट्संख्ये इ तिविशेषः ४० इति षष्ठोमयूखः ६ छंदःप्रसिद्धःमधुरादिवृत्तीर्निरूप्य व्यंज नादिवृत्तीर्निरूपयति वृत्तिव्यंजनालक्षणाशक्तिरूपैस्त्रिभिर्वृत्तिविशेषैर्युक्ता भारती क्रमेण क्वचित्स्थलविशेषे गंभीरादिसंज्ञा लभत इत्यर्थः गंभीरा त्रिपथ

वृत्तिभेदैस्त्रिभिर्युक्ता स्रोतोभिरिव जाह्नवी भारती भाति
गंभीरा कुटिला सरला क्वचित् ४१ ॥

गामित्वं प्रसिद्धमेव· तथाच व्यंजनावृत्त्या गंभीरा लक्षणया कुटिला शक्त्या सरलेति फलितं शक्यलक्ष्यान्यतरप्रतीत्युत्तरप्रतीतिजनकत्वं गंभीरत्वं शक्यार्थस्यात्यागेन वाऽर्थान्तरप्रतीतिजनकत्वं कुटिलत्वं अविलंबेनार्थप्रत्यायकत्वं सरलत्वं स्रोतःसु अगाधत्ववक्रत्वसरलत्वानि प्रसिद्धानि ४१ निरूपितरसव्यंजनैकगम्यत्वपात्र क्रमेण निर्दिशन् क्रमेण आ

चं
१११ दोव्यंजनेति निरूपयति संमुखमित्ति स्फुटमर्पितरे शक्यलक्ष्यार्थ
भिन्नेर्थे सांमुख्यं प्रतीतिं विषयत्वं सम्प्रस्मार्थः विदधानाया गिरः तद्वि
षयप्रतीतिं कुर्वतः शब्दस्य यो व्यापारः शक्त्यादिभिन्नः सा व्यंजना
पुंसि सांमुख्यमभिलाषं कुर्वत्या लोलाक्ष्याः कटाक्षोपयेत्यर्थः कट
क्षसाम्येन संमुखावलोकनादिना कटाक्षस्य शक्त्यादितो व्यंजना

सांमुख्यं विदधानायाः स्फुटमर्पितरे गिरः ।।
कटाक्ष इव लोलाक्ष्या व्यापारो व्यंजनात्मकः ४२ ।।

याः सौभाग्यमुक्तं अर्पितरे इत्यावत्या योज्यमिति कश्चित् तथा
च मुख्यार्थबाधग्रहनिरपेक्षबोधजनको मुख्यार्थसंबद्धासंबद्धसा
धारणप्रज्ञार्थविषयको वक्त्रादिवैशिष्ट्यज्ञानप्रतिभाद्युद्बुद्धः सं
स्कारविशेषो व्यंजनेति फलितं वक्त्रादिवैशिष्ट्यादिज्ञानं च व्यंग्यवि
शेषबोधे सहकारीति न सर्वत्र तदपेक्षा अयं भावः गंगायां घोषइत्या राम
१११

दोषेशैत्यपावनत्वादिप्रतीतिर्निर्विवादा साचवक्तंतरेण प्रमाणांतरेण
चासंभाविनी व्यंजनांवृत्तिंतस्यैवप्रभावस्यकल्पयंतितथाहि नतावत्तत्र
शक्तिः संकेताग्रहात् गंगास्त्रीत्पादावपितत्प्रतीत्यापत्तेश्च गंगायादिनी
त्यादावन्यतरवैयर्थ्यापत्तेश्च नापिलक्षणा अनुपपत्तिद्वयरूपतद्बीजा
भावात् तत्रादेर्मुख्यत्वाभावेनतद्बाधाद्यभावाच्च नहितटंगंगापदस्यमु
ख्योऽर्थः नवागंगानिष्टशैत्यपावनत्वादितीरसंबंधिनवाशैत्यादिप्रतीतिः
प्रयोजनवतीत्तिकिमपिलक्षणावीजमस्तिप्रयोजनंतरकल्पनायांशैत्या
दिप्रतीतेः प्रयोजनत्वंनस्यात् नचास्तुशैत्यादिविशिष्टतीरलक्षणातद्वि
ष्टतद्विशिष्टतीरप्रतीतेर्लक्षणाफलत्वेनतद्विशिष्टतीरत्वस्यरूपवम
त्ताजत्वेनलक्षतावच्छेदकत्वानुपपत्तेः नचान्यत्रावगतस्यतद्देशिस्य॥
स्यतत्त्वमस्तित्तिवाच्यं. तद्विशेषप्रतीत्यनापत्तेः शैत्यादिप्रतीतेः फलत्वा
नुपपत्तेश्चनापिप्रमाणांतरं संनिकर्षव्याप्तिस्मृत्यादेरनपेक्षणात् अ
तस्तन्नव्यंजनैववक्तंतरमितिअन्यान्यपिगमकानिअाकरेस्पष्टानी

चं॰
११२ तिनेहतन्यंतेसाचेयंव्यंजनात्रिविधाशक्तिमूलालक्षणामूलाव्यं
जनामूलाच॰ तत्राधानेकार्यशब्दयुक्तवाक्यात्प्रकरणादिसहका
रेणैकवाक्यार्थबोधेजातेऽर्थांतरबोधस्यप्रकारणादिनियंत्रित
शक्त्या असंभवान्मुख्यार्थबाधाद्यभावेनलक्षणाया असंभवात्तयै
वोपपत्तेरावश्यकीसायथा भद्रात्मनोदुरधिरोहतनोर्विशालवंशो
न्नतेः कृतशिलीमुखसंग्रहस्य यस्यानुपप्लुतगतेः परवारणस्य दा
नांबुसेकसुभगः सततंकरोऽभूत्॰ अत्रप्रकरणेन भद्रात्मनइत्या
दिपदानांराज्ञितदन्वययोग्येचार्थेअभिधायानियंत्रणेपिगजस्य
तदन्वययोग्यस्यचार्थस्य व्यंजनयैवप्रतीतिः नचायंश्लेषोनव्यंज
नायस्येतिसर्वनाम्नः प्रकरणापेक्षयाश्रौव्येन अभिधानियमनात्त
न्नियमनाभावे एवश्लेषांगीकारात्॰ द्वितीयायथा मुखंविकसित
स्मितंवशितवक्रिमप्रेक्षितं समुच्छलितविभ्रमागतिरपास्तसंस्था
मतिः॰ उरोमुकुलितस्तनंजघनमंसबंधोद्धुरं वतेंदुवदनातनौत्त राम
११२

रणो मोऽमोमोदते १ अत्र विकासादीनां पुष्पादिधर्मत्वेन स्मितादाव
नुपपत्तेर्विकसितत्वादिसमुच्छलितत्वपास्तसंस्थामुकुलितोद्धुरं मोदते
इतिशब्दैः क्रमेण प्रस्तुतत्वाय तत्वोल्लसितत्वानेकविषयसंचारित्वोद्भि
न्नत्वयोगपत्वानि पंचितत्वलक्षणया रमणीयत्तातिशायद्युक्तानुरागित्व
सकलवश्रीकारित्वानुरागातिशायालिंगनयोगपत्वरमणीयत्वस्वरूपाणि
यत्वा निकाव्यवासनापरिपक्वबुद्धिभिः सहृदयैः प्रतीयतेऽत्र तीयायथा उ
अणोच्चलणोप्कंदाभिसिणी पत्तस्मिरेह इवला आणोम्मल मरगअ
भाअणपद्दिहिआसंरवसुत्तिव्व अत्र निष्पंदत्वेनाचलत्वेनैतजना
गमनाभावोऽतोऽनत्वमत्रागतइति मिथ्यावदसीतिकयाचिद्दत्तसंकेता
त्वंनागता अहं त्वागत इति वादिनं प्रतिव्यज्यते तत्र मध्यमाद्विविधा
गूढव्यंग्याऽगूढव्यंग्याच · अद्यामुखं विकसितेत्यादौ तद्यथा तथाका
व्येत्यादिना उक्तं द्वितीयायथा श्रीपरिचयाज्जडा अपि भवंत्यभिज्ञाविः
दग्धचरितानां उपदिशाति कामिनीनां यौवनमदएव ललितानि अ

ध्वं.
११३ त्ववाक्यप्रयोक्तृत्वरूपोपदेशकत्वस्यमदेःसंभवादादिकाव्यलक्षण
याःनायसेन शिक्षादानंव्यज्यतेतच्चसहृदयासहृदयवेद्यत्वाद्गूढंकिं
चगूढाव्यंग्यानांकश्चिद्युगपत्तावच्छेदकभानाभानाभ्यामपिद्वैविध्यंबोध्यं
वस्त्वलंकारभावादिव्यंग्येषुतज्ज्ञानंरसव्यंग्येषुतदभानमितिनहिव्यंग्येर
सादौशृंगारत्वादिभानंविगलितवेद्यान्तररूपत्वभंगापत्तेः अतएवभावा
नामिवनरसानांसंधिशावलत्ते इदिक ५२ एवंव्यंजनांनिरूप्यतत्प्रयो

अविवक्षितवाच्यस्य द्वौभेदौवाच्यमेवचेत् अर्था
न्तरेसंक्रमितमत्यंतंवातिरस्कृतं ५३ ॥०॥०॥

उनभूतध्वनिभेदानांदशभिः प्रतिपादनव्याजेनादौलक्षणमूल
व्यंजनंनिरूपयन् तस्याः तद्येनादौभेदौकथयन् ध्वनिविशेषस्य
भेदावाह अविवेति ध्वनिर्द्वेधा अविवक्षितवाच्योविवक्षितान्यपर राम

वाच्यश्च तत्राद्यस्याविवक्षितं वाच्यं यस्मिन् तस्य लक्षणामूलव्यंग्यकस्य द्वौ
भेदौ चेत् यदि वाच्यमेवार्थान्तरे संक्रमितं. यद्वा अत्यंतं तिरस्कृतं तत्तथा चार्था
न्तरसंक्रमितवाच्योऽत्यंततिरस्कृतवाच्यश्चेति तत् द्वैविध्येन तस्याद्विधेत्य
र्थः तत्रार्थान्तरसंक्रमितत्वं लक्ष्यार्थपरिणतत्वं यथा त्वामस्मि वच्मि वि
दुषां समवायोऽत्र विद्यते आत्मीयां मतिमास्थाय स्थितिमत्र विधेहि त
त् अत्रास्मीत्यहमर्थे अत्र वच्मीति स्वकर्तृककथनस्य स्वमुखादेव वचन
निःसारणादेव सिद्धेरनुपयुक्तं सत् सामान्यविशेषभावसंबंधेनोपदि
शामीत्यर्थे लक्षणया लक्ष्योपरिणतं एवं त्वामित्यादावपि बोध्यं स्वस्याम
त्वं चेह व्यंग्यं. द्वितीयं यथा उपकृतं बहु नाम किमुच्यते सुजनता प्रथिता
८५ भवता परं विदधदीदृशमेव सदा सखे सुखितमास्स्व ततः शरदां शतं इति अ
नोपकृतमित्याद्यपकारिणा बाधितं विरोधसंबंधेनापकृतत्वादिलक्षकं।
स्वस्य साधुत्वं व्यंग्यं. एवं चाजहल्लक्षणामूलव्यंग्यमाद्यं. जहल्लक्षणामू
लव्यंग्यं द्वितीयं इति फलितं तथा च लक्षणामूलव्यंजनाद्वैविध्येन तत्तद्ध्व
निर्दिष्टे इति तात्पर्यम् ४३॥

अप्यविवक्षितान्यपरवाच्यस्यध्वनेर्भेदद्वयकथनव्याजेनशक्तिमू
लव्यंजनांतावत्द्विधाऽऽह। द्वाविति विवक्षितः अन्यपरोऽन्यतात्प
र्यकोवाच्यार्थोयस्मिन्तस्यशक्तिमूलव्यंग्यकस्यशक्तस्यसतो
व्यंजकस्यलक्ष्यंव्यंग्यक्रमोऽलक्ष्यव्यंग्यक्रमश्चेतिद्वौभेदावित्य
र्थः लक्ष्यंज्ञायमानंव्यंग्यंक्रमेणशब्दार्थशक्तिज्ञानक्रमेणय

द्वौविवक्षितवाच्यस्यलक्ष्यालक्ष्यक्रमात्मकौ ॥
चत्वारिंशद्युतैकेनभेदाःषट्चानयोःक्रमात् ५४

स्मिन्नितिविग्रहः व्यंग्यव्यंजकयोःक्रमप्रतीतिकइत्यर्थः तदन्योऽप
रः अप्यव्यंग्यव्यंजकभेदेनैतदुभयध्वनिभेदानाह चत्वारिंश
दिति अनयोर्लक्ष्यव्यंग्यक्रमालक्ष्यव्यंग्यक्रमालक्ष्यव्यंग्यक्रमयोः
क्रमादेकेनयुताचत्वारिंशत्षट्चभेदाभवंतीत्यर्थः तद्यथाव

त्यमाणशीत्याशब्दशक्ते द्वौ भेदौ अर्थशक्ते द्वौ दश एवं मिलित्वा चतुर्दश तेषां पदवाक्यनिष्ठतया द्वैगुण्येनाष्टाविंशतिः अर्थशक्तेः प्रबंधनिष्ठा द्वादशाउभयशक्ते रेकः एवं लक्ष्यक्रमव्यंग्यस्यैकचत्वारिंशद्भेदाः अलक्ष्यव्यंग्यक्रमस्य तु पदादिभेदेन षट् एवं मिलित्वोभयोः सप्तचत्वारिंशद्भेदा इति ४४ एवमुक्तसप्तचत्वारिंशद्भेदानुपसंहरति त्रिधेत्यादिस्फुटक्रमात् लक्ष्यव्यंग्यक्रमात् हेतौ पंचमी एवम

त्रिधा शब्दार्थतद्युग्मशक्तिजन्मा स्फुटक्रमः॥
रसभावतदाभासप्रमुखस्त्वस्फुटक्रमः ४४॥

ग्रेपि शब्दशक्तिजन्मा अर्थशक्तिजन्मा उभयशक्तिजन्मा चेति त्रिधाभेदाभवंतीत्यर्थः अन्यशब्दः परिवृत्त्यसहः सत्प्राद्यः परिवृत्तिसहः पत्रकाश्चित्तत्सहः कश्चिन्नसौ ऽ त्यः अस्फुटक्रमाद

लक्ष्यव्यंग्यक्रमात्तु रसादिव्यंग्यकाणां क एव भेदो भवतीत्यर्थः उभयत्राप्य
मातृपाठस्तु सुगम एव अप्रमुख्यशब्देन भावशान्त्यादिः यद्यपि विभावादिभि
र्व्यक्तो रस इति कार्यकारणयोर्भेदादस्ति क्रमस्तथापि सन्नलक्ष्यते कालसं॰
निकर्षादिति भावः ५५ तत्रादौ शब्दशक्तिसमुद्भवस्य भेदद्वयमाह वस्त्विति
अर्थेन वस्तुनोऽलंकारस्य च व्यक्तेर्व्यंजनादित्यर्थः तथा च वस्तुव्यंग्यकमलं

वस्त्वलंकारयोर्व्यक्तेर्भेदौ द्वौ शब्दशक्तिजौ अर्थशक्तिसमुद्भ
स्य भेदा द्वादशात्तथा ५६ चत्वारो वस्त्वलंकारमलंका
रं वस्तु वस्तु यत् अलंकारमलंकारो वस्तु वस्तु व्यनक्ति तत् ५७

कारव्यंग्यकं चेति द्वौ भेदौ शब्दशक्तिजस्येति भावः अर्थशक्त्युद्भवस्य द्वादश भे॰
देदानाहार्थेति सार्धद्वाभ्यां तथा पेति तद्वेवोच्यन्ते इत्यर्थः ५६ तदेवाह चत्वा
र इति यत् यस्मात् अत्र क्रमेण यथासंभवं कर्तृकर्मपदानि तत् तस्मात् त
थाचालंकारव्यंजकं वस्तु वस्तुव्यंजकोऽलंकारः अलंकारव्यंजकोऽलंकारः

वस्तुवस्तुनालंकारोऽलंकारेणवस्तुनालंकारेणवस्तु ॥५७॥

एतेषांचतुर्णांत्रैविध्यमाह वक्तुरितिपतः कविनिबध्यस्यवक्तुःप्रौढोक्तिनिर्मि
तोर्थोव्यंजकः कवेस्तादृशोऽर्थोवाव्यंजकःस्वसिद्धोवार्थोव्यंजकःस्ततएते
तेसर्वोक्ताभेदाःचत्वारस्त्रिगुणाःप्रत्येकंत्रिधेत्यर्थः तथाचकविकल्पितवक्तृ
प्रौढोक्तिनिष्पन्नाश्चत्वारः कविप्रौढोक्तिनिष्पन्नाश्चत्वारः स्वसिद्धाः च
त्वार इतिफलितंस्वसिद्धत्वंचस्वतः संभवित्वंकवितत्कल्पितवक्त्रन्यतरप्रौ
ढोक्तिंविना घटमानत्वमितियावत् अत्रवस्तुपदेनालंकारभिन्नंग्राह्यं ४८

वक्तुःकविनिबद्धस्यकवेर्वाप्रौढिनिर्मितः स्वसिद्धोवाव्यंज
कोर्थश्चत्वारस्त्रिगुणास्ततः ४८ शब्दार्थोभयभूरेकःस
चवाक्यैकसंश्रयः पदैकदेशरचनावर्णवाक्यपदेष्वपि ४९

एकउभयशक्तिजइत्याहार्द्धेनचोस्यर्थेशब्देतियतः सवाक्यनिष्ठएवातउ
भयशक्त्युत्थएकवेत्यर्थः कस्यचित्परिवृत्त्यादेरसंभवादितिभावः एकस्या
स्फुटकमस्यशब्दशक्त्यापयभेदेनषड्भेदानाहपदैकेति पदैकदेशःप्र

प्रबंधो वाक्यसमूहः असौ रसाद्याख्यो रसादिराख्यायते ऽभिव्यक्तते यत्र
सः व्यंग्यकः असंलक्ष्यव्यंग्यक्रमः बोद्धेत्यर्थः तदन्यो क्ता नामध्विकभेदाना
ह एष्विति द्वौ लक्षणामूलौ शक्तिमूलेषु द्वौ शब्दशक्तितो द्वादशार्थश
क्तिजाः एवं षोडश उभयशक्तिजस्य पदनिष्ठत्वादग्रहणं ५० एषूक्ते

प्रबंधे चेति बोद्धा सौ रसाद्याख्यो ऽस्फुटक्रमः एषु सप्तदश
स्वेकं परित्यज्यास्फुटक्रमं ५० ये षोडशाद्या द्विगुणास्ते स्यु
र्वाक्यपदाश्रयात् प्रबंधेपि द्वादश स्युरर्थशक्तिभुवो भिदः ५१

षु असंलक्ष्यव्यंग्यक्रमं गृहीत्वा सप्तदशस्वेकमलक्ष्यव्यंग्यक्रमं परित्य
ज्य मुक्तापे आद्याः षोडशभेदाः ते वाक्यपदरूपाश्रयभेदात् द्विगुणाः
द्वात्रिंशत्स्युरित्यर्थः ५२ सर्वसंकलनेन ध्वनिभेदान् गणयन्नुपसंहर
ति द्वात्रिंशदिति पूर्वोक्ताः सप्तदशभेदा तदंतर्गतषोडशानां द्वैविध्ये त्रिंशत्

अर्थशक्तिजस्य प्रबंधे द्वादश पूर्वोक्ता एव उभयशक्तिजः अस्फुटक्रमस्य
पदाद्यात्मयभेदेन षट् एते सर्वे संकलिताः संभिन्ना एकपंचाशद्भेदाः स्युः
संकरसंसृष्टिभ्यां संभेदस्तु वा तुल्यमित्याह संभीति त्रिविधसंकरेण सं
सृष्ट्या च सहस्रशः संभेदा वेदखाब्धिवियच्चंद्रा भवंति ९ एतेषामुदाहर
णानि अन्यतो बोध्यानि ५२ पुनर्व्यंग्यस्य विभागांतरमाह वक्तुस्तु

द्वात्रिंशात् द्वादशोक्तः षट् सर्वे संकलिता ध्वनेः भेदाः स्युरेक
पंचाशत् संभिन्नास्तु सहस्रशः ५२ वक्तुरस्तु तं बोधयितुं व्यं
ग्यं वक्तुरभीप्सितं स्वाकूतमतद्रूपं स्वयमुच्छ्वसितं गिरः ५३

मिति वक्तुर्बोधयितुमभीप्सितं पव्यंग्यं तत्तद्व्यक्तास्स्वकूतं अतद्रूपं वक्तु
रभिप्रायादिविषयं तत्तद्गिरः शब्दात्स्वयमेव स्वभावादेव वक्तृतात्प
र्य विनोच्छ्वसितं प्रतीयमानं तत्स्वाकूतमित्यर्थः अंकुरवदंकुरोपि

चं.
११८ ऽअयंभावः सर्वोक्तंव्यंग्यंद्विधाकस्मात्स्वरूतंस्वांकुरितंचवक्तृतात्स्यपिविषय
भूतमाद्यंयत्तदविषयभूतंशब्दादेवसहृदयैः प्रतीयतेतदंत्यंआद्यंगं
गायांघोषइत्यादौशेत्यादि अन्यच्याऽवाचकशब्दानुपपत्तिः द्वितीय
मस्तंगतः सवितेत्यादौअत्राभिसरणमुपक्रम्यतांप्राप्य प्रायस्तेप्रेयान्क
र्मकरणान्निवर्तीमहे साधोविधिरुपक्रम्यतांदूरंमागाः गावोगृहे
प्रवेश्यंतांसंतापोऽधुनानभवतिविज्ञेयवस्तूनिसंगृह्यंतांनागतोऽद्य

कश्चित्साधारणः कश्चिदामंत्रप्रतिबोधितः कश्चि
त्तटस्थः कश्चिच्चबोधितप्रतिबोधितः ५४॥०॥

मेप्रेयानित्यादयोनानाऽर्थाअतात्पर्यभूताः स्वशब्दानभिधेयाः बो
द्धव्यादिविशेषेणप्रतीतिपथमवतरंतोव्यंग्याएवेति ५२ तत्रबोद्धव्या
ठर्विध्येतायंचतुर्विधमितिसाऊलोकेनाह कश्चिदिति कश्चित्साधा
रणोबोद्धाइत्येवंक्रमेणबोद्धुश्चातुर्विध्यमित्यर्थः तत्रसाधारणोब साम
११८

त्तातात्पर्येनभिन्नः यथागतोस्तमर्क इत्यादौ वक्तृतात्पर्येनभिन्नस्यापि
वोधः अमंत्र्यसंवोध्यप्रतिवोधितो द्वितीयः यथा पंथिअणएत्थसत्थ
रमत्थिमंणंपत्थरत्थलेगावे उणअपओहरं पेक्खिअउण जइवससिता
वससु अत्रस्वयंदूत्या व्यंग्यः पदे एवाथरहस्यं इत्थं पांथसंवोध्यउक्तं
तत्रस्वस्तरकटाद्यास्तरणं नास्ति पाषाणवाहुल्येनात्रण दौर्लभ्यात् व
ष्टि प्रतिवंधाद्वासे द्वाचे द्वसेति यथाष्कृतेः व्यंजनपाषाणान्हरवीः स
त्पर स्त्रास्त्रं मंथं उद्दीपनं उन्नतस्तनं च श्लेषेण दृष्टोपभोगदत्तमो ऽन्यः को
नामान्यत्र गंतुमहतीत्याशयः प्रकाशांते प्रयोज्यभिन्नत्वे सति तात्पर्य
त्तत्वंतटस्यत्वं यथा उअणिाच्चलणि च्चंदाभिसिणीपत्तस्मिरेहर
वलाअणिम्मलमरगअभा अणपरि ट्ठिआ संरवसुत्तिव अत्रसं
रवीप्रत्युक्त्यानायिकयातटस्थं प्रतिसंकेतस्थानं वोधितं वोधितेनप्र
किं यतः तत्रस्थितिर्युक्तिमतीनदेशोकं राहि मांशोरपित्ता पयंति अत्र

प्रिया बोधित वक्त्रा प्रतिबोधितो नायकः यथा साधारणः अप्रयोज्यत्वेन प्रतिपाद्यः यथा कुंभगृहीत्वा विपुलं सत्वरं समुपागता अमस्वेदनिरासाय विश्रामस्यापि सखि दृतणं अत्रेदमाजलकुंभवहन जन्य एवायं अमो ऽतो नान्यथा शंकिष्याद्यति सखी प्रतिरतिगोपनं तथा च सखी प्रतिपाद्यापि न प्रयोज्या॰ आमंत्र प्रतिबोधितो नीचः यथा त्वंदूति निरगाः कुंजं न तु पापीयसो गृहं किं षंडकाभरणं देहे इमपते कथमन्यथा अत्र दूत्यादिर्नीचो बोद्धा तटस्थः समो नियोज्यः यथा गृहोपकरणे सर्वव्या

इत्येवं बोद्धवैचित्र्या द्वक्तृस्थं तं चतुर्विधं उपेतानि
रूढाभ्यां च द्विधा स्वांकुरितं मतं ५५ ॥०॥०॥

पृतापाः स्वेदिनं संध्यायां मम विश्रामः क्वचिद्भवति वा न वा अत्र संकेतकाल बोद्धा समो नियोज्यः उत्तमो नियोज्य स्तर्थः उक्तमेवोदाहरणं॰ तथा च वक्तृतात्पर्य विषयस्थं तं व्यंग्यं बोद्धभेदेन भिन्नमिति भावः ५४ द्वितीयस्य द्वैविध्यमाह उपेदेति उपेता विषयस्थं तनि रूढ विषयस्थं तं च॥ राम
११८

त्यर्थः अव्यक्तं गूढं चेति यावत् तस्य स्फुटतया सर्वजनवेद्यत्वमगूढत्वं यथा

येनामकेचिदिति अत्र गवीविस्फारः सर्वसाधारणो व्यापः गूढत्वं च

कयावाप्यभावनापरिपक्वबुद्धिविभवमात्रवेद्यत्वं यथा मुखं विकसि

तेति प्रतिपादितमिदमधस्तात् ५५ तत्र निह्नवस्यानेकरूपतामाह

भूतादीति भूतगोपनं भाविगोपनं वर्त्तमानगोपनं चेत्यर्थः त्रित

यमपि यथा स्वभ्रूः कुप्यतु निर्दिष्टां त्विति तस्माद्वक्तुस्तस्ताद्विभे

भूतादिकालभेदेन निह्नवः स्यादनेकधा अने

नापि प्रभेदेन व्यक्तिवल्ली विजृंभते ५६ ॥

देनापि व्यंग्यभेदः संभवतीति सूचयन् लक्षणामूलव्यंजनाभेदा

नुपसंहरति अनेनेति अनेनापि लक्ष्याय व्यंग्यभेदेनापि व्यक्तिव

ल्लीलक्षणामूलव्यंजनारूपलताविकासतेनैकधा भवतीत्यर्थः य

प्यार्थांतरसंक्रमितंवाच्यादिभेदेनभेदस्तथोक्तप्रकारेणव्यंग्य
भेदेनापिध्वनिभेदइतिभावः ५६ यथा शक्तिमूलव्यंजनांनिरूप
यन्वाच्यव्यंग्यमाह नानेति नानाप्रभेदायस्मात्सानानार्थावाक्
प्रकरणादिनाक्वचिदर्थेनियंत्रानियमिता एकार्थवाचकत्वेननि
श्चितासतीयमन्यंद्वितीयमर्थंवक्तितद्वाचाव्यंग्यमित्युच्यतेइत्यर्थः
सचासौवाच्यंग्यश्चेतिसमासः नानार्थस्यकस्मादर्थादर्थांतरो

नानाप्रभेदानियंत्राक्वचित्प्रकरणादिना अर्थं
यमन्यंयवक्तितद्वाच्यव्यंग्यमित्युच्यते ५७ ॥०॥

पस्थितिः शक्तिमूलव्यंजनयैव शक्तिलक्षणयोरसंभवादि
तिभावः यथा भद्रात्मनइति अत्रप्रकरणेनपुरुषेअभिधानि
यंत्रा अतोगजरूपार्थानकेवलंवाच्योव्यंग्योवाऽपितुवाच्यःसन्व्यं
ग्यः अनियमनदशायांवाच्योनियमनदशायांव्यंग्यइतिभावः आदिना

महादेव इति पूर्ववन्महत्ति मुनिसंख्या इति विशेषः सप्तसंख्याः इत्यर्थः ५८ इति सप्तमो विलासः ७ ॥ ॐ ॥ व्यंजनावृत्ति निरूपस्थित व्यंग्यभेदेन व्यंजकध्वनिभेदं निरूपयन् प्रसंगेन क्रमेण ध्वनिर्गुणीभूतव्यंग्यरूपलक्षणकथनपूर्वं मध्यमकाव्यस्य भेदानाह ॥ प्रदीप्ते येन काव्येन व्यज्यमानव्यंजनया प्रत्यापितं व्यंग्यं मनसः ॥

महादेवः सत्रः महत्ति मुनिसंख्यः स्वयतः इति जयदेवकृतचंद्रालोके सप्तमो मयूखः ७ ॥ यद्याज्यमानं मनसस्तैमित्यायसनो ध्वनिः अन्यथा तु गुणीभूतव्यंग्यमायतत्ति त्रिधा ५९ ॥

स्तैमित्याय आर्द्रीभावाय भवति स्तिमआर्द्रीभावे आर्द्रीभावो इति ः इदमुपलक्षणं विस्तारादीनामपि तत्पाच तज्जनकं भवति आह्लादजनकमिति यावत् व्यंग्यप्रतीत्याय च मनसोऽत्यंत

माह्लाद इति परमनिकर्षः स इति विशेषणनिर्देशः तत्काव्यंध्वनिः
उत्तमकाव्यं विशेषाभिप्रायं पुल्लिंगं यत्र व्यंग्यं वाच्यापेक्षया चम
त्कारजनकं स ध्वनिरिति लक्षणं अन्यथा तु व्यंग्यस्य ततः चमत्का
रजनकत्वाभावेन गुणीभूतव्यंग्यरूपं मध्यमकाव्यं तच्च वक्ष्यमाण
भेदैस्त्रिधा त्रिधात्वमापततीति मामोत्तीत्यर्थः आद्यस्य तु भेदाः पूर्व
मुक्ताः अयमाशयः सव्यंग्यमेव काव्यं न तु तदन्यः तस्य प्राधान्येन धी
रास्तावस्मादिगुणत्वेन वेत्यत्र नाग्रहः तथा च यत्र चमत्कारजनक
मपि रसादिव्यंग्यं प्रकरणाद्यनुरोधेनैतद्गुणत्वेन प्रतीयते तत्र मध्यम
काव्यत्वं यत्र तु तस्यैव प्राधान्यं तत्रोत्तमकाव्यत्वं· एतेनाव्यंग्यचित्रादी
नामपि काव्यत्वे तयोत्तममध्यमाधमभेदेन त्रिविधं काव्यमित्यपास्तं
व्यंग्यस्यैव तन्मूलत्वात् तदुक्तं प्रधानगुणभावाभ्यां व्यंग्यस्यैवं व्यव
स्थिते उभे काव्ये ततोऽन्यद्यच्चित्रमभिधीयते इति प्रकाशे तु सव्यंग्य
मेव काव्यमिति न नियमः अव्यंग्येपि काव्यव्यवहारादत उक्तं रीत्यादिवि

धंतदित्युक्तं चंडीदासस्तु उत्तमाधमभेदेन काव्यं द्विधा प्रकारेण
यन्तरोधेनान्यांगत्वेन प्रतीयमानस्यापि रसादेर्व्यंग्यस्य पूर्वमासाद्य
त्वेन ध्वनित्वस्य बाधायोगादित्याह तत्राद्यं यथा ग्रामतरुणं तरुण्या
नववंजुलमंजरीसनाथकरं पश्यंत्या भवति मुहुर्नितरां मलिना मु
खच्छाया अत्र वंजुललतागृहे दत्तसंकेता तरुणी नागतेति व्यंग्यं तत्
च्चरुणीभूतं तदपेक्षया वाच्यस्यैव चमत्कारकारित्वात् यतः प
२४८ श्यंत्या नितरां मुखच्छाया मलिना भवतीत्यनेन दर्शनकाल एव मा
लिन्यं तस्या इति प्रायः संतन्यमानतया चेति वाच्यं प्रतीयत इति द्वि
तीयं यथा त्वं वदति निरगाद् इति अत्र तदंतिकमेव रंतुं गतासीति
प्राधान्येन पापीयसि इत्यनेन व्यज्यते एवं निःशेषच्युतेत्यपि बोध्यं
अत्राधमपदेन तथा· एवं स्थिताः स्तनमित्यपि अत्र समाध्यव
स्यासनविशेषस्य व्यंग्यस्य प्राधान्येन चमत्कारजनकत्वादिति बोध्यं
एतेनेदमुदाहरणं ख्यं चिंत्यमित्यपास्तमिति स्पष्टमन्यत्र ५८॥

तत्रव्यंग्यस्याष्टविधत्वेनमध्यमकाव्यस्याष्टविधत्वस्यागूढमित्यादि
नावक्ष्यमाणत्वात्तदुयोदयात्ततया अगूढत्वस्यत्रैविध्यमाह व्यक्तएवे
ति व्यक्तः प्रकटोवाच्य एव व्यंग्यः वाच्यान्यथानुपपत्तिलभ्योद्वितीयः वा
च्योर्थोव्यंग्यापेक्षयाचमत्कारजनकस्तृतीयः एवमगूढव्यंग्यस्यत्रैवि
ध्यमित्यर्थः अत्रचमत्कारजनकत्वंरसव्यंजकत्वं क्वचिद्व्यक्तिरेवेतिपा
ठः तत्रव्यंग्योर्थोव्यक्तिरेवप्रकटएवेत्यर्थः तेनप्रकटव्यंग्यमेकं व्यंग्यद्

व्यक्तिरेव क्वचिद्व्यंग्यः क्वचिदर्थस्वभावतः क्वचि
च्चारुतरस्याग्रे स विमुंचति चारुतां ९ ॥ ०॥०॥

त्यग्रेपिसंबध्यते चारुतांनमुंचतीत्यस्यापकर्षः अर्थस्वभावत इति
समस्तपाठः तेनयत्रार्थस्वभावात्स्वाभाविकादर्थो व्यंग्योर्थोनचारुरित्य
र्थः तेनाचारुव्यंग्यंद्वितीयं चारुवाच्यंतृतीयंप्राग्वत् केचित्तु अत्रैवपाठेचा
रुतांमुंचतीत्यस्यत्रिषुसंबंधः तथाचक्वचिद्व्यक्तिर्व्यंजनैवचारुतांमुंच

तीत्येकः प्रकारः क्वचिद्व्यंग्योर्थः स्वभावत एव वाच्यस्तं मुंचतीत्यपरः अत्र पेदः समस्तपाठः क्वचिद्वाच्यस्यार्थस्य आत्मार्थं सं निधानाद्वाच्यादित्यपर इत्याहुः एतेषामुदाहरणानि स्त्रीपरीतिग्रामतरुणमितिच ६ एतदेवसोदाहरणमाह अगूढमिति अन्येरस्य विधंगुणीभूतव्यंग्यं मध्यमकाव्यमुक्तं तन्मतेनसोदाह

अगूढंकलयेदर्थं तरसंक्रमितादिकं विस्म
तः किमयानापसत्वयाकुंभसंभवः ६१॥०

रणामगूढव्यंग्यमादावाहागूढमित्ती त्यन्ये सर्वोक्तास्त्रमलकृदिष्टमेदाइतितद्भावः अर्थान्तरसंक्रमितवाच्यं अत्यंततातिरस्कृतवाच्यं चलक्षणायां पदशक्तिमूलसंलक्ष्यक्रमं चव्यंग्यमगूढंस्फुटंकलयेत् ज्ञापयेदित्यर्थः त्रिविधस्याप्युदाहरण

ध्वं॰
१२२

माह विस्मृतइति समुद्र प्रतिकस्य चिदुक्तिः अत्र कुंभसंभवपदेना
त्यंततिरस्कृतवाच्येन समुद्रपानमुत्पश्यकेनत्वयेतिपदेनाथोत्तर
संक्रमितवाच्येन तत्सामर्थ्यतात्पर्यकेन अपांनाथेत्यनेन जडनाथे
ति भावशक्तिमूलानुरणनेन विस्मृत इत्यर्थशक्तिमूलानुरणने॥
नचसमुन्नितस्त्वापास्यतितस्मात्त्वयाविभेतव्यमितिव्यंगं॰ तच्चस्फुटं ध्व
यत्ररसादिअपररसाद्यंगंतदपरांगं तद्रूपंद्वितीयमाह अपरेति॥

अपरस्यरसादेर्यदंगमन्यद्रसादिकं हाहामु
त्कुचकाश्मीरलिप्तंभिन्नमुरःशरैः ६२॥०॥

आदिनाभावादिग्रहणं उदाहरणमाह होहेति रणेपतितंकांतम
वलोक्यकस्याश्चिदुक्तिः अत्रव्यंग्यशृंगारस्यकरुणांगत्वं॰ एतस्यो
दाहरणांतराणिरसवत्प्रेयउर्जस्विदलंकारकथनप्रसंगेउक्तानिध्व राम
१२२

वाच्यसिद्ध्यंगमाह तस्येति वाच्यार्थस्य प्रतीतेरंगं उपपादको व्यं
ग्योर्थो यत्र तदपि तस्याः वाच्यसिद्ध्यंगनामककाव्यं तत्र दृष्टांत
माह नौरिति यथा व्यंग्यो नौरूपोऽर्थो वाच्यस्य वारिधेस्तद्रूपक
स्यांगमित्यर्थः तदेव प्रदर्शयन्नुदाहरति संश्रित्येति भ्रमरक
रणेन सूर्यं नियतं स्मरि सूर्ययोर्वर्तमानोपि तद्रणिशब्दोननो

तथा वाच्यस्य सिद्ध्यंगं नौरर्थो वारिधेर्यथा संश्रित्य तत्तर
णिं धीरास्तरंति व्याधिवारिधिं ६३ अस्फुटं स्तनयोरत्र
कोकसादृश्यपवन्मतं कुंकुमाक्तौ स्तनद्वंद्वं मानसं समगाहतं ६४

कावाचकः किंतु व्यंजकः स च व्यंग्यो नौकारूपार्थो वाचस्य व्याधि
वारिधिरूपकस्योपपादकः इदमेव स्पष्टीकृतं नौरर्थ इति ६३
स्फुटव्यंग्यमाह ६४ अस्फुटमिति अस्फुटत्वं च विलंबेन प्रतीय

चं॰
१२३ मानत्वंत्तदेवस्यास्यापत्ति स्तनयोरिति अत्र कुंकुमाक्तमितिकाव्ये॰। स्तनयोर्मिथ्यः सादृश्यंपकोकसादृश्यवदत्रकाव्येमत्तमिष्टमित्यर्थः कुं कुमाक्तत्वेनस्तनयोः कोकसादृश्यरूपंव्यंग्यअस्फुटमित्यर्थः यथावा रा मचंद्रवदनेनचंद्रमानिर्जितः किमुपास्तसरोरुहांरामपादकमलेनविद्रु मः पल्लवस्यतुलनायिकीदृशी अत्रक्षीरसमुद्रोत्पन्नजेतस्तडागोत्पन्न जपकिपान्परिभ्रम इतिचंद्रपदेनक्षीरसागरजत्वंव्यंग्यमस्फुटं एवंवि द्रुमपदेनमहाद्रुमजत्वं ६४ संदिग्धप्राधान्यव्यंग्यमाह संदिग्धमिति

संदिग्धंयदिसंदेहोदैर्घ्याद्युत्पलयोरिव संप्राप्तेन

यनेत्तस्याः आवर्णोत्तंसमभूमिकां ६५ ॥ ७॥७॥

दैर्घ्यादिचोत्पलंचेतिद्वंद्वः उत्पलपदेनोत्पलसादृश्यंपत्तेनपत्रवाच्यव्यं ग्ययोस्तयोरिवप्राधान्यंयदिसंदेहस्तदातत्संदिग्धप्राधान्यव्यंग्यपकं। उदाहरतिसमिति अत्रतस्यानेत्रेतत्पर्यनगत्ते इतिवाच्यंकर्णसीतं राम
१२३

वक्त्रं तन्नीलोत्पलसदृशो इतिव्यंग्यं तयोः किंप्रधानमितिसंदेहः तथा
चाश्रवणे तत्स्मिन्किं गते इत्यनेन दैन्योत्पलसादृश्ययोः कस्य प्राधा
न्यमितिसंदेहवत्संदेह इत्यर्थः ६५ तुल्यप्राधान्यव्यंग्यं लक्षयति तुल्ये
ति यथेंदुत्वं व्यंग्यं वाच्येन समं तथाऽन्यदपि चेत्तत्तथा वाच्योपेयो व्यंग्ये
नार्थेन यत्र चमत्कारित्वात्तुल्यप्रधानः तत्तुल्यप्राधान्यव्यंग्यकमि
त्यर्थः उदाहरति कांत इत्यादि अत्रोदाहरणे इंदुत्वं व्यंग्यं चंद्रमसा

तुल्यप्राधान्यमिंदुत्वमिव वाच्येन साम्यभृत् कांते
त्वदाननस्त्वचाम्लानिमेति सरोरुह ६६॥ ७॥०॥

प्रियं कांजपराभवदर्शनात् तत्पंकजपराभवरूपवाच्येन तुल्यं तथा
च विपरीतमपि संभवतीति तुल्यप्राधान्यमित्यर्थः ६६ असंदरव्यंग्य
माह असंदेति यत्र वाच्यात् व्यंग्यं अचमत्कारकारित्तदसंदर रा

चं॰
१२३

मानत्वंत्त देवस्यस्पष्टयति स्तनयोरिति अत्र कुंकुमाक्तामितिकाव्ये ।

स्तनयोर्मिथ्यः सादृश्यंपकोकसादृश्यवदत्रकाव्येमतमिष्टमित्यर्थः कुं

कुमाक्तत्वेनस्तनयोः कोकसादृश्यरूपंव्यंग्यंअस्फुटमित्यर्थः यथावास

मचंद्रवदनेनचंद्रमानिर्जितः किमुपासरोरुहांरामपादकमलेनविद्रु

मः पल्लवस्यतुलनाधिकीदृशी अत्रक्षीरसमुद्रोत्पन्नजेठस्तडागोत्पन्न

जपकिपान्परिभ्रमइतिचंद्रपदेनक्षीरसागरजत्वंव्यंग्यमस्फुटं एवंवि

द्रुमपदेनमहाद्रुमजत्वं ६४ संदिग्धप्राधान्यव्यंग्यमाह संदिग्धमिति

संदिग्धंयदिसंदेहोदैर्घ्याद्युत्पलयोरिव संप्राप्तेन

यनेतस्याः श्रावणोत्तंसमस्मिकां ६५ ॥ ७॥ ७॥

दैर्घ्यादिचोत्पलंचेतिद्वंद्वः उत्पलपदेनोत्पलसादृश्यंपत्तेनपत्रवाच्यव्यं

ग्ययोस्तयोरिवप्राधान्यंयदिसंदेहस्तदातत्संदिग्धप्राधान्यव्यंग्यकं ।

उदाहरतिसमिति अत्रतस्यानेत्रेतत्पर्यंनगतेइतिवाच्यंकर्णसीतं राम
१२३

वक्त्रतनीलोत्पलसदृशो इतिव्यंग्यं तयोः किंप्रधानमितिसंदेहः तथा
चश्रवणेत्तंसभूमिकांगते इत्यनेन दैच्योत्पलसादृश्ययोः कस्य प्राधा
न्यमितिसंदेहवत्संदेहइत्यर्थः ६५ तुल्यप्राधान्यव्यंग्यंलक्षयति तुल्ये
ति यथेंडत्वंव्यंग्यंवाच्येनसमंतथाऽन्यदपिचेत्ततथावाच्योर्यो व्यंग्ये
नार्प्यनयत्रचमत्कारित्वात्तुल्यप्रधानः तत्तुल्यप्राधान्यव्यंग्यकमि
त्यर्थः उदाहरति कांतइत्यादि अत्रोदाहरणे इंडत्वंव्यंग्यंचंद्रमसा

तुल्यप्राधान्यमिंडत्वमिववाच्येनसाम्यभाक् कांते
त्वदाननरुचाम्लानिमेतिसरोरुह ६६॥ ७॥०॥

पियंकजपराभवदर्शनात् तत्पंकजपराभवरूपवाच्येनतुल्यंतथा
चविपरीतमपिसंभवतीतितुल्यप्राधान्यमित्यर्थः ६६ असंदर्व्यंग्य
माह असंदेति यत्रवाच्यात् व्यंग्यं अचमत्कारकारित्तदसंदर

व्यंग्यमित्यर्थः उदाहरणमाह सरस्यामीति आमीलंतीईषन्मुसं
कुर्वंति अंभोजानियस्मिन्निति विग्रहः तादृशोसरसिकोकः कां
तांपश्यतीत्यर्थः सरस्यांअंभोजे मीलतीति व्याख्याने तु उक्ता विशे
षणवैय्यर्थ्यापत्तेः अन्नभावि विरहो व्यंग्यः तदपेक्षया वाच्य नि
रीक्षणमेव चमत्कारीतिभावः ६७ काक्वादिष्वव्यंग्यं प्रदर्शयप
ति काकुस्थमिति अद्यमाद्यन्नुरावण इति काक्का मदोगतम्रा

असंदरं यदि व्यंग्यंस्याद्वाच्यादमनोहरं सरस्यामील।
दंभोजे चक्रः कांतांविलोकते ६७ काकुस्थं प्रणतोंभोधि
रद्यमाद्यन्नुरावणः इत्यत्र धात्र्वलीमत्तं व्यंग्यमंगीकृतंबुधैः ६८

प इति व्यज्यते अद्यमदोगमिष्यतीति व्यंग्यं काक्वेवादिष्टमितिवा
काकुवशाद्रामेसमागतेतस्य मदस्यनावसर इति व्यंग्यं काकु।
तस्थं काकुनिष्ठं यंपदं स्वीकृत्य निःशंकोलंकायांरावणस्तिष्ठ

तिसत्त्रंभोध्धि! प्रणतः रावणोऽघमा घत्विति वाच्योऽर्थः कस्यचिदुक्तिः अघतस्यमदोनुचित इति व्यंग्यकाकुनिष्ठं माघत्विति निंदार्थकाक्व प्रकाटत्तमिति कश्चित् मा घत्तीति युक्तः पाठः अंभोध्धौ प्रणतेपिमा घत्तीति काकुरित्यपि कश्चित् ममतु प्रतिभाति काक्वादिप्रव्यंग्य मुदाहरणमुस्वेनैव दर्शयति काकुस्यमितिपाठः श्रीराममंभो ध्धिः प्रणत इत्यर्थः अन्यत्प्राग्वदिति मध्यमकाव्यभेदानुपसंह रति इत्यष्टेति अत्रापिवस्त्वलंकारव्यंग्यसंकरसंसृष्ट्यादिभिर त्तमकाव्यवद्भेदास्तेयाः तदुक्तं सगुणी भूतव्यंग्यैःसालंकारैःस हप्रभेदैः स्वैः संकरसंसृष्टिभ्यां पुनरप्युद्योततेवहुधेति अत्र पदावस्तुमात्रेणालंकारोव्यंग्यस्तदावस्तुपेतयाऽलंकारस्यच मत्काराधायकत्वावश्यंभावात्तगुणीभूतव्यंग्यत्ताकिंतुध्व नित्वमेवेत्यवधेयं १ मतांतरेत्वेषांत्रिधैवांतर्भाव इति भाव ६८ महादेव इतीति पूर्ववत् महत्तिवस्तुसंरब्धः इत्यत्वयत्विति।

चं॰
१२५

विशेषः अष्टसंख्य इत्यर्थः ९९ इतिअष्टमोविलासः ८ अथशाब्द
वृत्तिव्यंजनानिरूपणप्रसंगेनस्मृतध्वनिगुणीभूतव्यंग्यभेदा
न्निरूप्यप्रसक्तोविचारस्तत्समाप्तौसएवबुद्धिस्थोभवतीतिस्मृतशाब्द
वृत्तिप्रसंगेनलक्षणांनिरूपयतिमुख्यार्थेति मुख्यार्थस्याविवक्षायांल

महादेवःसत्र॰महत्तिवसुसंख्यःस्तबयत ९९ इतिजय
देवविरचितेचंद्रालोकेऽष्टमोमयूखः ८ ॥ श्री ॥०॥
मुख्यार्थस्याविवक्षायांपूर्वाडवीचीचरुठितः प्रयो
जनाच्चसंबद्धंवदंतीलक्षणामता ७० ॥ ९ ॥ ९ ॥

क्षणाबीजत्वंवदतामुख्यार्थबाधस्यलक्षणाबीजत्वंनिरस्तंअर्थांतर
संक्रमितवाच्येऽन्वयानुपपत्तिरूपमुख्यार्थबाधाभावेपितस्यअवि
वक्षारूपतात्पर्यानुपपत्तिसंभवात् एवंचवेदेनन्यायानुगृहीतेष्मर
तात्पर्यानुपपत्तिर्लक्षणाबीजं अगत्यातस्याएवकल्पनात् अतएव

राम
१२५

नशाब्दबोधमात्रेतात्पर्यज्ञानस्यहेतुत्वनाकिंतुलाक्षणिकशाब्दबोधए
वेतिदिक् संबन्धंवदंतीतिलक्षणास्वरूपः उक्तहेतोः शाक्यार्थसंबन्धप्र
तिपादिकाशब्दवृत्तिर्लक्षणेत्यर्थः साद्विविधा. पूर्वाऽर्वाचीच. तयोः
पूर्वानिरूढलक्षणाप्रयोजनप्रतीत्यनुद्देश्यिका. अर्वाचीप्रयोजनव
तीतात्पर्यविषयप्रयोजनप्रतीत्युद्देश्यिकेत्यर्थ यथाजातिवाचिनोघ
टादिपदस्यव्यक्तौनिरूढलक्षणा. कलिंगः साहसिकोभवतीत्यादौ

लक्षणीयस्यशब्दस्यमीलनामीनात्तद्विधा लक्षणा
सान्निधासिद्धसाध्यसाध्यागभेदतः ७१॥०॥

देशवाचिनः पुरुषेः उभयत्रप्रयोजनाभावात् गंगायांघोष इत्यादौ
शैत्यपावनत्वादिप्रतीतिप्रयोजनिका. अत्रघटादिपदात्स्वाश्रयाका
शोपस्थित्तेस्तत्रलक्षणावारणायरूढिजः प्रयोजनाद्वेत्युक्तं. ७० द्विधा
सापिपुनस्त्रिधेत्याहपद्येनलक्षेति लक्षणीयंस्वमर्थः तद्वाचकशाब्दस्य जर

मीलनमसमभिव्याहारेऽनंसमभिव्याऽमीलनंसमभिव्याहारः ततोद्वि
धापिलक्षणाद्विधामीलेतिसमाहारद्वंद्वः सात्रिधाद्विधापिसापुनः त्रि
धेत्यर्थः सिद्ध उद्देश्यपरसाध्यं विधेयंसाध्यांगं विधेयान्वयिताद्वाचक
पनिष्ठत्वेनेत्यर्थः अयंभावः पूर्वोक्ताद्विविधापिलक्षणालक्ष्यार्थवा
चकपदसमभिव्याहृतपदनिष्ठत्वेनतदसमभिव्याहृतपदनिष्ठत्वेन
चद्विधा॰ अग्निर्माणवः कण्ठेक्तौ घट इत्यादावाद्या॰ मंचाःक्रोशंतिकर्ण
गोकुशल इत्यादौद्वितीयाएवंद्विविधापि उद्देश्यवाचकपदनिष्ठाविधे
यवाचकपदनिष्ठाविधेयान्वयिवाचकपदनिष्ठाचेतित्रिधा॰ यथा भो
वृषभनवुध्यसे इत्यादौवृषभपदस्योद्देश्यवाचिनोऽम्तसर्वेकामिनीव
चोऽम्तमिति विधेयवाचिनोऽम्तपदस्यानंदजनके गंगायां घोष
इत्यादावुद्देश्यपविधेयावाचिविधेयाघोषान्वयिवाचिनिगंगायंदे
इति ७१ निरूढलक्षणायाअव्यंग्यिकातथा अर्वाचीभेदान्व्यंग्यभे
देनाहस्फुटेत्यादिस्फुटमगूढंअस्फुटंगूढं तेनगूढव्यंग्याअगूढव्यं

ग्याचेति द्वौ भेदौ॰ गूढत्वं च वाच्यभावनापरिपक्वबुद्धिविभवमात्र
वेद्यत्वं॰ अगूढत्वं सर्वजनवेद्यत्वं स्फुटमपि तटस्थत्वापांगत्वभेन द्वि
धा॰ तटस्थत्वं च लक्ष्यलक्षकेतरवृत्तित्वेन प्रतीयमानत्वं इदं च समा
सोक्तावुपयुज्यते॰ तथाहि अयमैंद्रीमुखं पश्य रक्तश्चुंबति चंद्रमाइ
त्यादौ परनायिकासक्तनायकवृत्तांतप्रतीतिः प्रयोजनः तदर्थमेव
हि मुखं चुंबतीत्यादिलाक्षणिकशब्दप्रयोगः अगूढस्य शानीत्यादि

स्फुटास्फुटप्रभेदेन प्रयोजनमपि द्विधा विदुः स्फुटं त
टस्थत्वादपांगत्वात् द्विधा बुधाः ७२ अस्फुटं चापि निष्ठत्वा
त्तटस्थत्वादपि द्विधा लक्ष्यलक्षकनिष्ठत्वादपि संस्थमपि द्विधा ७३

प्रयोगे तदप्रतीतेः तत्र प्रयोजनस्य तद्वृत्तांतस्य लक्ष्यलक्षकेतरो
दासीननिष्ठतया प्रतीयमानत्वमस्तीति अर्पांगत्वादितिपाठः अगूढस्य
शातीत्यादिप्रयोगेर्पांगत्वादित्यपपाठः तत्त्वं वलक्ष्यलक्षकनिष्ठतयास्फु

जनात्रपांगतप्रयोजनाचेति ७२ गूढव्यंग्या
याभेदद्वयमाह अस्फुटं चेति॰ चार्थः स्यान

तीपमानत्वत्तेनागूढव्यंग्याद्विविधा तत्तटस्थप्रयो

विनिमयः अस्फुटमपि तटस्थत्वाद्धर्मनिष्ठत्वाच्च द्विधेत्यर्थः गूढत्वं
गम्यस्य तटस्थत्वं लक्ष्यलक्षकपदार्थवृत्तित्वाभ्यामेदाभ्यां गूढत्वं गम्या
या लक्षणा द्विधेति भावः उभयत्रापि त्वाद्ययोर्द्वैविध्यमाह लक्ष्येति ल
क्ष्यलक्षकपदार्थनिष्ठप्रयोजनकत्वादित्यर्थः अस्य च प्रयोजनं
रूपके इंदुर्मुखमित्यत्रेंदुपदेनेंदुतादात्म्यवन्मुखस्य लक्ष्यत्वेन
मुखनिष्ठोत्कर्षप्रतीतिः प्रयोजनं सा च लक्ष्यनिष्ठैव एवं मु

अस्फुटं चार्थनिष्ठत्वात्तटस्थत्वादपि द्विधा
लक्ष्यलक्षकनिष्ठत्वाद्धर्मस्यमपि द्विधा ८३॥

खमिंदुरित्यादौ मुखपदेन मुखतादात्म्यापन्न इंदुर्लक्ष्यते तत्र
लक्षकं मुखपदं तदर्थनिष्ठैवोत्कर्षप्रतीतिरिति बोध्यं ८३ ए
वं प्रयोजनस्य भेदा एव उक्ता न लक्षणा इति कश्चित् तन्मतेनेतद्दं
नीलक्षणायाश्चात्र्वैध्यमाह लक्षकस्यमिति यत्र स्फुटप्रयो गम

जनं लक्षते का अन्य द्वेदत्रयमाह अस्फुटत्वमिति अमुष्य प्रयोजन
स्य पत्तोऽस्फुटत्वं तटस्यत्व लक्ष्यत्वं चातोऽन्या लक्षणा स्तिस्र इत्यर्थः
तिङ् उपसंहरन्तीति स च हेतो प्रकारे वा॰ ननु प्रयोजनप्रतीतिः शक्तितए
व किं नेत्यत आह व्यक्तेति॰ शक्तितो वक्ताभिन्नासा लक्षणा च तद्र्थेत्य
र्थः शक्त्या प्रयोजनप्रतिपत्तिर्न संभवतीति तदर्थ सेव च तद्धर्मिगीका

लक्षकस्यं स्फुटं पत्रसा विचक्षणा लक्षणा अस्फुट
त्वं तटस्थत्वं लक्ष्यस्यत्वममुष्य च ७४ ॥ ६ ॥

र्थेति भावः क्वचित्तु अस्फुटं चार्पेत्त्वर्धपाठो न दृश्यते तत्र नं विहा.या
न्यत्सर्वमागवत्तद्वोध्यं॰ क्वचित्तु विदुरिति लक्ष्य लक्ष केति लक्षकस्य
मिति क्रमेण अत्र योतरं अस्फुटं चार्पेसज्ञीदंगे अत्यास्तिस्र इति
व्यक्ता व्यक्ति त इत्यादि पाठो दृश्यते॰ सोपि व्याख्या पत्तेतत्र स्फुटेत्या

देरवत्तरणपूर्वव्यारव्यानंकृतमेव विदुरितिप्रागवत्तत्तत्रैवात्यभेद
माहलक्षेति। अपिप्रागवत् अत्रयात्अत्याउक्तादृपमव विवक्षणलक्ष
णोत्पुच्यते इत्याह लक्षकस्यमितिमुरवनिष्ठोत्कर्षप्रतीतयेमुरवपद
मिंदोलादक्षणिकविचक्षणैः प्रयुज्यत इतिभावः गूढव्यंगयाया भेद
द्वयमाह· अस्फुटंचार्थनिष्ठत्वात्तटस्पत्वादपिद्विधा· अत्यास्तिरस्त्र
इतिव्यक्ताव्यक्तितः साचलविधेतिगूढव्यंग्यस्पतटस्पत्वलक्ष्सलक्ष
कपादार्थवत्तित्वाभ्याभेदाभ्यांगूढ व्यंगयालक्षणाद्विधेत्यर्थः ७४

अत्यास्तिरस्त्रइतिव्यक्ताव्यक्तितः साचालविधा इंदु
रेवैषत चक्रमुत्कर्षोलक्ष्यतेमुरवे ७५ ॥ ६० ॥

प्रयोजनवत्यालक्षणायाभेदानुपसंहरति· अत्यास्तिरस्त्र इतिअत्यता
स्तिरस्त्र इति उद्देश्यपवाचिपदनिष्ठत्वादिभेदत्रयविशिष्टप्रयोजन^
वत्यालक्षणया अनुवादभेदत्रयविशिष्टप्रयोजनवत्तोलक्षणा इति
अनेनप्रकारेणाव्यक्तितो व्यंजमात्तः व्यक्ताभिन्नाचत्तुर्विधेत्यत्तरार्थः

गूढव्यंग्याया भेदद्वयं अगूढव्यंग्याया भेदद्वयं चेत्याशयः कश्चित्तु विदुःल
क्ष्यलक्षकालक्षकस्यमित्य द्वैत्र पादद्वये अर्पीगतत्वस्यात्वभेदाभ्यामस्फुटस्य
च अंत्याद्विधेति विज्ञेया व्यक्तितः साचतुर्विधेति पाठो दृश्यते· सोपितथाः
तत्राद्यत्रयं तृतीयमनवत्तु गूढव्यंग्याया अस्फुटप्रयोजनद्वैविध्याद्भेदमा
ए अर्पीगेति चोपपर्षे अस्फुटस्यापि प्रयोजनस्याभ्यांभेदाभ्यामत्यागूढ
व्यंग्याद्विधेत्यर्थः उपसंहरन्ति इतीति उक्तप्रकारेणासालक्षणाव्यक्तितो
व्यंजनात चतुर्विधेत्यर्थः व्यंग्यचातुर्विध्यादितिभावः कश्चित्तु आद्य
पद्वे उभयनिष्ठमपि तत्स्फुटमस्फुटं तटस्थं चेति त्रिधेत्याह सार्धेनल
क्षकस्यमिति लक्षकस्यमिति लक्षकपदवाच्यनिष्ठमित्यर्थः लक्षणा
भेदानुपसंहरन्ति इतीति प्राक्तितो व्यक्ताभिन्नेत्यर्थः चतुर्विधेति रूढल
क्षणास्फुटप्रयोजनवती अस्फुटप्रयोजनवती तटस्थप्रयोजनवतीति
चातुर्विध्यमित्यर्थ इति व्याचख्या आसां क्रमेणोदाहरणान्याह इंदुरे
वै इत्यादि अत्राद्यमतद्वये लक्षकस्य त्वतटस्थत्वास्फुटत्वलक्ष्यस्यलक्षे

चं॰
१२९ मोबोध्यः कश्चिन्मते उभयनिष्ठप्रयोजनवत्त्वलक्षकनिष्ठतटस्थप्र
योजनवत्त्वात्स्फुटप्रयोजनवत्त्वात्स्फुटप्रयोजनवत्त्वलक्षनिष्ठ
स्फुटप्रयोजनवत्त्वक्रमः तदन्यमतयोस्तु व्यत्ते इदं च लक्ष्यलक्षक
निष्ठस्फुटव्यंग्यायाउदाहरणं पदाचंद्रपदं मुखेलाक्षणिकं तदाल
क्ष्यमुखनिष्ठं प्रयोजनं कांतिमत्वं पदान्तमुखपदंचलाक्षणिकं तदा
लक्षकमुखपदार्थनिष्ठं तत्स्फुटमेवलक्ष्ये चंद्रे प्रागेवतत्प्रतीतिर्वे
ध्यर्थ्यात्तथा चात्रैकोद्वि ऽकौ चपइतिभावः ७५ तटस्थप्रयोजनवत्त्या

प्रदीपं वर्द्धयेत्यत्र तटस्थं मंगलोदयः पटो यं द
ग्ध इत्यादौ स्फुटं नास्ति प्रयोजनं ७६॥ ॥ ॥

उदाहरणमाह प्रदीपमिति इदं च व ध्यर्थकवधु धातेर्व्यतिरेकसं
बंधेन नाशो लक्षणया प्रयोगे वोध्यं नाशार्थकधात्तुमयोगे त्वमंगल
निवृत्त्यभवत्तः तथा चामंगलपरिहाररूपप्रयोजनस्यात्र वक्तृस्थो

त्वनिष्टत्वात्तदस्यत्वं॰ इदंचसप्रकारणादिवक्त्रादिसहकारेणस्फुटास्फु
टव्यंग्यायादिविधाया अप्युदाहरणं लक्षकनिष्ठास्फुटप्रयोजनवत्याउदा
हरणमाह पटोपमिति अत्रकमीनहत्वप्रतीतिः प्रयोजनं तेनदग्धस्यै
कदेशालक्षकपटपदार्थविशिष्टपटे प्रतीपत्ते इतिलक्षकस्यप्रयोजनं॰
आदिसंग्राह्ये दग्धः पट इत्यत्रतु दग्धपदेनदग्धैकदेशापटलक्षणेपि
पटनिष्ठमेवतत् तच्चास्फुटं ७८ लक्ष्यस्यस्फुटप्रयोजनवत्याउदाह

अमृतं सूक्तमित्यादौ लक्ष्यस्यमतितृपत्ता आभि
मुख्यात्संनिधानात्तप्याकारप्रतीतितः ७७ ॥१०॥

रणमाह अमृतमिति अमृतपदेन रसवल्लत्याते अतितृपत्ताप्र
तीतिः चप्रयोजनकाव्यनिष्ठमेवलक्षणा बीजसंबंधानाह आभि
मुख्यादित्यादि अंगुल्यग्रेकरिणंशतमिति अत्र अंगुल्यग्रशब्द

चं
१३ स्यत्वत्तद्देशेनाभिमुख्यसंबंधः गंगायां घोष इत्यादौ वह्न्याग्रे चंद्र
इत्यादौ च संनिधिः एकत्र वास्तवोऽपरत्र भ्रांतिविषयः अत एव वो
जदित्यादौ तत्त्वेऽस्य लाक्षणिकत्वमन्यथा भ्रांतौ व प्रयोग इति भावः
अत्र हेतुमाह तथाकारेति वह्न्याग्रसन्निहितोपमितिसंनिधाका
र प्रतीतित इत्यर्थः ७७ कार्येति घृतमायुरित्यत्र घृतपदलक्ष्ये आ
युषि कार्यत्वं आयुर्घृतमित्यत्रायुःपदलक्ष्ये घृते कारणत्वं अ

कार्यकारणभावाच्च वाच्यवाचकभावतः इत्ये
वमादेः संबंधात्किं चान्यस्माच्च तत्स्यात् ७८

मरपदोच्चारणेऽन्येन कृतेऽन्यप्रयुक्ते द्विरेफमुच्चार प्रतीतिवाक्ये द्विरेफ
पदस्य योगवृत्त्या लक्ष्ये भ्रमरपदे वाच्यत्वसंबंधः घटमुच्चारयतीति अ
त्र वाचकता संबंधेन घटपदे लक्षणा इत्येवमादेरित्यादिपदेन क्वचित्ता
दर्थ्यमिंद्रार्था स्थूणा इंद्रः स्वस्वामिभावः राज्ञः पुरुषो राजा अग्रहस्त इ राम
१३

त्यन्नाग्रावयविहस्तशब्दोऽवयवसंबंधात् इति । आदिसंगृहीतमेवान्यसं
बंधवत्त्वप्रदर्शनेन विशदयति किंचेति संबंधादित्यस्यानुषंगः ७८ ॥ ०॥
साहश्यादिति गोवीहीक इत्यत्र साहश्यं अत्र गोशब्दार्थगोत्वसहचारिणो
धर्मा जाममांद्यादयो लक्ष्यमाणा अपि गोशब्दस्य परार्थाभिधाने प्रवृत्ति
निमित्तं भवति यद्वास्वार्थसहचारिणाभेदेन परार्थगतागुणाएव लक्ष्यं
ते नतु परार्थोऽभिधीयते यद्वा साधारणगुणाश्रयणेन परार्थ एव लक्ष्य

साहश्यात्समवायात्स्या वैपरीत्यात् क्रियान्वयात् साहो
पाध्यवसानाख्योगौणःषड्भेदऽष्टष्यक ७९ ॥ ७ ॥०

ते द्वित्रिणोगच्छंतीत्यत्र संवायः सच समुदायांतः पातित्वं द्वंद्वं चासंनिधा
नेवोध्यं तेन संनिधानाद्भेदः अकुशले कुशलपदप्रयोगे वैपरीत्यसं
बंधः यथा अनतत्त्वाणि तद्वायुधिष्ठिरो यंराजेत्यादौ तत्कार्यकारित्वं प्र

चं॰ १३१ कारांतरेण प्रयोजनवत्याभेदद्वयमाह सारोपेति मतांतरेण तदाहेतिक
श्चित् लक्षणं द्विधा सारोपा साध्यवसाना च तत्र आरोप्यमाणारोप
विषययोर्भेदेनोक्तौ सारोपा॰ यत्रारोपविषय आरोप्यमाणे स्वरूपेणै
वोक्तेन भिन्नरूपेण तत्र साध्यवसाना सा द्विधापि द्विधा गौणशुद्धभेदेन
सामान्येन पुंसकत्वेन निर्दिष्टा: तत्र सादृश्यसंबंधे गौण अन्यसंबंधे शु
द्धेत्यर्थः ७९ उदाहरणमाह क्रमेण गौणंसारोपमिति इंदुर्मुखमि

गौणं सारोपमुद्दिष्टमिंदुर्मुखमितीदृशं गौणंसा
ध्यावसानं स्यादिंदुरेवेदमीदृशं ८०॥ ६॥ ६॥

त्यत्र सादृश्यसंबंधादारोप्यारोपविषययोर्भेदोक्तौ गौणसारोपे
त्यर्थः इंदुरेवेदमित्यत्र आरोप्यस्वरूपेणैवारोपविषयस्योक्तेः सादृ
श्यसंबंधाच्च गौणसाध्यवसानेत्यर्थः ८० शुद्धं सारोपमिति आयु
र्घृतमित्यत्र कारणत्वसंबंधाद्भेदेनोपादानाच्च शुद्धसारोपेत्यर्थः आ राम १३१

पुरे वेद मित्यत्र कारणत्व संबंधादोप्य रूपेणैवारोप विषयस्योक्तो।
शुद्धसाध्यवसाने त्यर्थः एतेनाभेदानां रूपकादौ उपयोगः
इंदुपदस्य तादात्म्य संबंधेन मुखे लाक्षणिकत्वात् शुद्धसारोपा
दिसंभवात् एतेन सादृश्यपदस्य संबंधत्वे रूपकत्वाबाध इत्यादि।
परास्तं सादृश्यपदस्य तादात्म्याघटकत्वात् तादात्म्यस्याहार्यत्वाच्च ८१

शुद्धसारोपमुद्दिश्य मायुर्घृतमितीदृशं शुद्धसाध्यवसानं
स्यादायुरेवेदमीदृशं ८२ उपादानार्पणद्वारे वेचान्येद
तिषड्विधा कुन्ताविशंतिगंगायां घोषो निवसतीति च ८२

शुद्धसारोपशुद्धसाध्यवसानयोर्भेदद्वयमाह उपादेति स्वार्थस्यो
पादानेनात्यागेन स्वार्थस्यार्पणेन तदविवक्षयेत्यर्थः तेनोपादानल
क्षणा अर्पणलक्षणा चेति द्वौ भेदौ इदमेव गीयते जहत्स्वार्थाजह

स्वार्थ इति भेद द्वयं शाक्यादिस्य क्रियाद्यन्वये: जहत्स्वार्था शाक्या
दिस्य क्रियाद्यन्वयाभावे जहत्स्वार्थेति तात्पर्यं उपसंहरति इति
ति क्रमेणानयोरुदाहरणे आह कुंताविशंतीति कुंता विशंतीत्य
त्र कुंतानां प्रवेशान्वय सिध्यर्थं तद्वंतः पुरुषा लक्ष्यंते· गंगायां घो
ष इत्यत्र तु गंगा पदार्थ प्रवाहस्य न क्रियान्वयं: किंतु नीरलक्षणं
यं तदुपस्थिति मात्रमित्यर्थः केचित्तु जहदजहत्स्वार्थ रूपं तृतीयं
तात्पर्यासह भेदमाहु: इयमेव भागत्याग लक्षणा ८२ भेदे द्वय

लक्ष्यलक्षक वैशिष्ट्या वैशिष्ट्यात्तद्द्विविधा पुनः
सरसंकाव्यमम्लंतं विद्यास्यपरतरध्वनं ८३ ॥

मन्यदाहलक्ष्येति लक्ष्यलक्षकयोर्यद्वैशिष्ट्यं विशेषणावत्वं तद
पे वैशिष्ट्याद्विशेषाद्दित्यर्थः विशिष्टलक्ष्यलक्षकयोर्वैशिष्ट्यंसंता
भ्यांसहसंबंधस्तस्मादितिवापाठस्तु व्यस्तः समस्तोवाक्रमेणोदा

हरति सरसमिति अत्र तत्कार्यकारित्वसंबंधेन मत्तपदेन विशिष्टका
र्येऽस्त्वजनकत्वं लक्ष्यते. स्मरत्तरंधनमिति पदद्वयेन च विशि
ष्टधनकार्यकारित्वसंबंधेनस्वत्वजनकत्वं विधायाः तत्र विशि
ष्टलक्ष्यं अत्र विशिष्टलक्षकमिति भेदः तथाच आद्ये विशिष्टका
र्योद्देशेनामत्तत्वं विधेयं द्वितीये विधेद्देशेन विशिष्टधनत्वं विधेयं
तथाच विशेषणविशिष्टोद्देश्यवाचकपदनिष्ठात्तादृशविधेयवाच
कपदनिष्ठा चेति द्वौ भेदौ पूर्वत्र तु ओद्देश्यविधेयवाचकपदनिष्ठावु
क्तौ वृत्तिनयेन तत्र वैशिष्ट्या वैशिष्ट्यादिति पाठो युक्तः क्वचिदन्यत्
रत्र क्वचिदुभयत्र विशेषणवत्त्वमित्येकः पक्षः उभयत्राविशेषण
त्वमित्यपरः तेन व्युत्क्रमेण तत्राद्योदाहरणद्वयदानेप्यविशेषण
त्वे विधाधनमित्याद्युदाहरणं बोध्यं केचित्तु गंभीरायां नद्यां घोष
इत्यादौ नदीयमेव विशिष्टनदीतीरे लाक्षणिकं गंभीरपदं तात्पर्य
ग्राहकं यथा तथात्रापीत्याहुः ८३ सहेतुनिर्हेतुभेदेन भेदद्वयमन्य

दाप्याहतत्येति उक्तावदित्यर्थः अतत्पाऽहेतुरिति भेदभिन्ना
पि क्वचिदित्यर्थः अनयोः क्रमेणोदाहरणे आह सौंदर्येणेवेति त
त्रचायंहेतुः साचेति द्वितीयोदाहरणं सौंदर्येणेत्यस्यानन्वयात्
तत्रापितदन्वयेन तदुदाहरणं गंगायामित्यादिस्फुटमेव बोध्यम्
८४ उपाध्यंतरेण पुनर्भेदांतमाह शाब्द इति शाब्दपदवाक्यान्यतर
रूपे तत्रपदे अग्नेरग्निरेष इत्यत्र अग्निशब्देनाचिर्लक्ष्यते दार्पित्व

तप्यासहेतुरतप्याभेदभिन्ना च कुत्रचित् सौंदर्येणैषकं
दर्पः साच मूर्तिमतीरतिः ८४ शाब्दपदार्थे वाक्यार्थे संख्या
यांकारके तप्या लिंगे चेपमलंकारांकुरबीजतयास्थिता ८५

एवंचं इत्यत्र मुखपदार्थेन तादात्म्यं लक्ष्यते पङ्कवचनमाकर्ण्यंतितदम
त्तं पिबंतीति वाक्यार्थे अत्र वाक्यार्थयोरैक्यारोपात् वाक्ये नीलांबुजन्म
नो लीलां धत्त इति वाक्येन शोभाविशेषो लक्ष्यते पाबंतो युद्धप्रियास्ताव
तोऽर्जुना इत्यत्र बहुत्वसंख्यया पूज्यत्वस्यालीपचत्तीत्यधिकरणका

रके हस्तिन्यां हस्तीति लिंगेन तल्लक्षणनिरूपणमफलमतआह अलमिति अलंकारपदस्योपलक्षणत्वेन रसादेर्बीजत्वेन अलंकारादेरंकुरत्वेनचव स्पिताअंगीकृत्येत्यर्थः रूपकाद्यलंकारनिर्वाहकतयातदंकुरत्वं ८५॥ महादेव इति भागवत् महतिनवसंख्य इति विशेषः ८६॥ इतिचंद्रालोकव्याख्याने रमाख्ये नवमोविलासः ९॥०॥ लक्षणानिरूप्यतऊर्ध्वंशक्तिमुत्त

महादेवःसत्रं महतिनवसंख्यःसुखयतु ८६ इतिजयदेवभणिते चंद्रालोकेनवमोमयूखः ९॥०॥ धर्मंकंचित्पुरस्कृत्यप्रायःशब्दःप्रवर्त्तते पपार्थस्पष्टमाचक्षेप्राक्तनामभिधांविदुः ८७

साऊर्ध्वंनिरूपयितुंवस्तुस्थितिंतदुपोद्घातत्वेनाह धर्ममिति समानेष्वनुगतोव्यावर्त्तकश्चधर्मइत्युच्यते तत्रैवतदवच्छिन्नेवाशक्तिर्नकेवलंव्यक्तावित्यर्थः अयंभावः तत्पक्षेसर्वव्यक्तिष्वतएकत्र नाद्यः आनंत्यात्

नां तो व्यभिचारापत्तेः गोत्वत्वादीनां व्यक्तौ केवलायाभेदान्तरप्रयोगानाऽ
पत्तेश्च । प्राप इत्ति लुधर्मस्य नानात्वेनैकस्यान्यत्राभावेन ऽप्राकाशादावनं
तशक्तिकल्पनाद्यभावेन व्यक्तिमात्रशक्तावदोषेणैवाएवमन्यत्त्वोध्य
मितियथावत्याशब्दः स्पष्टं स्तासादपिमानचष्टेसाऽभिधासादमत्वंचा
र्थान्तरप्रतीत्यद्वारकत्वंतथाच ऽअव्यवधानेनशाब्दजन्यार्थप्रतीत्य
नुकूलावृत्तिरभिधेतिलक्षणं । लक्षणादिवारणाय । ऽअव्यवधनेत्ते
तितादृशाचेष्टादिवारणाय विशिष्टं साचास्मात्पदादयमर्थोवोद्ध
व्य इत्याकाईश्वरेछेतिन्यायविदः पदार्थान्तरमिति मीमांसकादयः
ऽअस्याएवसंकेतइतिव्यवहारः साक्षात्शब्दजन्यार्थप्रतीतिसहका
रिज्ञानविषयत्वंवा । ननुशक्तिज्ञानस्यसहकारित्वे किंवीजमितिचेदे
दगरहीतशक्तिकशब्दादर्थप्रत्ययाभावएवेतिगृहाण ८७ सचधर्मः
षड्विधः तेनषोढाऽभिधासाक्षात्शब्दवृत्तिरित्याह जातेत्यादिनाष
ड्विधः शब्दोजातिशब्दोगुणशब्दः क्रियाशब्दोयदृछाशब्दोवस्तुयोग

शब्दो निर्देश शब्द इति सर्वेषु द्रव्यवाचक घटादिपदेषु जातिरेव वाच्यताव
छेदिका वा शुक्लादिपदेषु गुणगुणान्यतरवाचिपदसमानाधिकरणेषु
पि गुण एव वाच्यो न तन्निवृत्ती लत्वादिजातिस्तदभावात् नापि गुणी गोरवा
न् लक्षणयासामानाधिकरण्योपपत्तेरवाच्यतावच्छेदको वा गुणः
एवं पाचकादिपदे पाकादिक्रियैव वाच्या तत्तस्त एव प्रतीतेरेकत्वाच्च
वाच्यतावच्छेदकत्वं वा एवं दंडीत्यादौ दंडसंबंधो वाच्यो वाच्यतावच्छेद

जात्या गुणेन क्रियया वस्तुयोगेन संज्ञया निर्देशो
न च मन्यंते षड्विधामभिधां बुधाः ८८॥०॥

कोवा पाचकादिपदे पाकस्य विशेषणत्वेन दिहदंडसंबंधे स्य वि
शेषणत्वेन भानाद्भेदः डित्थादिपदं शब्दे षु शब्द एव वाच्यो वाच्य
तावच्छेदको वा एवं कंसपन्निहितत्वं मुंडादिपदेषु निर्देश एव वाच्यः
शाक्यतावच्छेदको वा निर्देश स्यवाचकवर्णानां स्वपदत्वं यथा कंसमि

चं. १३५

त्यत्र कंकारसंकारावेव कंसपदे प्रतीयेते पाठांतरे कंसमाश्रितमित्यत्रे
तिबोध्यं तत्र नरकपदांतर्गतसानुस्वारककारद्वारा नरकप्रतीतिः
इदं पाठद्वयसाधारणं कंसपदांतर्गतसानुस्वारककारद्वाराकं
सप्रतीतिः यद्वा समाश्रितपदांतर्गतसानुस्वारसकारद्वारास
माश्रितप्रतीतिः तथाच स्वोपस्थाप्यसानुस्वारककारसकारव
त्पदवत्वसंबंधेन कंकारसंकारवत्तैव वाच्यावाच्यतावच्छेदिका
वा एवं चामुंडादिपदे पिंडं च मुंडानयनवत्वादिसंबंधेन वर्णत्रयव
त्वमेव शक्यं तथा वा एवं परिक्षिदादिपदे परिक्षीणे कुले जातत्वा
दिसंबंधेन तद्वर्णवत्त्वं बोध्यं एतेषु च जातिगुणक्रियासंबंधा॥
नाम सिद्धेर्न जात्यादिशब्दत्वं नापि यदृच्छाशब्दत्वं संबंधप्रदर्शिना
पि योगिकत्वं रूढ्यतन्मूलसंभिन्नेति योगत्रयासंभवात् नापि
लक्षणा· संबंधाग्रहात् द्विरेफपदस्य भ्रमरपदादौ रेफद्वयसं
बंधज्ञानसत्वाद्युक्ता लक्षणा नापि लक्षितलक्षणा लक्षणायाऽप्र

राम १३५

भावात् अतस्ते वर्णा एव शाक्यतावच्छेदकाः शाक्यावेत्तिवोध्यं यत्र जा
त्यादयः संबंधेनाव्यवहितास्तत्र एव प्रवृत्तिनिमित्तानि वाच्या वा
यत्र तु तेन व्यवहितास्तत्र वस्तुयोग एव तथा वस्तुनो दंडादेर्योगः सं
बंध इति तदर्थः यथा दंडी गोत्ववानित्यादौ॰ अत एव द्रव्ययोग इत्यु
पेक्ष्य वस्तुयोग इत्युक्तं वस्तुशब्देव तु नोक्तं संबंधव्यवहितस्य तस्या
प्राधान्येन प्रधानसंबंधस्यैव तत्त्वात् जात्यादेरपि वस्तुत्वेनैका
विध्यप्रसंगाच्च॰ यद्यपि डित्थादावप्यसाधारणधर्म एव प्रवृत्तिनि
मित्तं संभवति तथापि यदृच्छापरिकल्पितत्वेन जात्यादितो वैलक्षण्य
जातिव्यक्तिपक्षयोरुपपत्तिस्त्वन्यत्र स्फुटेति नेह तन्यते ८८ क्रमेणो
न्या दाहरणमाह गौरित्यादि सर्वे एकवचनान्ताः ननु कंसत्वस्य दे
वदत्तत्ववज्जात्यादिरूपतया कथं निर्देशस्य प्रवृत्तिनिमित्तत्व
मित्याशंकोपपादनेन निर्देशमेव प्रदर्शयति कंसमिति न रकं
चेति पाठः कंसारिः कंसं हिनस्तीति प्रश्नः तत्रोत्तरं कंकारं समा

श्रितं तन्नरं नरकं सं आश्रितं कंकं संचेत्यर्थः यद्वा कंसारिः कंसंपदा
द्वयमेकं वा हि नास्ति कंकारसंकारयोर्व्युत्पत्तिमाहनरमिति प्राग्वत् क
पं हि नस्तीति क्वचित्पाठः तत्र नरकं चेत्याद्येव कर्मकं सनरकौ विहन्त
ना कपं हन्तावित्ति प्रश्नमात्रं कस्य चित्तनरकमिति पाठेपि योजना
प्रागुक्ता अयं भावः यत्र शब्दः स्वपरस्तत्र निर्दिष्टः कंसवित्यत्र
समाश्रितं कमित्यत्र वा आहत्य सकारककारशब्दो प्रतीयतेन च

गोः श्लक्ष्णः पाचको दंडी डिम्भः कंस इति क्रमात् कपं
हि नास्ति कंसारिर्नरं कं च समाश्रितं ८९ ॥ ० ॥

वृत्तिं विना प्रतीतिः संभवतीतिः संभवतीति तत्र शक्तिरेव वक्तव्यं
तदसंभवात् एवं च शब्दस्य स्वपरत्वे जात्यादिभिन्नविषयावस्य
भिधेवे तिषड्विधत्वं एवं चैवं विधैः प्रयोगैः प्रतीयमानः कंसादिः श
ब्दो यत्र तत्र निर्दिष्टास्तथा निर्दिष्टपद इति व्युत्पत्त्या निर्देशपदेन शब्दग्र
हणात् यत्र तु कंसो हत इत्यादावर्थपरता तत्र जात्यादिपरत्वेनैवं प्र

व्याख्याते निर्देशशब्दे प्रोक्तमेवोपपादयन्नुपसंहरति न योगादेरिति आ
दिनाजात्यादिपरिग्रहः विशेषेणतत्रांतर्भावसंभावनया उपयोगादन
संकेते निसंकेतो यद्वाशब्दत्वं हेतस्तु सर्वत्रोक्त एव तत्पाचनापंयौ
गिकोनापिरूढः नापि डित्थादिवत्संकेतितः तस्मान्मुख्यया वृत्त्याश
क्त्या अयं पूर्वोक्तो निर्देशशब्दः परिकीर्तित इत्यर्थः स्ववर्णद्वयमेवा
भिधेयं यस्यामितिवद्बहुव्रीहेर्वृत्ति विशेषणं स्वाभिधायये ति पाठेतु।

न योगादेरायत्तनं न संकेतनिकेतनं वृत्त्या निर्देश
शब्दोऽयं मुख्ययास्वाभिधायया ८१॥

पयामुख्यया वृत्त्या स्वाभिधास्वरूपस्याभिधानं प्रतिपादनं शब्देन सामु
ख्यावृत्तिरेका जात्यादिस्थलभिन्नांगीकार्ये त्ययं निर्देशशब्दस्तत्ताभिन्न
एवेत्यर्थः निर्देशोस्वरूपेशब्द इति सप्तमीतत्पुरुष इति भावः ८० ग्रपस्य
फलमाहयोस्त्येति पीयूषवर्षेति जयदेवस्यैव नामांतरं चंद्रस्य चंद्रालो
केन तदाख्यग्रंथेन च मनोहरं लोकमिति पाठे तु मनोहरं तत्तमभयमि

त्पर्पः सुधाधानिधानं सुधास्थानं तत्र आपंचमासाय आप्य मुदं
प्रीतिं अपध्वमाअमध्वम् हे विबुधा देवाः पंडिता अत्र त्पर्पः ९१॥
त्वादिकीर्तयेआह जपंतीति संज्ञापदोस्त्रीतिवहुव्रीहिः सूक्ते
ति पाठे प्येवं योगस्तु स्फुट एव॰ गिरः उक्ता रूपा जयंति निर्दुष्टत्वा
दितिभावः ९२ महादेव इति पूर्ववत् दशासंख्या इति विशेषः प्र
णीतास्तेनासौ सुकविजयदेवेन दशाभिश्चिरं चंद्रालोकः सुख

पीयूषवर्षप्रभवं चंद्रालोकं मनोहरं सुधानिधानमा
साद्य अपध्वं विबुधा मुदं ९२ जयंति याज्ञिकश्रीमन्महा
देवांगजन्मनः सूक्तपीयूषवर्षस्य जयदेवकवेर्गिरः ९३
महादेवः सत्रः मयूखः स्तेनासौ सुकविजयदेवेन रचिते
चिरं चंद्रालोके महतिदशासंख्याः सुखयत्तु ९४ इति पीयू
षवर्षविरचिते चंद्रालोके दशमो मयूखः॥१०॥ श्रुभं

यत्तु मयूखैर्दशादिशा इत्युत्तरार्द्धपाठांतरं ९३ इति श्रीमत्पाप

चं॰
१३८

गंडोपाख्य वैद्यनाथ विरचिते चंद्रालोकव्याख्याने दशाभिधेये दशमो विलासः १०॥ शुभं संपूर्णम्॥ शुभम् मस्तु ॥ श्री
अथ शुभ संवत् १९३९ फाल्गुण शुक्ल चतुर्दश्यां गुरु वासरे
लिखितं मिश्र अमीचंद काला झस्यां पुर मध्ये ॥ शुभम्॥
श्री दुर्गा जी सहाय अस्तु

मूलस्य टीकायाश्च समग्र संख्या
२५८५ श्लोकाः

